॥ श्रीः ॥

उत्तरमध्यमा प्रथम-खण्ड

अनिवार्य संस्कृत-गाइड

(प्रथम प्रश्न-पत्र)

सत्यहरिश्चन्द्रोदयम्
अलङ्कार
निबन्ध

नवीन पाठ्यक्रमानुसार लघु एवं अतिलघु
प्रश्नोत्तर सहित

लेखक
शिवप्रसाद द्विवेदी

चौखम्बा सुरभारती प्रकाशन
वाराणसी

परीक्षापयोगी प्रश्नोत्तरात्मक पुस्तकें
(संस्कृत भाषा में)

अभिधावृत्तिमातृका-सोपानम् । डॉ. शिवप्रसाद द्विवेदी
अलङ्कारशास्त्रस्येतिहासः । परमेश्वरदीन पाण्डेय
उत्तररामचरितादर्श । डॉ. रमाशंकर मिश्र
कर्पूरमंजरी-दीपिका । गौरीनाथ मिश्र 'भास्कर'
कादम्बरी-कला-प्रकाशः । डॉ. नरेश झा
कादम्बरी-सोपानम् । शिवप्रसाद द्विवेदी
काव्यप्रकाश-रहस्यम् । श्रीरामजीलाल शर्मा
काव्यमीमांसा-दीपिका । वेदव्यास शुक्ल (१-५ अध्याय)
काव्यशास्त्रस्येतिहास-सोपानम् । डॉ. शिवप्रसाद द्विवेदी
काव्यालङ्कारसूत्रवृत्तेः-आलोकः । (तृतीयाधिकरण प्रश्नोत्तरी) । डॉ. नरेश झा
किरातार्जुनीय-रहस्यम् । डॉ. कृष्णदेव प्रसाद । १-२ सर्ग, ३-६ सर्ग
कुमारसम्भवम्-रहस्यम् । श्री रामप्रसाद त्रिपाठी । १-२ सर्ग
कुवलयानन्दालोकः । डॉ. नरेश झा
चन्द्रकलानाटिका-रहस्यम् । परमेश्वरदीन पाण्डेय
चन्द्रालोक-रहस्यम् । मानवल्ली तथा बेताल
चम्पूरामायण सोपानम् । डॉ शिवप्रसाद द्विवेदी
तर्कभाषा-सोपानम् । डॉ. शिवप्रसाद द्विवेदी
तर्कसंग्रह-रहस्यम् । श्रीकीर्त्यानन्द झा
दशकुमारचरित-सोपानम् । डॉ. शिवप्रसाद द्विवेदी
ध्वन्यालोक-प्रकाशिका । श्री राजेन्द्रप्रसाद कोठ्यारी
नलचम्पू-रहस्यम् । पं. परमेश्वरदीन पाण्डेय
नाटयशास्त्र-प्रश्नोत्तरी । १-७ अध्याय; १७-२० अध्याय
नैषधीयचरित-प्रश्नोत्तरी । मिश्र एवं द्विवेदी । १-५ सर्ग; १०-१३ सर्ग
परमलघुमञ्जूषा-सोपानम् । डॉ. शिवप्रसाद द्विवेदी
परिभाषेन्दुशेखर-सोपानम् । डॉ. शिवप्रसाद द्विवेदी
पाणिनीयशिक्षा-सोपानम् । डॉ. बालगोविन्द झा
प्रतिमानाटक-रहस्यम् । डॉ. रमाशंकर त्रिपाठी
प्रबन्धसङ्ग्रहः (व्याकरणाचार्य निबन्ध) । डॉ. ब्रह्मानन्द त्रिपाठी
भट्टिकाव्य-दर्पणः । स्वामी प्रज्ञान भिक्षु । १-४ सर्ग, ५-८ सर्ग
भट्टिकाव्यालोकः । डॉ. रमाशङ्कर मिश्र । १४-१७ सर्ग, १८-२२ सर्ग
भारतीयसंस्कृति-सोपानम् । आचार्य शिवप्रसाद द्विवेदी
मध्यसिद्धान्तकौमुदी-चन्द्रिका । आचार्य विजयमित्रशास्त्री (१-४ खण्ड) सम्पूर्ण

३५०-३

॥ श्रीः ॥

उत्तरमध्यमा प्रथम-खण्ड

अनिवार्य संस्कृत-गाइड

(प्रथम प्रश्न-पत्र)

सत्यहरिश्चन्द्रोदयम्
अलङ्कार
निबन्ध

नवीन पाठ्यक्रमानुसार लघु एवं अतिलघु
प्रश्नोत्तर सहित

लेखक
शिवप्रसाद द्विवेदी

चौखम्बा सुरभारती प्रकाशन
वाराणसी

प्रकाशक

चौखम्बा सुरभारती प्रकाशन

(भारतीय संस्कृति एवं साहित्य के प्रकाशक तथा वितरक)

के. 37/117 गोपालमन्दिर लेन

पो. बा. नं. 1129, वाराणसी 221001

दूरभाष : 2335263

© सर्वाधिकार प्रकाशकाधीन

नवीन संस्करण

मूल्य : 60.00

अन्य प्राप्तिस्थान

चौखम्बा पब्लिशिंग हाउस

4697/2, भू-तल (ग्राउण्ड फ्लोर)

गली नं. 21-ए, अंसारी रोड

दरियागंज, नई दिल्ली 110002

दूरभाष : 32996391

ई-मेल chaukhambapublishinghouse@gmil.com

❖

चौखम्बा संस्कृत प्रतिष्ठान

38 यू. ए. बंगलो रोड, जवाहर नगर

पो. बा. नं. 2113

दिल्ली 110007

दूरभाष : 23856391

❖

चौखम्बा विद्याभवन

चौक (बैंक ऑफ बड़ोदा भवन के पीछे)

पो. बा. नं. 1069, वाराणसी 221001

दूरभाष : 2420404

विषयानुक्रमः

गद्यखण्डानां व्याख्यात्मको भागः

१. लोकाभ्युदयविभवेन विश्वविश्रुतः··· ··· ···धवलतां विदधाति । १
२. सरयूपकण्ठे कोसलानां··· ··· ··· ···कश्चिदल्पविद्यः । २
३. 'सत्यं ततान सूर्यः' इति लोकेषु··· ··· ··· मानदण्डो बभूव । ३
४. तस्मिन् भुवनत्रयकीर्तितेऽभिजाते·········वितरन्ति स्म । ४
५. कुलधनो गृहमेधी हरिश्चन्द्रः·········संस्कारयामास । ५
६. प्रजानाथ ! साधारणोऽपि··· ··· ···साक्षादुपासनीयः । ६
७. तत्रोपगम्य वरुणमुद्दिश्य··· ··· ···विसर्जयामास । ७
८. गुरो रोचकविवरणेन··· ··· ···तस्मै स्वागतं व्याजह्रुः । ९
९. हरिश्चन्द्रोऽधियात्रं यत्र तत्र··· ··· ···भूरिशः प्रशशंस । १०
१०. अन्यत्र हरिश्चन्द्रेण तटीयनगराणि··· ··· ···विभावितानि । ११
११. मनसा पूर्वतः सुचिरं ··· ··· ···वरुणालयो विरराज । १२
१२. हरिश्चन्द्रः पुरो ब्रह्मघोष ·· ···· ···महार्णवं ददर्श । १३
१३. तत्र गङ्गासमुद्रयोर्मध्ये··· ··· ···नितरां क्षेमः प्राभवत् । १४
१४. ऊर्ध्वबाहुर्जितेन्द्रियः··· ···· ···तमभिषिच्योपतिष्ठन्ति । १६
१५. कालान्तरेण हरिश्चन्द्रो··· ··· ···सम्यगनुष्ठितमेव । १७
१६. अद्यावधिचरितेन··· ··· ···समावर्तयिष्यामीति । १९
१७. वरुणस्यामृतायमानममोघं··· ··· ···सहर्षं प्रतस्थाते । २०
१८. तपसा कृशोऽपि··· ··· ···प्रकाशमदीपयताम् । २०
१९. वरुणोपस्थानाद्··· ··· ····रञ्जकं सञ्जातम् । २१
२०. प्रजानां मङ्गलकामना··· ··· ···नित्यं वर्धयामास । २२
२१. उपनयनकाले वसिष्ठप्रमुखैः··· ··· ····विमृशन्नासाञ्चक्रे । २३
२२. हरिश्चन्द्रः स्वपुत्रमुपनयनकाले··· ··· ···यथाकालं ज्ञास्यते । २४
२३. उपनयनविधौ 'अद्भ्यस्त्वा'··· ···· ···निष्पादितम् । २५
२४. उपनयनकाले दिङ्मण्डलेभ्यः समागताः··· ··· ···मानन्दयतु इति । २६
२५. राजन् ! विश्वविजयस्तु ··· ··· ···भवतोऽनुगामिभिश्च । २७

२६. इदं प्रयोजनमभिलक्ष्य देशे देशे ... ...प्राणपणेन यतेत । २९

२७. धर्मराज्ये 'वसुधैव कुटुम्बकम्'... ... ...भूतग्रामं पालयतु । ३०

२८. धर्मराज्ये सर्वे लोका:... ... ...विज्ञायेत धर्मराज्ये । ३१

२९. पुरा धर्मविजयेन भवदीय:... ... ...प्रस्थातव्यमिति । ३२

३०. धर्मविजययात्रा वेदसम्पन्नै:... ... ...प्रतिष्ठापयामास । ३३

३१. परमश्रद्धया हरिश्चन्द्र:... ... ...चतुर्वर्गोपायान् विममर्श । ३४

३२. मिश्रके तीर्थे तेन महर्षे:... ... ...विधातुं प्रतिजज्ञे । ३५

३३. नैमिषारण्याद् हरिश्चन्द्रो... ... ...ललितं चन्द्रायते स्म । ३६

३४. मासेनैकेन परिभ्रमन्... ... ...वृत्तिर्बलीयसी बभूव । ३७

३५. त्रैलोक्यस्य वैषम्यं निवारयितुं... ... ...स्वमनोगतमुवाच । ३८

३६. तात ! युगान्ते सति न ... ...भूमानमनुबभूवु: । ३९

३७. नारदस्य वच: परमार्थेन... ... ...तावधोविधं सम्बोधयामास । ४०

३८. भो ब्रह्मर्षे ! युगेऽस्मिन्... ... ...परामर्शेन निश्चेतुमर्हतीति । ४२

३९. महामुने ! गुणाकरस्य... ... ...प्रतिश्रुत्य निर्जगाम । ४३

४०. आत्मगुणै: पृथिवीं मण्डयतो... ... ...अयोध्यां प्रतीयाय । ४४

४१. एतदर्थं प्रसङ्गत: पृथिवी... ... ...राजसूयमुपतस्थिरे । ४५

४२. उपात्तयज्ञो हरिश्चन्द्रो... ... ...कोशपतिमादिदेश । ४६

४३. कोशपतिस्तु भृशमुद्विग्नो ... ...सिद्धिर्भवतु इति । ४८

४४. कुलपतिदानदुराधिनोन्मनायमाना......न गणयतीति । ४९

४५. विश्वामित्राय प्रतिश्रुतं... ... ...विषयेऽस्मिन् समर्था: । ५०

४६. वैषम्यसखो हरिश्चन्द्रोऽपि... ... ...स्रष्टुं प्रचक्रमे इति । ५१

४७. काशीं वा कैलासं वा... ... ...महायात्रां विधास्यामीति । ५२

४८. मार्गे हरिश्चन्द्रो भविष्येण... ...तेषां विनिर्णय आसीत् । ५३

४९. काशिराजो हरिश्चन्द्रस्य... ... ...विदध्यादिति । ५४

५०. विश्वामित्र: ससम्भ्रमं... ... ...राजानुभाव: इति । ५६

५१. विश्वामित्रोऽनेन प्रस्तावेनात्मसमीहितं... ... ...निश्चक्राम । ५७

५२. पुरोदारदर्शनोऽप्यर्थिभावं... ... ...नयनपथगामि सञ्जातम् । ५७

५३. पुनश्च तत्र तपोधनानां... ... ...समर्पयितुं च वचनं ददौ । ५८

५४. अपरेद्युर्हरिश्चन्द्रो विश्वामित्राय...... ...रोहितो निश्चक्राम । ६०

५५. सर्वे क्षयान्ता: निचया:......दिवं गमिष्यन्तीति । ६१

५६. सर्वे ते विस्रब्धश्रोतारस्तय.........शान्तरसो विरराज । ६२
५७. दिवारात्रं निरन्तरं... ....सर्वमक्षयं भवति । ६२
५८. हरिश्चन्द्रोऽबलायाः सूर्यवंशीयत्वेन..........व्यवहरति स्म । ६४
५९. क्षत्रियान्वयं कुलजनं विहाय... ... ...निःसंज्ञो बभूव । ६५
६०. वरुणकुले शिक्षितो हरिश्चन्द्रस्य... ... ...तदनुरोधेनात्रागामिति । ६६
६१. जीवपुत्रा शैब्या प्रह्लादजननं... ... ...स्पर्शरसज्ञतां ययौ । ६७

पद्यानां व्याख्यात्मको भागः

१. बहुकल्याणोदर्कं ६८
२. सुरभिकुसुमगन्धैः ६८
३. आनाकमेकधनुषा भुवनं ६९
४. पृथिव्यां सन्ति ये धर्मा ६९
५. सर्वं पुण्यं भवतु भवतो ७०
६. परिग्रहो हि दुःखाय ७१
७. सत्यं सत्यं पुनः सत्यं ७२
८. सत्यसत्त्वशालिनीं ७२
९. भाग्यैर्मेऽधिगता ह्यनेकजनुषां ७३

आलोचनात्मको भागः

१. सत्यहरिश्चन्द्रोदयस्य प्रथमप्रकरणस्य सारांशं लिखत । ७५
२. सत्यहरिश्चन्द्रोदयस्य द्वितीयप्रकरणस्य सारांशं लिखत । ७५
३. सत्यहरिश्चन्द्रोदयनामकस्य गद्यकाव्यस्य तृतीयप्रकरणस्य सारांशं लिखत । ७६
४. रोहितापहारनामकस्य प्रकरणस्य सारांशं लिखत । (अथवा) सत्यहरिश्चन्द्रोदयनामकस्य गद्यकाव्यस्य चतुर्थप्रकरणस्य कथां लिखत । ७७
५. विश्वविजयस्वरूपनिर्णयनामकस्य प्रकरणस्य सारांशं लिखत, सत्यहरिश्चन्द्रोदयनामकस्य गद्यकाव्यस्य । (अथवा) सत्यहरिश्चन्द्रोदयनामकस्य गद्यकाव्यस्य पञ्चमप्रकरणस्य सारांशं लिखत । ७८
६. सत्यहरिश्चन्द्रोदयस्य षष्ठप्रकरणस्य सारांशं लिखत । (अथवा) सत्यहरिश्चन्द्रोदयनामकस्य गद्यकाव्यस्य विश्वविजयपथे नैमिषारण्यदर्शननामकस्य षष्ठप्रकरणस्य सारांशं लिखत । ७९

७. सत्यहरिश्चन्द्रोदयगद्यकाव्यस्य विश्वविजयनामकस्य प्रकरणस्य सारांशं लिखत। (अथवा) सत्यहरिश्चन्द्रोदयगद्यकाव्यस्य सप्तम-प्रकरणस्य सारांशं लिखत। ८०

८. सत्यहरिश्चन्द्रोदयगद्यकाव्यस्याष्टमप्रकरणस्य कथां वर्णयत। (अथवा) सत्यहरिश्चन्द्रोदयगद्यकाव्यस्य परीक्षासङ्कल्पनामकस्याष्टमप्रकरणस्य सारांशं लिखत। ८१

९. सत्यहरिश्चन्द्रोदयस्य गद्यकाव्यस्य नवमप्रकरणस्य सारांशं लिखत। (अथवा) सत्यहरिश्चन्द्रोदयगद्यकाव्यस्य हरिश्चन्द्रस्य विश्वामित्राय लक्षदानप्रतिश्रुतिनामकस्य नवमप्रकरणस्य सारांशं लिखत। ८२

१०. सत्यहरिश्चन्द्रोदयस्य गद्यकाव्यस्य काशीगमनाय परिवारमन्त्रणं नामकस्य दशमप्रकरणस्य सारांशं लिखत। ८३

११. सत्यहरिश्चन्द्रोदयनामकस्य महाकाव्यस्य 'हरिश्चन्द्रस्य पौरजानपदामन्त्रणं' नामकस्यैकादशस्य प्रकरणस्य सारांशं लिखत। ८४

१२. सत्यहरिश्चन्द्रोदयनामकस्य गद्यकाव्यस्य काशीप्रगमननामकस्य द्वादशतमप्रकरणस्य सारांशं लिखत। ८५

१३. सत्यहरिश्चन्द्रोदयगद्यकाव्यस्य काश्यां 'सम्मानयोजना'नामकस्य त्रयोदशप्रकरणस्य सारांशं लिथत। ८५

१४. सत्यहरिश्चन्द्रोदयस्य गद्यकाव्यस्य चतुर्दशस्य प्रकरणस्य हरिश्चन्द्रस्य काशीप्रपत्तिनामकस्य सारांशं लिखत। ८६

१५. सत्यहरिश्चन्द्रोदयनामकस्य गद्यकाव्यस्य हरिश्चन्द्रस्य भृतिनियोगनामकस्य पञ्चदशप्रकरणस्य सारांशं लिखत। ८७

१६. सत्यहरिश्चन्द्रोदयनामकस्य गद्यकाव्यस्य श्मशानमहिमानामकस्य षोडशप्रकरणस्य सारांशं लिखत। ८८

१७. सत्यहरिश्चन्द्रोदयस्य गद्यकाव्यस्य सप्तदशप्रकरणस्य सारांशं लिखत। ८९

१८. सत्यहरिश्चन्द्रोदयनामकं गद्यकाव्यमाश्रित्य हरिश्चन्द्रस्य कथां वर्णयन्तु। ९०

१९. सत्यहरिश्चन्द्रोदयं गद्यकाव्यमाश्रित्य हरिश्चन्द्रस्य चरित्रं चित्रयत। ९२

२०. सत्यहरिश्चन्द्रोदयस्य गद्यकाव्यस्य लेखकस्य परिचयं लिखत। ९४

अलङ्कार-अध्यायभागः

अलङ्कारलक्षणम्
शब्दश्लेषालङ्कारः सोदाहरणम्
अर्थश्लेषालङ्कारः सोदाहरणम्
अनुप्रासालङ्कारः सोदाहरणम्
यमकालङ्कारः सोदाहरणम्
उपमालङ्कारः सोदाहरणम्
अनन्वयालङ्कारः सोदाहरणम्
रूपकालङ्कारः सोदाहरणम्
उत्प्रेक्षालङ्कारः सोदाहरणम्
काव्यलिङ्गालङ्कारः सोदाहरणम्
अतिशयोक्त्यलङ्कारः सोदाहरणम्
दृष्टान्तालङ्कारः सोदाहरणम्
अर्थान्तरन्यासालङ्कारः सोदाहरणम्
विरोधाभासालङ्कारः सोदाहरणम्
विभावनालङ्कारः सोदाहरणम्
विशेषोक्त्यलङ्कारः सोदाहरणम्
असङ्गत्यलङ्कारः सोदाहरणम्
अन्योन्यालङ्कारः सोदाहरणम्
प्रतीपालङ्कारः सोदाहरणम्
स्वभावोक्त्यलङ्कारः सोदाहरणम्
संसृष्ट्यलङ्कारः सोदाहरणम्
सङ्करालङ्कारः सोदाहरणम्
(क) अङ्गाङ्गिसङ्करः
(ख) एकाश्रयसङ्करः
(ग) सन्देहसङ्करः

निबन्धाभ्यासको भागः

१. विद्या

अथवा

विद्याधनं सर्वधनप्रधानम् ।

अथवा

किं किं न साधयति कल्पलतेव विद्या ।

२. सत्सङ्गतिः

अथवा

सत्सङ्गतिः कथय किं न करोति पुंसाम् ।

३. छात्रजीवनम्

अथवा

छात्राणामध्ययनं तपः ।

४. परोपकारः

अथवा

परोपकाराय सतां विभूतयः ।

५. संस्कृतभाषा

अथवा

संस्कृतं राष्ट्रभाषा स्यात् ।

६. वाराणसी

७. मम विद्यालयः

८. मम प्रियतमः कविः महाकविः कालिदासः

९. दीपावली अथवा दीपमालिका

१०. वसन्तोत्सवः

११. सदाचारः

अथवा

आचारः परमो धर्मः ।

अथवा

आचारहीनं न पुनन्ति वेदाः ।

॥ श्रीः ॥

सत्यहरिश्चन्द्रोदय-सोपानम्

गद्यखण्डानां व्याख्यात्मको भागः

(१) लोकाभ्युदय विभवेन विश्वविश्रुतः······धवलतां विदधाति ।

सन्दर्भप्रसङ्गौ—अयं गद्यखण्डः श्रीरामजी उपाध्यायेन लिखितस्य सत्यहरिश्चन्द्रोदयनामकस्य गद्यकाव्यस्य प्रथमप्रकरणाद् गृहीतो वर्त्तते । अत्र लेखको वर्णयति कोसलनामकस्य जनपदस्यैश्वर्यम् । अस्य कोसलजनपदस्य त्रीणि वैशिष्ट्यानि अत्र समुपात्तानि सन्ति—१. अयं जनपदो विश्वविश्रुतो वर्त्तते । २. अस्य संस्थापको मानवेन्द्रो मनुर्बभूव । किञ्च—३. जनपदेऽस्मिन् परमपवित्रा नदी सरयू प्रवहति ।

व्याख्या—लोकाभ्युदयविभवेन—लोके=भुवने, अभ्युदयः=अभ्युन्नतिः, येन तथाविधेन विभवेन=ऐश्वर्येण, विश्वविश्रुतः—विश्वे=सम्पूर्णे जगति, विश्रुतः=प्रख्यातः, कोसलो नाम=कोसलाभिधानः, साम्प्रियकः=अतिशयेन प्रियः, मनोज्ञतम इति यावत्, जनपदः=जनदेशः, 'भवेज्जनपदो जानपदोऽपि जनदेशयोः' । इति विश्वमेदिन्यौ । 'नीवृज्जनपदः' इत्यमरः । भारते वर्षे=एतदभिधानके राष्ट्रे, सच्चारित्र्यसन्निवेशेन—सतां चारित्र्यं सच्चारित्र्यम्=सदाचरणमिति यावत्, तस्य सन्निवेशेन=निकर्षणेन, सन्निविशन्तेऽत्र सन्निवेशः, 'सन्निवेशः निकर्षणः' इत्यमरः । प्राणभूतः=प्रामाणिकतां गतः, दिवौकसामपि—दिवि=स्वर्गे, ओकांसि=गृहाणि, येषां ते तेषामपि=देवानामपीत्यर्थः, दर्शनीयताम्=अवलोकनीयतां, गतः=प्राप्तः । तत्र=कोसले जनपदे, प्रजानाम्=प्रकृतिजनानाम्, चतुर्वर्गोपपत्तिसाधनधारिणीम्—चतुर्णाम्=धर्मार्थकाममोक्षाख्यानां पुरुषार्थानाम्, या ह्युपपत्तिः=प्राप्तिः, तस्याः साधनानि, धरति या सा तथाविधाम्, धरणीम्=पृथिवीम्, अन्विष्य=गवेषयित्वा, मानवेन्द्रः=सर्वेषां मानवानां राजा, मनुः, पुरस्तात्=प्राचीने काले, पृथिव्याम्=धरण्याम्, स्वनिवेशम्—स्वस्य=आत्मनः, निवेशः=निवासस्थानम्, चकार=अकार्षीत् । अस्मिन्=एतस्मिन्, प्रदेशे=जनपदे, शैलाधिराजस्य=पर्वत-

राजस्य हिमालयस्य, तथा चाह हिमालयस्य शैलाधिराजत्वं महाकविः कालिदासः—'अस्त्युत्तरस्यां दिशि देवतात्मा हिमालयो नाम नगाधिराजः'। इति। तपःस्थलीषु = तपश्चर्यायाः प्राकृतासु भूमिषु, सञ्चरताम् = विचरणं कुर्वताम्, महामुनीनाम् = महातपस्विनाम्, वेदघोषनिर्भरमन्द्राणाम् —वेदस्य = वेदोच्चारणस्य, यो हि घोषः = ध्वनिः, तद्वत् निर्भरम् = भृशम्, 'अतिवेल-भृशात्यर्थातिमात्रोद्गाढनिर्भरम्'। इत्यमरः। मन्द्रानाम् = गम्भीराणाम्, घनानाम् = मेघानाम्, अप्सु = जलेषु, लब्धजनिः—लब्धा = प्राप्ता, जनिः = जन्म, यया सा तथाविधा सरयूः = एतन्नाम्नी नदी, शाश्वतम् = सर्वदा, स्वीकृतेन = अङ्गीकृतेन, पितुः = जनकस्य, औदात्येन = औदार्येण, दर्शन-ध्यान-स्नान पान-जुषाम् —दर्शनम् = अवलोकनम्, ध्यानम् = तैलधारावदविच्छिन्नस्मृतिसन्तान-रूपम्, स्नानम् = अवगाहनम्, पानं च जुषन्ते ये जनाः तेषाम्, धवलताम् = सात्त्विकताम्, मलनिर्मोचनं बाह्यञ्चापि, विदधाति = सम्पादयति।

(२) सरयूपकण्ठे कोसलानां······पृथिव्यां कश्चिदल्पविद्यः।

सन्दर्भप्रसङ्गौ—अयं गद्यखण्डः सत्यहरिश्चन्दोदयनामकस्य गद्यकाव्यस्य प्रथमप्रकरणात् परिगृहीतो वर्त्तते। मानवेन्द्रो मनुः अतीव शोभनायां चतुर्वर्ग-प्राप्तिसाधनसम्पन्नायां धरण्यां निवेशितस्य कोसलजनपदस्य राजधानी अयोध्याऽऽसीत्। अस्यां नगर्यां सर्वविद्याधुरीणाः विश्वस्य सच्चारित्र्योपशिक्षकाः जनाः निवसन्ति स्म।

व्याख्या—सरयूपकण्ठे—सरय्वाः = एतन्नाम्न्याः नगर्याः, उपकण्ठे = तटे, कोसलानाम् = कोसलजनपदानाम्, राजधानी = सर्वप्रधाना नगरी, यत्र राजा निवसति, आदिराजेन —आदिश्चासौ राजा आदिराजः, तेन आदिराजेन = सर्व-प्रथमेन राज्ञा, उत्तमश्लोकेन—उत्तमाः = सर्वोत्कर्षेण वर्तमानाः, श्लोकाः = यशांसि, यस्याऽसौ तथाविधस्तेन, मनुना = मनुनामकेन, अयोध्यायाम् = अयोध्यानगर्याम्, अकारि = कृता। सा = कोसलानां राजधानीत्वेन प्रख्याता, नगरी = पुरी अयोध्यानाम्नी, दिग्दिगन्तरेभ्यः = दिक्षुभ्यो विदिक्षुभ्यश्च, समागतान् = सम्प्राप्तान्, सर्वविद्याविशारदान्—सर्वासु = निखिलासु, विद्यासु विशारदा ये ते तथाविधान्, प्रज्ञाधुरीणान्—प्रज्ञायाम् = नवनवोन्मेषशालिनी बुद्धिर्हि प्रज्ञा तस्यां, धुरीणान् = अग्रगण्यान्, निकामम् = अतिशयेन, आश्रयते स्म = निवासयति स्म। तत्रत्यानाम् = अयोध्यायां विद्यमानानाम्, आचार्याणाम् = आचार्यत्वमधिगतानां जनानाम्, श्रीचरणान् = चरणपद्मानि, समुपा-

स्य = संसेव्य, भूमण्डले = पृथिवीमण्डले, विश्वमानवाः = सम्पूर्णस्य जगतो मानवाः, विद्याम् = ज्ञानम्, चरित्रम् = सदाचरणपालनस्वरूपं च, प्रपेदिरे = प्राप्नुवन्ति स्म । अत एव = एतस्मादेव कारणात्, पृथिव्याम् = भूम्याम्, तदा = तस्मिन् काले, अल्पविद्यः = अल्पज्ञः, नासीत् = नहि अवर्तत ।

(३) 'सत्यं ततान सूर्यः' इति लोकेषु······मानदण्डो बभूव ।

सन्दर्भप्रसङ्गौ—अयं गद्यखण्डः सत्यहरिश्चन्द्रोदयनामकस्य गद्यकाव्यस्य प्रथमप्रकरणात् परिगृहीतो वर्त्तते । भारतवर्षस्य रमणीयतमायां धरण्यां कोसलो नाम जनपदो मानवेन्द्रेण मनुनाऽऽदिराजेन निवासित आसीत् । तस्य जनपदस्य राजधानी मनोज्ञतमा, अयोध्यानाम्नी महद्भिराचार्यैरध्युषिता च नगरी बभूव । अस्यामेव नगर्यां भगवता भास्करेण प्रवर्तितः क्षत्रियाणां सूर्यवंशीयो वंशः राज्यमकार्षीत् । सूर्यवंशीयेष्वेव राजसु इक्ष्वाकुनामको राजा बभूव, यस्याचरणं प्रख्यातमासीत् सदाचाराय ।

व्याख्या—सूर्यः = रविः, सत्यम् = सत्यताम्, ततान = प्रसारयामास लोके, इति = इति वाक्यानुसारेण, लोकेषु = जनेषु भुवनेषु च, शाश्वतम् = सार्वभौमम्, सत्यादर्शम् = सत्यवादित्वस्य, आदर्शम् = प्रतिमानम्, प्रतिष्ठापयितुम् = संस्थापयितुम्, वंशकरः = कुलप्रवर्तकः, सूर्यः = भगवान् भास्करः, स्वीयाम् = आत्मीयाम्, परम्पराम् = पद्धतिम्, तत्र = अयोध्यायाम्, मन्वादिभ्यः = मन्वादिभ्यो महर्षिभ्यः, प्रवर्तयामास = प्रवर्तितां चकार । सूर्यवंशस्य = सूर्यवंशे समुत्पन्नः, नीराजितलोकः—नीराजितः = नीराजनादिभ्यः समर्चितः, लोकेन = जगता, य असौ तथाविधः, कूटस्थः = मूलपुरुषः, मानवेन्द्रः = मानवानां श्रेष्ठः, मनुः, स्वीयेन = स्वकीयेन, सदाचारेण = सदाचरणेन द्वारा, तदनुरूपं = स्वसदाचरणानुकूलम्, प्रजानाम् = प्रकृतिजनानाम्, नियतव्रतेन—नियतानि = निश्चितानि, व्रतानि यस्याऽसौ तथाविधेन द्वारा, यम् = यादृशम्, सनातनम् = शाश्वतिकम्, आत्मगुणादर्शम्—आत्मनः = प्रत्यगात्मनः, गुणानां = सत्यवादित्व-शुचित्व-मार्दवार्जवादीनां गुणानाम्, आदर्शम् = प्रतिमानम्, प्रतिष्ठापयामास = संस्थापयामास, स एव = तथाविधा आत्मगुणानामादर्श एव, परतः = मनोः परवर्तिनि काले, इक्ष्वाकुकुलनरेन्द्राणाम्—इक्ष्वाकौ = सूर्यवंशे एव, उत्पन्नस्य राजविशेषस्य, कुले = वंशे, सञ्जाताः ये नरेन्द्राः = राजानः, तेषां प्रजापालनवृत्तिषु—प्रजानाम् = जानपदानाम्, पालने = रक्षणकर्मणि, या वृत्तयः = प्रवृत्तयो व्यवहाराः, तासु, मानदण्डः = प्रमाणम्, बभूव = अभवत् ।

(४) तस्मिन् भुवनत्रयकीर्तितेऽभिजाते ……वितरन्ति स्म ।

सन्दर्भप्रसङ्गौ—अयं गद्यखण्डः सत्यहरिश्चन्द्रोदयनामकस्य गद्यकाव्यस्य प्रथमप्रकरणात् परिगृहीतो वर्त्तते । मानवेन्द्रेण मनुना सर्वगुणसम्पन्नायां संस्थापितस्य कोसलजनपदस्य राजधान्ययोध्याऽऽसीत् । आयोध्यका एव आचार्याः सम्पूर्णे जगति सच्चारित्र्यस्य शिक्षां प्रसारयामासुः । तथा चाह मनुः—'एतद्देशप्रसूतस्य सकाशादग्रजन्मनः । स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः' ॥ इति । अस्यामेवायोध्यायां भगवता सूर्येण प्रवर्तिताः सूर्यवंशीयाः क्षत्रिया राज्यमकार्षुः । अस्मिन्नेव सूर्यवंशे सत्यवादी, सकलकल्याणगुणगणाकरः, वेत्ता सर्वविद्यानां, ब्रह्मकोशस्य गोप्ता, वदान्यशिरोमणि राज्ञः त्रिशङ्कोः सत्यवत्यां समुत्पन्नो राजा हरिश्चन्द्रो बभूव । तस्य राज्ञः प्रजा अपि वर्णाश्रमधर्मस्य संरक्षिका, परोपकारपरायणा, परिग्रहपराङ्मुखी स्वभावतो वदान्या च बभूव ।

व्याख्या—तस्मिन् = भगवता सूर्येण प्रवर्तिते, भुवनत्रयकीर्तिते = त्रैलोक्ये प्रख्याते, अभिजाते = श्रेष्ठे, सूर्यवंशे = सूर्यवंशीयानां क्षत्रियाणामन्ववाये, त्रेतायुगे = त्रेतानामके युगे, प्रजापतिरिव = ब्रह्मासदृशः, प्रजानन्दनः = प्रजानामानन्दकरः, सर्वविद्यावदातः = सर्वाभिः विद्याभिः प्रकाशितान्तःकरणः, ब्रह्मकोशस्य = ब्रह्माण्डस्य, गोप्ता = रक्षकः, उदारधीः = वदान्यः, यशस्वितमः = यशस्विनां शिरोमणिः, मनीषी—मनीषाऽस्ति अस्येति मनीषी = धीरः, 'धीरो मनीषी ज्ञः प्राज्ञः संख्यावान् पण्डितः कविः' । इत्यमरः । सत्यवतीपुत्रः = सत्यवतीनाम्न्यां पत्न्यां सञ्जातः त्रिशङ्कोः पुत्रः, चन्द्रनिभः = चन्द्रमा इव सर्वप्रजानामाह्लादकः, हरिश्चन्द्रः=एतन्नामा नामेति प्रसिद्धः, राजर्षिः=राजवर्यः, प्राभवत् = अभूत् । तस्य = हरिश्चन्द्रस्य, नित्यम् = सततम्, आपूर्यमाणेन = परिपूर्यमाणेन, गुणौघेन = गुणानां समूहेन, निमज्जिताः = कृतावगाहाः, पूर्णतया प्रभाविता इत्यर्थः, अपि प्रजाः = पौरजानपदाः, स्वस्वाश्रमेषु = स्वकीयेषु आश्रमेषु—ब्रह्मचर्यगार्हस्थ्यवानप्रस्थादिकेषु चतुर्षु, प्रतिष्ठापिताः = संस्थापिताः सत्यः, परेष्वपि=स्वव्यतिरिक्तेष्वपि जनेषु, आत्मानम्=प्रत्यगात्मानं परमात्मानं वा, वीक्षमाणाः = अवलोकमन्त्यः, परच्छिद्रापिधायिकाः—परेषाम् = स्वव्यतिरिक्तानां जनानां दोषाणामाच्छादिकाः, स्वीयम्=आत्मीयम्, सर्वस्वम् = निखिलं वस्तुजातम्, परार्थम्=परस्मै, मन्यमानाः=अवगच्छन्त्यः, परोत्कर्षपरा=स्वेतरस्य जनस्योत्कर्षकारिण्यः, स्वचारित्र्योच्छ्रयेण = आत्मनः सदाचारोत्कर्षेण द्वारा, लोकजीवनम्—लोकानाम् = सर्वेषां जनानाम्, जीवनम्=जीवितम्, मधुरयन्तः=

मधुरं कुर्वन्त्यः, परोपकारततिभिः=परेषामुपकाराणां परम्पराभिः, 'वसुधैव कुटुम्बकम्'=सम्पूर्णा पृथिव्येव स्वकीयः परिवारः, इति आदर्शम्=मानदण्डम्, सार्थयन्ति स्म=सार्थकं कुर्वन्ति स्म। तासाम्=प्रजानाम्, राजादर्शेन=राज्ञः आदर्शतां गतेन, संविभागेन=विभाजनेन द्वारा, सर्वे=सम्पूर्णाः, चराः=जङ्गमाः, अचराश्च=स्थावराश्च जीवाः, परस्परम्=मिथः, सौमनस्येन सङ्गता=सम्मिलिताः, अहमहमिकया=अहं पूर्वम् अहं पूर्वमिति भावनया, प्राणिलोकेभ्यः=जीवलोकेभ्यः, प्रतिपदम्—पदं पदमिति प्रतिपदम्=सर्वत्रैवेति भावः, जीवनसौरभ्यम्=जीवितस्य सौगन्ध्यम्, वितरन्ति स्म=वितीर्णं कुर्वन्ति स्म।

(५) कुलधनो गृहमेधी हरिश्चन्द्रः……संस्कारयामास।

सन्दर्भप्रसङ्गौ—अयं गद्यखण्डः सत्यहरिश्चन्द्रोदयनामकस्य गद्यकाव्यस्य द्वितीयप्रकरणात् परिगृहीतो वर्त्तते। कोसलजनपदस्य मानवेन्द्रेण मनुना निवासितस्य राजधान्यासीत् अयोध्या नाम नगरी। अत्रैव सूर्यवंशीयाः क्षत्रिया राज्यमकार्षुः। अस्मिन्नेव वंशे त्रिशङ्कोः पुत्रः, सत्यवतीनन्दनो सत्यार्जवदयादानदाक्षिण्यादिगुणसम्पन्नो राजा हरिश्चन्द्रो बभूव। तस्य पत्नी शैव्या आसीत्। यौवनकालं यावत् हरिश्चन्द्रदम्पत्योः यदा कापि सन्ततिर्नहि बभूव तदा राज्ञो मनसि स्ववंशकरस्य पुत्रस्य विषये चिन्ता समजायत। तदर्थं शैव्याऽपि व्रतनियमविशेषाणामनुष्ठानमकार्षीत्।

व्याख्या—कुलधनः—कुलम्=वंशः, एव धनं यस्याऽसौ तथाविधः, गृहमेधी=गृहस्थः, हरिश्चन्द्रः=एतन्नामा सूर्यवंशीय अयोध्याधिपतिः, आयौवनम्=यौवनमभिव्याप्य, यौवनकालपर्यन्तमिति भावः, पुत्रमुखम्—पुत्रस्य=आत्मजस्य, मुखम्=वदनम्, पुत्रमुखम्, न=नहि, ददर्श=अवलोकयामास। यौवनकालपर्यन्तं तस्य राज्ञः कश्चनापि पुत्रो नहि समुत्पन्न इति भावः। इति=एतस्मादेव हेतोः, भूयसी=महती, चिन्ता=आध्यानम्, 'स्याच्चिन्ता स्मृतिराध्यानमि'-त्यमरः। तम्=राजानं हरिश्चन्द्रम्, चिरम्=दीर्घकालं यावत्, अदुनोत्=दुःखितं चकार। अस्मत्परम्=मत्तः परवर्तिकाले, मे=मम हरिश्चन्द्रस्य, सूर्यवंशीयाः पूर्वजाः=पूर्वपुरुषाः, कथम्=केन प्रकारेण, परितर्पणम्=सर्वतः सन्तोषानुभवं, लप्स्यन्ते=प्राप्स्यन्ते, इत्यतोऽपि=इति प्रकारकेण विचारेणापि, तस्य=हरिश्चन्द्रस्य, दुःखतरम्=अतीवकष्टम्, आसीत्=अभूत्। कथं नाम=केन प्रकारेण, भविष्ये=भविष्यति काले, मदनन्तरम्=मत्तः पश्चात्, सूर्य-

वंशीयानाम्=सूर्यवंशे समुत्पन्नानाम्, आदर्शप्रजापालनवृत्त्या—आदर्शम्=अन्यैरनुकरणीयं, यद्धि प्रजानाम्=प्रकृतिजनानाम्, पालनम्=संरक्षणम्, तस्य या वृत्तिः=प्रवृत्तिः, तया, लोकाः=प्रजाजनाः समे, साम्प्रतम्=इदानीम्, वर्धिष्यन्ते=समृद्धिमवाप्स्यन्ति, इति=एतादृशी, चिन्ता=आध्यानम् ।

तस्य=राज्ञो हरिश्चन्द्रस्य, पत्नी=भार्या, महिषीरत्नम्—महिषीषु=कृताभिषेकासु राज्ञिषु, 'कृताभिषेका महिषी' इत्यमरः । रत्नम्=रत्नवत् श्रेष्ठा, संरक्षणीया भोग्यतमा चेति भावः, शैव्या=शैव्यानाम्नी, मम=शैव्यायाः, जायात्वम्=पत्नीत्वम्, अद्यावधि=इदानीं यावत्, चिरम्=दीर्घकालं यावत्, अपार्थमेव, यतो मयि कश्चनापि हरिश्चन्द्रात् पुत्रो नहि सञ्जातः । तथा चाह मनुः—'जायायास्तद्धि जायात्वं यदस्यां जायते पुनः' । इति । इति=एतादृशी, चिन्तापरायणा—विचारमग्ना, व्रतनियमानुष्ठानादिभिः=व्रतञ्च नियमश्च तयोः अनुष्ठानादिद्वारा, सविशेषम्=वैशिष्ट्यमधिगतम्, आत्मानम्, निकामम्=अतिशयेन, विश्वम्भरपुत्रलाभाय—विश्वम्भरति=पालयतीति विश्वम्भरः, तथाविधस्य पुत्रस्य=आत्मजस्य, लाभाय=समवाप्तये, संस्कारयामास=संस्कारसम्पन्नं कृतवती ।

(६) प्रजानाथ ! साधारणोऽपि······साक्षादुपासनीयः ।

सन्दर्भप्रसङ्गौ—गद्यखण्डोऽयं सत्यहरिश्चन्द्रोदयनामकस्य गद्यकाव्यस्य द्वितीयप्रकरणात परिगृहीतो वर्त्तते । अयोध्याधिपतिः सूर्यवंशीयो राजा हरिश्चन्द्रो यौवनकालपर्यन्तमनपत्यो बभूव । अत एव तस्य मनसि पुत्रावाप्तिविषयिणी महती चिन्ता समभवत् । तस्य पत्न्यपि पुत्रलाभाय व्रतानुष्ठानमकार्षीत् । अन्ते हरिश्चन्द्रदम्पती स्वकुलाचार्यस्य वसिष्ठस्य सविधे गत्वा, स्वपुत्रविषयिणीं चिन्तां श्रावयित्वा प्रार्थयामासतुः । तच्छ्रुत्वा महर्षिः वसिष्ठोऽवादीत् यत् सः तस्य चिन्तया सम्यगवगतो वर्तते । जलाधीशः वरुणोऽपि वाञ्छति हरिश्चन्द्रस्य विश्वम्भरं पुत्रमिति वरुणसभायां गतया सरस्वाऽपि मया श्रुतम् । अत एव त्वं प्रयाहि गङ्गासागरसङ्गमस्थलम्, उपासय च साक्षात् वरुणम् । अहमपि ध्यानयोगमहिम्ना वरुणकृपया लप्स्यमानं विश्वम्भरं पुत्रं पश्यामि ।

व्याख्या—प्रजानाथ !—प्रजानाम्=प्रकृतिजनानाम्, नाथः=स्वामी, तत्सम्बुद्धौ, साधारणोऽपि=सामान्योऽपि, जनः=मनुष्यः, महता=अत्यधिकेन कृतेन, श्रमेण=परिश्रमेण, तपसा=तपश्चर्यया च, अनुत्तमम्=सर्वोत्कृष्टम्,

स्वेष्टम्=स्वाभिलषितम्, लभेत=प्राप्नुयात्, इति=अत एव, दिव्येन=अतिलौकिकेन, विधानेन=विधिना, प्रजासु=प्रजाजनेषु, सत्कामाः=शुभाः कामनाः, शिवसङ्कल्पाश्च=कल्याणकराः सङ्कल्पाश्च, समिध्यन्ते=संवर्द्धन्ते। पुनः=भूयः, भवादृशानाम्=भवत्सदृशानाम्, नृपोत्तमानाम्=राजोत्तमानाम्, विषये किम्=किमु, मया=वसिष्ठेन, उदाहरणीयम्=वक्तव्यमास्ते। नहि किमपि, त्वं तु नूनं तपसा लप्स्यसे इति भावः। ते=तव, अभिनिवेशः=कामना, विश्वतः=सर्वतः, कल्याणोदर्कः—कल्याणम्=मङ्गलमयम्, उदर्कम्=फलं, यस्याऽसौ तथाविधः। भवतः=हरिश्चन्द्रस्य, पुत्रः=सुतः, भवतु=जायताम्, परममुत्कृष्टः=अतिशयेनोत्कृष्टः, लोकपालकश्च—लोकानाम्=भुवनानां जनानां च, पालकः=रक्षकः, इति=एतादृशी, समीहा=अभिलाषा, केवलम्=मात्रम्, प्रजानाम्=प्रकृतिजनानाम्, मन्त्रिणाम्=तवामात्यानाम्, न=नास्ति, अपितु=किन्तु, सर्वेषाम्=सकलानाम्, लोकपालानाम्, विशेषतः=विशेषरूपेण, मम=वसिष्ठस्य, पितुः=जनकस्य, वरुणस्य=वरुणनामकस्य जलाधिष्ठातृदेवस्य, इति=इत्येतत्, तस्य=वरुणस्य, सभाम्=समितिम्, उपासीना=उपविष्टा, सरयूः=एतन्नाम्न्याः नद्याः अधिष्ठातृदेवता, वरुणमुखादेव—वरुणस्य=जलेशस्य, मुखादेव=वदनादेव, विज्ञापिता=बोधिता, प्रसङ्गवशात्=प्रकरणविशेषवशात्, माम्=वसिष्ठम्, अवोचत्=अवादीत्—अयम्=एषः, ऋतम्भरः—ऋतम्=सत्यम्, बिभर्तीति ऋतम्भरः=सत्यपालकः; त्रैलोक्यस्य=भुवनत्रयस्य, सम्राट्=अधिपतिः, केवलम्=मात्रम्, साम्प्रतिकीम्=वर्तमानकालिकीम्, लोकस्थितिम्—लोकस्य=जगतः, स्थितिम्, अपि तु=किन्तु, भाविनीमपि=भविष्यत्कालिकीमपि, ताम्=लोकस्थितिम्, भवतः=हरिश्चन्द्रस्य, भाविना=भविष्यत्कालिकेन, आदर्शेन=अनुकरणीयाचरणेन, प्रतिष्ठापयितुकामः—प्रतिष्ठापयितुम्=संस्थापयितुम्, कामना यस्याऽसौ तथाविधः, वर्त्तते इति=इत्येतत्, अहम्=वसिष्ठः, नियतिनियोगम्—नियतेः=प्रकृतेः, नियोगम्, ध्यानयोगेन=सतततत्त्वचिन्तनसंस्काररूपेण संस्कृतेन मनसा, पश्यामि=अवलोकयामि।

(७) तत्रोपगम्य वरुणमुद्दिश्य ···· विसर्जयामास।

सन्दर्भप्रसङ्गौ—अयं गद्यखण्डः सत्यहरिश्चन्द्रोदयनामकस्य गद्यकाव्यस्य द्वितीयप्रकरणात् परिगृहीतो वर्त्तते। अयोध्याधिपतिः राजा हरिश्चन्द्र आयौवनं पुत्रमुखं नहि ददर्श। अत एव तस्य सन्तानविषयिणी चिन्ता समजनि। तस्य

पत्न्यपि भृशं चिन्तिता बभूव। एकदा जायापती स्वकुलाचार्यस्य वसिष्ठस्याश्रममागत्य साम्प्रार्थ्यं तं स्वकीयां चिन्तां श्रावयामासतुः। वसिष्ठेनाभिहितं यत् तव विश्वम्भरः पुत्रो भविष्यति। तदर्थं त्वया गङ्गासागरयोः सङ्गमस्थले गत्वा वरुणोपासना करणीया। तपसा सर्वं लभ्यते। तपसैव तव पूर्वजो मनुरपि सर्वाः प्रजाः पालयामास। इत्थमुपदिश्य महर्षिर्वसिष्ठः हरिश्चन्द्रदम्पती विसर्जयामास।

व्याख्या—अस्मिन् गद्यखण्डे महर्षिः वसिष्ठो हरिश्चन्द्रदम्पती वक्ति यत्—तत्र=गङ्गासागरसङ्गमस्थले, उपगम्य=सम्प्राप्य, वरुणम्=मम पितरम्, उद्दिश्य=उद्देश्यं कृत्वा, ब्रह्मचर्यव्रतविधानेन=ब्रह्मचर्यव्रतपालनस्य विधिना, आत्मानम्=स्वम्, तस्य=वरुणस्य, प्रसादपात्रम्—प्रसादस्य=प्रसन्नतायाः, 'प्रसादस्तु प्रसन्नता' इत्यमरः, पात्रम्=आस्पदम्, कर्तुम=विधातुम्, अर्हति=योग्योऽस्ति, भवान्=हरिश्चन्द्रः। प्रजाकामः—प्रजायाः=सन्तत्याः, कामना यस्याऽसौ तथाविधः, भवान्=हरिश्चन्द्रः, प्रजापतिरिव=ब्रह्मासदृशः, तपः=तपश्चर्याम्, तपतु=करोतु। हि=यतः, तपसः=तपश्चर्यातः, परम्=श्रेष्ठम्, अन्यत्=भिन्नं वस्तु, किञ्चित्=किमपि, अभ्युदयसोपानम्=कल्याणस्य साधनम्, नास्ति=नहि वर्त्तते। तपसा=तपश्चरणेन, महत्=फलम्, विन्दते=प्राप्नोति, अनुष्ठानकर्ता तपस्वी। तपसा=तपश्चर्यया, सत्त्वम्=सत्त्वगुणः, प्राप्यते=लभ्यते। मनुर्नाम=मनुनामकः, भवतः=तव हरिश्चन्द्रस्य, पूर्वजः=पूर्वपुरुषः, नराधिपः=राजा, ऊर्ध्वबाहुः=उपरि उत्थापितहस्तः, सन्, विशालायाम्=महद्गुणसम्पन्नायाम्, बदर्याम्=बदरिकाश्रमे, एकपादः=एकस्मिन्नेव पादोपरि स्थितः, तीव्रम्=अतिकठिनम्, तपः=तपश्चरणम्, चचार=आचरति स्म। तेन=तथाविधेन, तपसा=तपश्चर्यया, सः=तव पूर्वजो मनुः, युगान्ते=युगस्यान्तिमे काले समुपस्थिते, प्रलयोपप्लुते—प्रलयेन=प्रलयकालेन, उपप्लुते=उपद्रुते, जगति=संसारे, सदेवासुरमानवाः—देवाश्च=देवताश्च, असुराश्च=राक्षसाश्च, मानवाश्च=मनुष्याश्च, तैः सहिताः, सर्वाः=सकलाः, प्रजाः=जीवाः, जगति जनिमन्तः, ससर्ज=सृष्टवान्, इति=एतादृशेन, वचनेन=वाण्या, महामुनिः=महर्षिः, पुत्रसिद्धिम्—पुत्रस्य=आत्मजस्य, सिद्धिम्=प्राप्तिम्, सम्यक्=सम्यग्रूपेण, विश्रम्भय्य=विश्वासयित्वा, तौ=उपर्युक्तौ शैब्याहरिश्चन्द्रौ, दम्पती=जायापती, विसर्जयामास=स्वराजधान्यै प्रस्थापयामास।

(८) गुरौ रोचकविवरणेन······तस्मै स्वागतं व्याजह्रुः ।

सन्दर्भप्रसङ्गौ—अयं गद्यखण्डः सत्यहरिश्चन्द्रोदयनामकस्य गद्यकाव्यस्य द्वितीयप्रकरणात् परिगृहीतो वर्त्तते । यौवनकालपर्यन्तम् अकृतपुत्रमुखदर्शनस्य राज्ञो हरिश्चन्द्रस्य सन्तानविषयिणी महती चिन्ता समभवत् । हरिश्चन्द्रदम्पती वसिष्ठाश्रममाजग्मतुः । वसिष्ठेन महर्षिणाऽभिहितं तव पुत्रो नूनं भविष्यति । तदर्थं त्वया गङ्गासागरसङ्गमे वरुणस्योपासना करणीया । तपसा सर्वमेव साध्यं भवति । गुरुणा पुत्रावाप्तिविषये प्राप्तविश्वासौ हरिश्चन्द्रदम्पती अयोध्यामाजग्मतुः । राजा सर्वं राज्यभारं मन्त्रिणां शैव्यायाश्च कुशलहस्तेषु निक्षिप्य विगतचिन्तः सन् पदातिरेवैकाकी गङ्गासागरसङ्गमस्थलाय प्रतस्थे ।

व्याख्या—गुरोः—वसिष्ठस्य, रोचकविवरणेन=तव पुत्रो नूनं भविष्यतीति ध्यानयोगेनाहं पश्यामि । सर्वे लोकपालाश्चापि तव लोकपालनसमर्थं पुत्रं कामयन्ते । मम पिता वरुणस्त्वयोपासनीयः गङ्गासागरसङ्गमस्थलं गत्वा, इत्येतादृशेन मनोहारिणा विवरणेन । जातसम्यगाशाबन्धः—जातः=समुत्पन्नः, सम्यक् =सम्यग्रूपेण, आशायाः=अभिलाषायाः, बन्धः=बन्धनं, यस्याऽसौ तथाविधः, हरिश्चन्द्रः=अयोध्याधिपतिः, मन्त्रिणाम्=अमात्यानाम्, जानपदमुख्यानाम्—जानपदेषु=प्रकृतिजनेषु नागरेषु, मुख्यानाम्=प्रमुखानां च, अभ्यनुज्ञानेन=स्वीकरणेन, लब्धास्पदानाम्—लब्धानि=प्राप्तानि, आस्पदानि=स्थानानि, यैः ते तेषाम्, अधिकारिणाम्=अधिकारप्राप्तानां पुरुषाणाम्, राज्ञ्याः=महिष्याः, शैव्यायाश्च=स्वपत्न्याः एतन्नाम्न्याः, च कुशलहस्ते=राज्यकार्यसम्पादनदक्षहस्ते, प्रजापालनधुरम्—प्रजानाम्=प्रकृतिजनानाम्, पालनस्य=सम्पोषणस्य, या धूः=भारः, ताम्, निधाय=कृत्वा, स्वयमेव=स्वभावत एव, प्रयतात्मा=नियतेन्द्रियः, पूर्वस्याम्=पूर्वदिशायाम्, गङ्गासागराभिमुखम्=गङ्गासागरयोः सङ्गमाभिमुखम्, सरयूपुलिनप्रकीर्णपथेन—सरय्वाः=एतन्नाम्न्या नद्याः, पुलिनेन=तटेन, प्रकीर्णः=विस्तृतः, यो हि पन्थाः तेन । 'प्रकीर्णकं तुरङ्गमे । चामरे विस्तरे ग्रन्थभेदे' इति हैमः । पादचारेण=पदात्या, तीर्थयात्रायै=तीर्थयात्रां कर्तुम्, प्रतस्थे=प्रस्थितवान् । तस्य=हरिश्चन्द्रस्य, माहात्म्यानुरूपम्=ऐश्वर्यानुकूलम्, प्रतिपदम्=सर्वदा, सुखार्थम्=सुखं प्रदातुम्, सुरभितः=सौगन्ध्ययुक्तः, वायुः=पवनः, सह=साकम्, अवात्=वाति स्म । मधुरम्=श्रुतिमधुरम्, मन्द्रायमाणाः=गर्जनं कुर्वाणाः, नभोगजाः=आकाशहस्तिनः, मेघा

इति यावत्, उपर्युपरि = ऊर्ध्वंभागे, विहरन्तः = सञ्चरणं कुर्वन्तः, छन्नीबभूवुः = क्षयतामगुः । वनवृक्षलताभिः—वनस्य = अरण्यस्य, वृक्षाश्च = पादपाश्च, लताश्च = गुल्माश्च, ताभिः, तस्मै = राज्ञे हरिश्चन्द्राय, यथावश्यकम् = आवश्यकतानुसारेण, सरसम् = रसयुक्तम्, पाथेयम् = मार्गभोजनम्, उपहृतम् = उपहारीं कृतम् । स्थाने स्थाने = तत्र तत्र, मधुपाः = भ्रमराः, मधुझङ्कारैः = मधुरगुञ्जनरवैः, तस्मै = हरिश्चन्द्राय, स्वागतम्, व्याजह्रुः = जगुः ।

(९) हरिश्चन्द्रोऽधियात्रं यत्र तत्र······भूरिशः प्रशशंस ।

सन्दर्भप्रसङ्गौ—अयं गद्यखण्डः सत्यहरिश्चन्द्रोदयनामकस्य गद्यकाव्यस्य द्वितीयप्रकरणात् हरिश्चन्द्रस्य सुन्दरवनयात्रानामकात् परिगृहीतो वर्त्तते । राजा हरिश्चन्द्रः पत्न्या सह वसिष्ठस्याश्रमं गतः सन् बोधितो बभूव यत् पुत्रस्तु तस्यातितेजस्वी नूनं भविष्यति, किन्तु तदर्थं तपश्चरणमावश्यकमास्ते । तदर्थं राजा गङ्गासागरसङ्गमस्थलं गत्वा वरुणस्योपासनामकरोत् । वसिष्ठमहर्षेराज्ञामवाप्य हरिश्चन्द्रो राज्यस्य सर्वं कार्यं मन्त्रिणां शैव्यायाश्च स्वपत्न्याः कुशलहस्ते निधाय एकाकी पदातिरेव तपस्यायै प्रतस्थे । सरय्वाः तटस्य मार्गेण गच्छन् राजा हरिश्चन्द्रः तानि तानि मनोज्ञानि दृश्यान्यवलोकयामास । सरोवरेषु कमलानि विकसितान्यासन्, ग्रामेषु नरा नार्यः बालाः वृद्धाश्च जनाः मोमोदन्ते स्म, उपवनेषु मयूरकोकिलादिकाः पक्षिणः कलरवमकार्षुश्च । तद्दृष्ट्वा राजा प्रमोदस्यानुभवमकार्षीत् ।

व्याख्या—हरिश्चन्द्रः = अयोध्यानरेशः, अधियात्रम् = यात्रायामिति विभक्त्यर्थेऽव्ययीभावसमासः । यत्र तत्र = स्थाने स्थाने, पारिग्रामिकस्थलीषु = ग्रामस्य सविधे विद्यमानासु प्राकृतासु भूमिषु, मृगशावकगोवत्समयूराणाम्— मृगशावकाश्च = हिरणशिशवश्च, गोवत्साश्च, मयूराश्च = बर्हिणश्च, तेषाम्, कमलावासेषु = कमलाकरेषु, जलाशयेषु = सरस्सु, भ्रमरमत्स्यानाम्— भ्रमराणाम् = षट्पदानाम्, मत्स्यानाञ्च = मीनानाञ्च, पुष्पागमनम्रेषु—पुष्पाणाम् = कुसुमानाम्, यो हि आगमः = उत्पत्तिः, तेन नम्रेषु = नतेषु, वृक्षेषु = पादपेषु, चित्रपतङ्गानाम् = अद्भुतानां पक्षिणाम्, दीपसन्निधानेषु—दीपानाम् = प्रदीपानाम्, सन्निधानेषु = सान्निध्येषु, शलभानाम् = दीपकीटविशेषाणाम्, ग्रामोपशल्येषु —ग्रामाणाम् उपशल्येषु = उपान्तेषु, बालवृद्धयूनाम्—बालाश्च = शिशवश्च, वृद्धाश्च = स्थविराश्च, युवानश्च = युवकाश्च, तेषाम्, नृत्तेन = नर्तनेन, उपवनेषु = उद्यानेषु, मञ्जुगायकानाम्—मञ्जु = मनोहरं, गायन्ति ये ते तेषाम्, मयूरशु

कोकिलहंससारसभ्रमराणाम्—मयूराश्च=बर्हिणश्च, शुकाश्च=कीराश्च, कोकिलाश्च=परभृतश्च, हंसाश्च=कलहंसाश्च, सारसाश्च=भारद्वाजपक्षिणश्च, भ्रमराश्च=षट्पदाश्च, तेषाम्, कलरवेण=मधुरध्वनिना, नभसि=आकाशे, घनगर्जनेन—घनानाम्=मेघानाम्, गर्जनेन=स्तनितेन, च सरसीकृतान्=रसयुक्तान् कृतान्, गोसाहस्रीसञ्चारपांसुलान्—गवां साहस्री गोसाहस्री, तस्याः सञ्चारेण=सञ्चरणेन, पांसुलान्=धूलिधूसरितान्, मधुरान्नपानसुरभिप्रदेयशस्यलतावनस्पतिभिः—मधुरम्=मिष्टम्, यत् अन्नम्=भोग्यम्, पानम्=पेयम्, सुरभ्यै=गवे, प्रदेयाः=देयाः, या शस्यलतावनस्पतयः ताभिः, परिहितान्=सम्पन्नान्, निसर्गसङ्गीतिधरान्—निसर्गतः=स्वभावतः, सङ्गीतिम्=सङ्गीतकम्, धरन्ति=धारयन्ति, ये ते तान्, प्रमुदितकृषीवलान्—प्रमुदिताः=प्रहृष्टाः, ये कृषीवलाः=कृषकाः, तान्, निशायाम्=रात्रौ, विद्युद्विन्दुप्रख्यैः—विद्युताम्=तडिताम्, ये विन्दवः, तत् प्रख्यैः=सदृशैः, दृष्टिबन्धुभिः=खद्योतैः, द्योतितान्=प्रकाशितान्, स्वात्मपूर्णान्—स्वेन=आत्मीयेन, आत्मना, पूर्णान्=परिपूर्णान्, जनपदान्=नगरान्, ददर्श=अवलोकयामास, राजा हरिश्चन्द्रः इति सम्बन्धः। स्थाने स्थाने=तत्र तत्र, ग्रामकूटैः=ग्रामसमूहैः, अभिनन्दितः=प्रणमितः, हरिश्चन्द्रः=अयोध्याधिपतिः, खलु=निश्चयेन, एतेषाम्=अत्र समुपलभ्यमानानां जनानाम्, अलङ्कामता=सन्तोषाधिकता, दिव्या=अतिलौकिकी वर्त्तते, इति=इत्यनेन प्रकारेण, विमृश्य=विचार्य, तान्=ग्रामीणान् जनान्, भूरिशः=अतिशयेन, प्रशशंस=श्लाघितवान्।

(१०) अन्यत्र हरिश्चन्द्रेण····· तटीयनगराणि विभावितानि।

सन्दर्भप्रसङ्गौ—अयं गद्यखण्डः सत्यहरिश्चन्द्रोदयनामकस्य गद्यकाव्यस्य द्वितीयप्रकरणात् परिगृहीतो वर्त्तते। अपत्येन रहितो राजा महर्षिणाऽऽदिष्टोऽभूत् यद् गङ्गासागरसङ्गमस्थलं गत्वा वरुणं तपश्चरणेन तोषयितुम्। महर्षेः वचनात् विस्रब्धो राजा हरिश्चन्द्रो राज्यस्य भारं स्वपत्न्याः शैव्यायाः मन्त्रिणां च कुशलहस्ते निधायैकाकी सन् पदातिरेव तीर्थयात्रायै प्रतस्थे। मध्येमार्गं तानि—तानि वस्तूनि विलोक्य हर्षप्रकर्षमनुभवति स्म। आनर्तेषु च अभ्रङ्कषाणि तटीयनगराण्यप्यवलोकयामास राजा हरिश्चन्द्रः।

व्याख्या—अन्यत्र=अन्यस्मिन् स्थाने, हरिश्चन्द्रेण=अयोध्याधिपतिना, शिल्पशास्त्रादिविज्ञानविपुलीकृतभोज्यपेयपरिधानवासविलाससाधनानि—शिल्प-

शास्त्रादेः=वास्तुशास्त्रप्रभृतेः, विज्ञानेन=विशिष्टेन ज्ञानेन, विपुलीकृतानि =बहुलीकृतानि, यानि भोज्यानि=भोग्यानि वस्तूनि, पेयानि=पातु योग्यानि वस्तूनि, परिधानस्य=अधोंऽशुकस्य, वासस्य=निवासस्य, विलासस्य च साधनानि येषु तथाभूतानि, चतुष्षष्टिकलानिलयानि=चतुष्षष्टिसंख्याकानां कलानां, निलयानि=आश्रयभूतानि यानि तानि, पताकाभिः=ध्वजैः, दूरदूरतर प्रदेशेभ्यः=विप्रकृष्टतरप्रदेशेभ्यः, दर्शकान्=अवलोकयितॄन्, निमन्त्रयमाणानि=आह्वयमाणानि, आनर्तेषु=आनर्तप्रदेशेषु, दिवारात्रम्=अहोरात्रम् नाट्योल्लसितलास्यरागरञ्जितानि—नाट्येन=अभिनयेन, उल्लसितौ=समलङ्कृतौ, यौ लास्यरागौ—लास्यम्=नृत्यम्, रागः=स्वरविशेषः, ताभ्यां रञ्जितानि=समलङ्कृतानि, लोकोत्तरपण्यार्पणापणसम्पूरितकाम्यानि—लोकोत्तराणि=अतिलौकिकानि, यानि पण्यानि=विक्रेयाणि, तेषाम् अर्पणाय =समर्पणाय, कृतानि यानि आपणानि=हाटकानि, तैः सम्पूरितानि=परिपूरितानि, काम्यानि=काम्यवस्तूनि, यैस्तानि, सरयूजले—सरय्वाः जले=तोये, दूरतोऽपि=विप्रकृष्टादपि, विगाह्यमानाभ्रङ्कषप्रासादच्छायाचित्राणि—विगाह्यमानानि=अवगाह्यमानानि, अभ्रङ्कषाणाम्=गगनचुम्बिनाम्, प्रासादानाम्=भवनानाम्, छायायाः=प्रतिबिम्बस्य, चित्राणि येषु तानि, तटीयनगराणि—तटीयानि=तटे विद्यमानानि, यानि नगराणि तानि, विभावितानि=अवलोकितानि।

(११) मनसा पूर्वतः सुचिरं……वरुणालयो विरराज।

सन्दर्भप्रसङ्गौ—अयं गद्यखण्डः सत्यहरिश्चन्द्रोदयनामकस्य गद्यकाव्यस्य द्वितीयप्रकरणात् परिगृहीतो वर्त्तते। अनपत्यो राजा हरिश्चन्द्रः पुत्रावाप्तये महर्षे वसिष्ठस्याश्रमं जगाम। हरिश्चन्द्रदम्पतीभ्यां प्रार्थितो महर्षिः प्राह यत्ते नूनं विश्वम्भरः पुत्रो भविष्यतीति ध्यानयोगेनाहं पश्यामि। किन्तु तथाविधस्य पुत्रस्यावाप्तये भवान् गङ्गासागरं तीर्थं गत्वा वरुणस्य प्रसन्नतायै तपस्तपतु। महर्षिणा आदिष्टो राजा अयोध्याया राज्यभारं मन्त्रिषु शैव्यायां च निधाय पदातिरेवाययौ विभिन्नानि मनोज्ञानि दृश्यानि, नगराणि वनानि चावलोकयन् गङ्गासागरसङ्गमम्। तस्य मनसि इच्छा समजायत यत् सपद्येव तीर्थं गङ्गासागरं गत्वाहं वरुणस्योपासनां कुर्यामिति। सः शीघ्रमेव रत्नाकरमभि रत्नाकरमवलोक्य प्रहृष्टो बभूव।

व्याख्या—मनसा=अन्तःकरणेन द्वारा, पूर्वतः=पूर्वस्यामाशायाम्

सुचिरम्=दीर्घेण कालेन, वरुणोपसदनम्=वरुणस्य आलयस्य सविधे, प्रतिपन्नः= समागतः, गङ्गातः=भागीरथ्याः, प्रतिपदम्=पदं पदमिति, स्वाभाविकशक्तिम्–स्वाभाविकीम्=नैसर्गिकीम्, शक्तिम्=बलम्, समवाप्य=सम्प्राप्य, अचिरात्= शीघ्रमेव, सः=राजा हरिश्चन्द्रः, लौकिकविभूतिसम्पन्नः—लौकिक्या, विभूत्या= ऐश्वर्येण, सम्पन्नः=युक्तः सन्, विकीर्णशुक्तिमौक्तिकरत्नजालोद्भासितपुलिनम्—विकीर्णानि=प्रसमराणि, शुक्तयः मौक्तिकानि च शुक्तिमौक्तिकानि, तान्येव रत्नानि, तेषां जालेन=समूहेन, उद्भासितम्=देदीप्यमानं, पुलिनम्=तटम्, यस्याऽसौ तथाविधम्, गङ्गासागरप्रदेशम्=गङ्गासागरनामकं तीर्थस्थलम्, उपगतः=सम्प्राप्तवान्, तत्र=गङ्गासागरप्रदेशे, द्वीपम्=अन्तरीपम्, 'द्वीपोऽस्त्रियामन्तरीपं यदन्तर्वारिणस्तटम्'। इत्यमरः। परितः=सर्वतः, सर्वान्= निखिलान्, भूखण्डान्=पृथिव्याः भागान्, महाद्वीपांश्च=महान्तरीपांश्च, क्रोडीकुर्वन्=स्वान्तःसम्पादयन्, भुवस्स्वर्लोकौ—भुवर्लोकं स्वर्लोकं च, आत्मनि= स्वस्मिन्, छायामध्यमतया=प्रतिबिम्बमध्ये विराजमानतया, समाकलयन्, तालतरङ्गबाहुभिः—तालाः=उत्तालाः, ये तरङ्गाः=वीचयः, एव बाहवः= भुजाः, तैः, अभ्यागतान्=समागतान् जनान्, अभ्युपगच्छन्=स्वीकुर्वन्, देवेभ्यः=सुरेभ्यः, रत्नानाम्=मुक्तादिकानां मण्यादिकानाञ्च, 'रत्नं मणिर्द्वयोरश्मजातौ मुक्तादिकेऽपि च' इत्यमरः। निःशेषम्=सकलम्, समर्पणेन=प्रत्यर्पणेन द्वारा, आत्मनः=स्वस्य, रत्ननिधित्वम्=रत्नाकरत्वम्, सार्थयन्= सार्थकं कुर्वन्, मेचकमेदुरमेघदूतैः—मेचकाः=कृष्णवर्णाः, मेदुराः=मनोहराः, मेघाः=जलदाः, एव दूताः=सन्देशहराः, तैः, पयोराशिम्—पयसः=जलस्य, राशिम्=समूहम्, वितीर्य=वितरितं कृत्वा, लोकान्=जनान्, आप्याययन्= सन्तुष्टान् कुर्वन्, वेलावनानाम्—वेलायाः=तटस्य, वनानाम्=अरण्यानाम्, आम्रकदलीनारिकेललवङ्गैलादिभिः—आम्रश्च=चूतश्च, कदली च=रम्भा च, नारिकेलश्च=लाङ्गली च, लवङ्गश्च=देवकुसुमश्च, 'लवङ्गं देवकुसुमं श्रीसंज्ञम्' इत्यमरः, एला च=पृथ्वीका च, 'पृथ्वीका चन्द्रबालैला निष्कुटिः बहुला' इत्यमरः। त एवादौ येषां तैः फलैः, उपसदनप्रवासिनः=सदनस्य प्रविधे निवासिनो जनान् धारयन्, वरुणालयः=समुद्रः, विरराज=शोभते स्म।

(१२) हरिश्चन्द्रः पुरो ब्रह्मघोष·····महार्णवं ददर्श।

सन्दर्भप्रसङ्गौ—अयं गद्यखण्डः सत्यहरिश्चन्द्रोदयनामकस्य गद्यकाव्यस्य

द्वितीयप्रकरणात् परिगृहीतो वर्त्तते। राजा हरिश्चन्द्रः पुत्रावाप्तिकामनया स्वकुलगुरोः वसिष्ठस्याश्रमं गत्वा सम्प्रार्थ्य चावगतवान् यत् सः तदैव पुत्रं विश्वम्भरं लप्स्यते यदा सः गङ्गासागरसङ्गमस्थलं गत्वा तीव्रेण तपसा वरुणं सन्तोषयिष्यति। वसिष्ठस्य वचांसि निशम्य राजा राज्यस्य भारं मन्त्रिषु निधाय पदातिरेव गङ्गासागरायैकाकी प्रतस्थे। मध्येमार्गं विभिन्नानि दृश्यान्यवलोकयन् राजा गङ्गासागरं जगाम। तत्र सः समुद्रमतीवोत्तालतरङ्गैर्व्याकुलमवलोक्य हर्षप्रकर्षमनुबभूव।

व्याख्या—हरिश्चन्द्रः=अयोध्याधिपः, पुरः=समक्षमेव, ब्रह्मघोषवन्तम्=वेदघोषसमन्वितम्, अमृतस्याकरम्—अमृतस्य=पीयूषस्य, आकरम्=निधानम्, निशामुखे=सायंकाले, प्रचलितवीचिभिः—प्रचलिताभिः=अतीवचञ्चलाभिः, वीचिभिः=तरङ्गैः द्वारा, नृत्यन्तम्=नर्तनं कुर्वन्तम्, फेनोघैः—फेनस्य=डिण्डीरस्य, ओघैः=समूहैः, हसन्तम्=हासं कुर्वन्तम्, चन्द्रोदये=चन्द्रमसः उदये सञ्जाते, स्वपुत्रः=स्वात्मजम्, चन्द्रमा समुद्रादुद्बभूवेति पौराणिकी प्रसिद्धिः, निशानाथम्—निशायाः=विभावर्याः, नाथम्=स्वामिनं जीवितेशं वा, उत्तालतरङ्गहस्तैः—उत्तालाः=अत्युन्नताः, तरङ्गाः=वीचयः, एव हस्ताः=बाहवः, तैः उपगूहितुकामम्—उपगूहनम्=आलिङ्गनं कर्तुम्, कामः=कामना, यस्याऽसौ तथाविधम्, उत्पतन्निपतत्प्रहृष्टजलराशिना—उत्पतन्=उपरिगच्छन्, निपतन्=नीचैर्गच्छन्, प्रहृष्टः=प्रकृष्टेन हर्षेण समन्वितः, यो हि जलस्य=तोयस्य, राशिः=समूहः, तेन, अम्बरनिर्विशेषम्—अम्बरेण=आकाशेन, निर्विशेषम्=सदृशम्, आकाशसमुद्रजलयोः नीलवर्णत्वात् तयोः साम्यं विवक्षितमत्र तारारत्नसमाकुलम्—ताराः=नक्षत्राणि, एव रत्नानि=माणिक्यानि, तारारत्नयोः समानरूपेण देदीप्यमानत्वात्, तैः, समाकुलम्=परिव्याप्तम्, भेरीसंहतिरिव—भेरीणाम्=वाद्यविशेषाणाम्, या हि संहतिः=समूहस्तैः इव, परस्परम्=मिथः, आहतोर्मिभिः, विश्वव्यापिदिग्विजयम्—विश्वम्=अखिलं जगत्, व्याप्नोति योऽसौ तथाविधम्, दिग्विजयम्, नादयन्तम्=श्रावयन्तम्, महार्णवम्=महासमुद्रम्, ददर्श=अवलोकयामास।

(१३) तत्र गङ्गासमुद्रयोर्मध्ये·····नितरां क्षेमः प्राभवत्।

सन्दर्भप्रसङ्गौ—अयं गद्यखण्डः सत्यहरिश्चन्द्रोदयनामकस्य गद्यखण्डस्य द्वितीयप्रकरणात् परिगृहीतो वर्त्तते। अनपत्यो राजा हरिश्चन्द्रः कुलगुरुणा वसिष्ठेनादिष्टः सन् वरुणमुपासितुं राज्यभारं मन्त्रिषु शैब्यायां च निधाय

तीर्थयात्रायै प्रस्थितः सन् पदातिरेव गङ्गासागरसङ्गमस्थलमाययौ। विलोक्य चोत्तालतरङ्गसमाकुलं रत्नाकरं महार्णवं हर्षप्रकर्षमनुबभूव। तत्र गङ्गासमुद्रयोर्मध्ये विद्यमानविविधवृक्षलतासमन्वितं पुष्पफलैरचितं शुकसारिकादिपक्षिकुलनिनादितमन्वर्थसंज्ञं सुन्दरवनं विलोक्य तत्रैव स्थितः सन् सुचिरं तीव्रं तपस्तेपे महाराजो हरिश्चन्द्र इति वर्णयति गद्यखण्डेऽस्मिन् लेखकः।

व्याख्या—तत्र=गङ्गासागरक्षेत्रे, गङ्गासमुद्रयोर्मध्ये=जाह्नवीसागरयोरन्तराले, सम्भृतामूल्यनिधिसन्निधानमिव—सम्भृतानाम्=सङ्गृहीतानाम्, अमूल्यानाम्=अनर्घ्यानाम्, निधीनाम्=धनविशेषाणाम्, सन्निधानमिव=समष्टिमिव, एकम्=किमपि, सुन्दरवनम्=सुन्दराभिधानमरण्यम्, पुष्पिताग्राभिः—पुष्पितः=कुसुमितः, अग्रः=अग्रभागः, यासां ताभिः, लताभिः=व्रततिभिः, अचितम्=परिपूर्णम्, विरराज=शोभते स्म। कोकिलकुलकूजिते—कोकिलानाम्=परभृतानाम्, कुलेन=समूहेन, कूजिते=निनादिते, अस्मिन्=एतस्मिन्, वने=अरण्ये, वनस्पतिलतावृन्दानाम्—वनस्पतीनाम्=वनस्य वृक्षविशेषाणाम्, लतानाम्=व्रततीनाम्, यानि वृन्दानि=समूहाः, तेषाम्, अभिस्फुरितपत्रपुष्पफलसमृद्धिभिः—अभिस्फुरिताः=प्रस्फुरिताः, याः पत्रानाम्=दलानाम्, पुष्पाणाम्=कुसुमानाम्, फलानां समृद्धयः, ताभिः, सम्पोष्यमाणाः=परिपाल्यमानाः, आ मृगेश्वरम्=सिंहपर्यन्तम्, आ पिपीलिकम्=पिपीलिकापर्यन्तञ्च, वनौकसः=वनमेवोको येषां ते तथाभूताः, मुनिजनानाम्=तपस्विनाम्, यमनियमैः=योगदर्शनोक्तैर्योगाङ्गभूतैः बाह्याभ्यन्तरेन्द्रियाणां विषयेभ्यो नियमनस्वरूपैः, प्रभाविताः=प्रभावैरभिभूताः, अत एव परित्यक्तस्व-स्वस्वभावाः, परस्परम्=मिथः, मैत्रीम्=मित्रताम्, आचरन्तः, स्वस्वगुणनिचयैः—स्वानां स्वानां गुणानां निचयैः=समूहैः, भूयिष्ठम्=अत्यधिकम्, सौहार्दसौरभम्—सौहार्दस्य=सुहृद्वतायाः, भावस्य सौरभम्=सौगन्ध्यम्, जनयामासुः=उत्पादयामासुः। तत्र=सुन्दरवने, सुवर्णवृक्षराजस्य=कनकपादपराजस्य, अधस्तात्=अधोभागे, कस्मिश्चित्=एकस्मिन्, निवाते=निर्जने, अन्तरायरहिते च, कुञ्जकुटीरे=लतामण्डपे, हरिश्चन्द्रः=अयोध्याधिपतिः, तपोव्रतानुरूपम्—तपः=तपश्चरणमेव व्रतम्, तस्यानुरूपम्=अनुकूलम्, आसनबन्धधीरम्=उपवेशने धीरं स्थितम्, उपविष्टम् सन्तमित्यर्थः, समाधिमास्थाय=योगस्य चरमामवस्थामास्थाय मनसः समाहितिस्वरूपाम्, आत्मानम्=स्वम्, निवेशयामास=तैलधारावदविच्छिन्नसन्तानेन द्वारा ध्येयस्य स्वरूपं चिन्तयामास। तदा=हरिश्चन्द्रस्य

तपश्चर्याकाले, सुन्दरीतरुमण्डितम्—सुन्दर्यभिधानेन तरुणा=वृक्षेण, मण्डितम्=समलङ्कृतम्, सुन्दरवनं तु बद्धपल्लवपुटाञ्जलिद्रुमम्—पल्लवानाम्=दलानाम्, पुटेन रचितोऽञ्जलिः—बद्धः=रचितः, पल्लवपुटाञ्जलिः, बद्धपल्लवपुटाञ्जलिः, द्रुमाः=वृक्षाः, यस्याऽसौ तथाविधं बद्धपल्लवपुटाञ्जलिद्रुमम्, सुदर्शनोन्मुखमृगम्—सुष्ठूनि दर्शने नेत्रे यस्याऽसौ तथाविधेन, उन्मुखेन=अभिमुखेन, मृगेण युतं सुदर्शनोन्मुखमृगम्. तपोवनम्=तपसः आश्रमः, समजायत=समभवत् । तत्र=सुन्दरवने, वनदेवतानियोगेन—वनस्य=अरण्यस्य, देवतायाः=अधिष्ठातृदेवतायाः, नियोगेन=आदेशेन, सञ्चरन्तः=सञ्चरणं कुर्वन्तः, मेघाः=जलदाः, वनगजाश्च—वनस्य=अरण्यस्य, गजाश्च=हस्तिनश्च, परस्परम्=मिथः, मन्द्रैः=गम्भीरैः, प्रतिडम्बरैः=प्रतिघोषैः, तम्=तपोवनम्, तपःसाधनेन=तपस्याकरणेन, आत्मजयेन—आत्मनः जयेन=मनोवशीकरणेन च, वर्धापयामासुः=समृद्धमकार्षुः । तत्र=सुन्दरवने हरिश्चन्द्रे, तपसि=तपश्चर्यायां, संस्थिते=संलग्ने, प्राणिजातस्य=जीवसमूहस्य, नितराम्=अतिशयेन, क्षेमः=कल्याणम्, प्राभवत्=समभवत् ।

(१४) ऊर्ध्वबाहुर्जितेन्द्रियः……तमभिषिच्योपातिष्ठन्त ।

सन्दर्भप्रसङ्गौ—अयं गद्यखण्डः सत्यहरिश्चन्द्रोदयनामकस्य गद्यकाव्यस्य तृतीयप्रकरणात् परिगृहीतो वर्त्तते । महर्षेः वसिष्ठस्याज्ञया विश्वम्भरपुत्रलाभाय वरुणमुपासितुं राजा हरिश्चन्द्रो गङ्गासागरसङ्गमस्थलमागम्य, प्रकृतिमनोज्ञे पुष्पैः फलैश्च परिपूर्णे सुन्दरवने स्थितः सन् तपश्चर्यापरायणो बभूव । तपसि स्थितो राजा उपरि बाहूत्थाय जितेन्द्रियः सन् सावधानेन मनसा मन्त्रं जपन् वरुणस्य ध्यानमकरोत् । हरिश्चन्द्रस्य तपश्चरणकाले सुन्दरवनं निसर्गसुन्दरं बभूव ।

व्याख्या—ऊर्ध्वबाहुः—ऊर्ध्वौ=उपर्युत्थापितौ, बाहू यस्याऽसौ तथाविधः, जितेन्द्रियः—जितानि=स्वायत्तीकृतानि, इन्द्रियाणि=करणानि, येनाऽसौ तथाविधः, पञ्चतपा=पञ्चधा तपति य असौ तथाविधः, आत्मेश्वरः—आत्मनः=स्वस्य, ईश्वरः=नियामकः, सूर्यवंशोद्भवः—सूर्यवंशे उद्भवः=उत्पत्तिर्यस्यासौ, हरिश्चन्द्रः=एतन्नामा नृपतिः, शाश्वतमहातपसः—शाश्वतम्=निरन्तरम्, चेदं महातपः=महती तपस्या, तस्य, सूर्यात्=रवेः, व्रतस्य=व्रतपालनस्य, परमादर्शः—परमश्चाऽसौ आदर्शः, तं परमादर्शम्=सर्वोत्कृष्टा-

नुकरणीयताम्, गृह्णन्=स्वीकुर्वन्, सूर्यनिविष्टदृष्टिः—सूर्ये=भास्करे, निविष्टा=सन्निवेशिता, दृष्टी=नेत्रे, येनाऽसौ तथाविधः, नैकवर्षः=अनेकवर्षपर्यन्तम्, नित्याभियुक्तः—नित्यम्=सततम्, अभियुक्तः=तपश्चर्याकर्मणि व्यापृतः, अनिविशमानः=स्वव्यापारात् कदापि नह्युपरतः, वरुणम्=जलाधिष्ठातृदेवम्, स्मरन्=स्मरणं कुर्वन्, जपन्=तस्य मन्त्रस्य जपं कुर्वन्, ध्यायंश्च=किञ्च ध्यायन्, तैलधारावदविच्छिन्नस्मृतिसन्तानेन द्वारा ध्येयस्य स्वरूपं चिन्तयन्, उवास=निवसति स्म सुन्दरे वने। योगप्रभावेण=यमनियमासनप्राणायामधारणाध्यानसमाध्यात्मकस्याष्टाङ्गात्मकस्य योगस्य माहात्म्येन, शरीरपोषणतत्त्वाधिगमात्—शरीरस्य देहस्य, पोषणानि=संरक्षकाणि, यानि तत्त्वानि, तेषाम् अधिगमात्=प्रापणात्. तस्मै=हरिश्चन्द्राय, अभ्यवहारः=भोजनम्, नापेक्षितः—अपेक्षितः=आवश्यकः, नासीत्, तथापि=अथापि, तत्रत्यातिथेयाः—तत्रत्याः=सुन्दवनस्थाः, आतिथेयाः=अतिथिसेवाकारकाः, वृक्षलतादयः=पादपगुल्मादयः, प्रत्यग्राणि=नवीनानि, बहुविधानि=अनेकप्रकारकाणि, सुस्वादूनि=सुस्वादयुक्तानि, सुगन्धीनि=सौगन्ध्ययुक्तानि, च फलानि, स्वशाखाः=आत्मशाखाः, आवर्ज्य=अवगमय्य, तस्य=हरिश्चन्द्रस्य, उपान्ते=सविधे, न्यसृजन्=अवस्थापयामासुः, तेन=हरिश्चन्द्रेण, जलम्=तोयम्, न=नहि, पीतम्=पानं कृतम्, तथापि=अथापि, मेघाः=जलदाः, मन्दं मन्दम्=शनैः शनैः, चरन्तः=सञ्चरणं कुर्वन्तः, वारिसीकरैः=वर्षपृषतीभिः, तम्=हरिश्चन्द्रम्, अभिषिच्य=सेचयित्वा, उपतिष्ठन्ति स्म=तत्रोपस्थिता अभूवन्।

(१५) कालान्तरेण हरिश्चन्द्रो······सम्यगनुष्ठितमेव।

सन्दर्भप्रसङ्गौ—राजा हरिश्चन्द्रो नैजमनपत्यतादोषमपाकर्तुं महर्षिं वसिष्ठं प्रार्थयामास। वसिष्ठेनाभिहितं यत् ते पुत्रो महाप्रभावो भविता, किन्तु तदर्थं त्वया वरुण उपासनीयः। वसिष्ठस्यादेशं निशम्य राजा वरुणमुपासितुं गङ्गासागरसङ्गमस्थलमागम्य सुन्दरवने स्थितः सन् नैकवर्षं यावत् कठिनं तपश्चचार। तेन प्रसन्नो वरुणो हरिश्चन्द्रस्य समक्षमुपस्थितो बभूव पुत्रप्राप्तेः वरदानं दातुम्। ददौ च तस्मै पुत्रप्राप्तेः वरदानम्।

व्याख्या—कालान्तरेण=कस्मिंश्चित्काले व्यतीते, हरिश्चन्द्रः=अयोध्याधिपतिः, हृदि=हृदये, सन्निविष्टम्=प्रविष्टम्, ऋद्धिमताम्=समृद्धिसम्पन्नानां,

वरेण्यम्=श्रेष्ठम्, तपोनिष्पत्त्या=तपसः प्राप्तेः, परम्=अतिशयेन, प्रीतम्=प्रसन्नतां गतम्, प्रसन्नवदनम्—प्रसन्नम्=प्रसादप्राप्तं, वदनम्=मुखम्, यस्याऽसं तथाविधम्, सौम्यम्=द्रष्टुं मनोहरम् लावण्यामृतधाराभिः—लावण्यम्=सौन्दर्यमेवामृतम्=पीयूषम्, तस्य धाराभिः=स्रोतोभिः, प्रजाः=सर्वान् जनान् तर्पयन्तम्=तृप्तान् कुर्वन्तम्, सृष्टिसंहारकर्तारम्=सृष्टेः संहारस्य कर्तारम् अपरम्=द्वितीयम्, नारायणमिव=परमात्मानमिव, नारायणस्यैव ब्रह्मशब्देनाभि श्रुतिभिरभिधानकारणात्, कारणवादिनीनां श्रुतीनां नारायणस्य परदेवतात्वेन प्रतिपादनात्, 'यतो वा इमानि भूतानि येन जातानि जीवति, यत्प्रयन्त्यभि संविशन्ती'ति श्रुत्या तस्यैवाखिलजगतः कारणत्वप्रतिपादनाच्च, तमिव वरुणम् =जलाधिष्ठातृदेवताम्, समक्षम्=समक्षमुपस्थितम्, ददर्श=अवलोकयामास। सः=राजा हरिश्चन्द्रः, गन्धपुष्पाद्यैः=पूजनोपचारैः, तम्=समक्षं समागतम् अभीष्टदेवम्=अभिप्रेतां देवताम्, अभ्यर्च्य=पूजयित्वा, भवतः=तव वरुणस्य, नियोगस्य=आदेशस्य, सोत्साहम्=उत्साहपूर्वकम्, निष्पादनेन=सम्पादनेन द्वारा, आत्मानम्=स्वम्, परितोषयितुम्=सन्तोषयितुम्, समीहे=कामयेहम्। इति=इत्यनेन प्रकारेण, पुटाञ्जलिः=बद्धाञ्जलिः, सन् प्रार्थयाञ्चक्रे। वरुणः=जलेशः, साशीर्मना:=आशीर्वादयुक्तेन मनसा, तस्मै=राज्ञे, स्वमनोगतम्=स्वमनसि स्थितम्, उवाच=अवोचत्। राजन्=महाराज! अधुना=इदानीम्, त्वम्=भवान्, पितृपरायणः=पितृगणसेवासंलग्नोऽसि। सम्यक्=सम्यग्रीत्या, पुत्रकामोऽसि=पुत्रस्य कामना यस्याऽसौ तथाविधोऽसि, इति=इत्येतत्, सर्वेषाम्=निखिलानाम्, लोकपालानां=लोकपालत्वेन प्रख्यातानां देवानाम्, विदितमेव=प्रज्ञातमेव। तव=भवतः, पुत्रः=आत्मजः, अनन्यसाध्ये=नान्येन साधनेन समुपलभ्यः, देवानामपि=देवतानामपि, कार्यभरम्=कार्यस्य समूहम्, सम्पादयेत्=कुर्यात्, इति=इत्यनेन प्रकारेण, मनसि=अन्तःकरणे, कृत्वा, तैः=देवैः, रोधोपहितः—रोधेन=अवरोधकेन, उपहितः=आच्छन्नः, तव=भवतः, पुत्रोदयः=पुत्रोत्पत्तिः, व्यधायि=कृता। अतपसाम्=तपोविरहितानाम्, महती=गुर्वी, सिद्धिः=सिद्धेः प्राप्तिः, न=नहि भवति। अत एव=एतस्मादेव कारणात्, तव=भवतो हरिश्चन्द्रस्य, पुत्रोदये=पुत्रस्य जन्मनि, केवलम्=मात्रम् युष्मदीयम्=युष्माकम, एव, न=नहि, अपि तु=किन्तु, प्रजानाम्=प्रकृतिजनानाम्, देवर्षीणाञ्च=देवतानामृषीणां च, यथाकालम्=समयानुसारे सञ्जातम्, तपश्चरणम्=तपस्याकरणम्, अनुबद्धम्=संलग्नमेव। तत्तु=तप-

श्चरणं तु, सम्प्रति=साम्प्रतम्, त्वया=भवता हरिश्चन्द्रेण, स्वयम्=आत्मनैव, सम्यग्रूपेण, अनुष्ठितम्=कृतम् एव ।

(१६) अद्यावधिचरितेन······समावर्तयिष्यामीति ।

सन्दर्भप्रसङ्गौ—गद्यखण्डोऽयं सत्यहरिश्चन्द्रोदयनामकस्य गद्यकाव्यस्य वरप्राप्तिनामकात् तृतीयप्रकरणात् परिगृहीतो वर्त्तते । राजा हरिश्चन्द्रः पुत्रप्राप्तये महर्षिं वसिष्ठं प्रार्थयामास । वसिष्ठेन महर्षिणाऽऽदिष्टं यत् त्वया पुत्रावाप्तये महत् तपः करणीयम् । वरुणे प्रसन्ने सति तव पुत्रो भविष्यति । राजा हरिश्चन्द्रो गङ्गासागरयोः सङ्गमस्थले सुन्दरवने आगत्य कठिनं तपश्चचार नियमेन सात्त्विकतया च । प्रसन्नो वरुणो तस्मै पुत्रप्राप्तेर्वरमदात् । पुनस्तेनाऽभिहितं यत् तव पुत्रस्य लोकपालकयोग्यतायै उपनयनानन्तरं सर्वप्रथमं वरुणालये आनयनमावश्यकमास्ते, तं सम्यक् शिक्षितं विधायाहं यथाकालं समावर्तयिष्यामीति ।

व्याख्या—अत्र वरुणो वक्ति राजानं हरिश्चन्द्रं प्रति—अद्यावधिचरितेन=इदानीं यावत्कृतेन, सात्त्विकतपसा—सात्त्विकेन तपसा=तपश्चर्यया, तव=भवतः, सर्वातिशायिनी=सर्वोत्कृष्टा, आत्मगुणसम्पत्तिः—आत्मनः गुणाः=शौर्यवीर्यपराक्रमार्जवमार्दवादिकाः गुणाः, एव सम्पत्तिः=सम्पत्स्वरूपाः, सहस्रगुणम्=सहस्रकृत्वः, समुत्कर्षिता=सम्यगुत्कर्षप्राप्ता, वर्धते=एधतेतराम् । ताञ्च=आत्मगुणसम्पत्तिं सहस्रगुणं संवर्द्धिताम्, आत्मा वै जायते पुत्रः=आत्मा एव पत्न्यां पुत्ररूपेणोत्पद्यते, इति=इत्यनेन, न्यायेन=नियमेन, परम्परया=परम्परातः, पित्र्यम्=पितृसम्बधि, रिक्थम्=सम्पदिव, तव=भवतो हरिश्चन्द्रस्य, पुत्रः=आत्मजः, अधिकरिष्यति=लप्स्यते । तपःसमाधिप्रपन्नब्रह्मशक्तेः—तपसा समाधिना च प्रपन्ना=प्राप्ता, ब्रह्मणः शक्तिर्येनाऽसौ तथाविधस्य, पितुः=जनकस्य, पुत्रः=आत्मजः, लोकोत्थानसमर्थः=जगतः कल्याणकरणे क्षमः, भविता=भविष्यतीति, सर्वेषाम्=निखिलानाम्, लोकपालानाम्=देवानाम्, सम्प्रतिपत्तिः=निश्चय एव, मम=वरुणस्य, मुखेन=आननेन, तुभ्यम्=हरिश्चन्द्राय, वरम्=वरदानम्, प्रहितः=प्रदत्तः, तथापि=पुनरपि, सर्वार्थदर्शिनः—सर्वान्=अखिलान्, अर्थान्=प्रयोजनानि, पश्यन्ति=जानन्ति, ये ते तथाविधाः, देवाः=सुराः, एतावता=एतावन्मात्रेण, न=नहि, परितुष्टाः=सन्तुष्टाः सन्ति । तव=हरिश्चन्द्रस्य, पुत्रस्य=भावनोऽऽत्मजस्य, वरुणकुले—वरुणस्य=मम, कुले=गुरुकुले, समुन्नयनम्=आनयनम्, प्रथम-

पदे = सर्वप्रथमम्, आवश्यकम् = अनिवार्यम्, मन्यन्ते = स्वीकुर्वन्ति । एतदर्थम् = एतस्मादेव हेतोः, शिष्यवृत्त्या = अन्तेवासिनः व्यवहारेण, मम = वरुणस्य, अन्तेवासित्वम् = छात्रत्वम्, प्रापयितुम् = समुन्नेतुम्, सः = तव भाविपुत्रः, उपनयनकाले = यज्ञोपवीतसंस्कारावसरे, त्वया = हरिश्चन्द्रेण, समर्पणीयः = मह्यं प्रदेयः । तम् = तव भाविनं पुत्रम्, वरुणालयप्रवेशे, शाश्वतीम् = सार्वकालिकीम्, विश्वोत्थानयोग्यताम् — विश्वस्य = सम्पूर्णस्य जगतः, उत्थानस्य = उत्कर्षस्य, योग्यताम् = अर्हताम्, प्रभुत्वम् = स्वामित्वञ्च, उपहृत्य = आनीय, यथाकालम् = समयानुसारेण, समावर्तयिष्यामि = समावर्तनसंस्कारं सम्पादयिष्यामि ।

(१७) वरुणस्यामृतायमानममोघं……सहर्षं प्रतस्थाते ।

सन्दर्भप्रसङ्गौ—गद्यखण्डोऽयं सत्यहरिश्चन्द्रोदयनामकस्य गद्यकाव्यस्य तृतीयप्रकरणात् परिगृहीतो वर्त्तते । राजा हरिश्चन्द्रः महर्षेः वसिष्ठस्याज्ञया वरुणं प्रसादयितुं गङ्गासागरसङ्गमस्थलमागम्य, पुत्रावाप्तये कठिनं तपश्चरित्वा वरुणं प्रसादयामास । प्रसन्नो वरुणः तस्मै पुत्रप्राप्तेर्वरदानमदात् । तेनाभिहितं यत् उपनयनकाले त्वया सः पुत्रः मह्यं समर्पणीयः । अहं तं सुशिक्षितं प्रभुत्वसम्पन्नं च विधाय यथाकालं समावर्तयिष्यामि । वरुणस्यामृतोपमं वचो निशम्य राजा एवमेवास्त्वित्यभिधाय हर्षप्रकर्षमनुभवन्नयोध्यायै प्रतस्थे ।

व्याख्या—वरुणस्य = जलेशस्य, अमृतायमानम् = पीयूषमिवातिसन्तोषप्रदम्, अमोघम् = सत्यं, वचः = वचनम्, निशम्य = श्रुत्वा, लब्धप्रसादः—लब्धः = प्राप्तः, प्रसादः = प्रसन्नता, येनाऽसौ तथाविधः, पुत्रसम्पत्तिरसाविष्टः—पुत्रस्य = आत्मजस्य, सम्पत्तिः = प्राप्तिः, तज्जन्यः यो हि रसः = आनन्दः, तेनाविष्टः = आवेशयुक्तः, हरिश्चन्द्रः = अयोध्याधिपतिः, तस्य = वरुणस्य, प्रस्तावस्य = पणस्य, अनुष्ठानस्य = सम्पादनस्य, असौकर्यम् = काठिन्यम्, अविमृशन्निव = अविचारयन्निव, एवमस्तु = यथा भवानादिशति तथैव भवतु, इति = इति वचसा, सत्यापितवान् = सत्यं चकार । उभौ = हरिश्चन्द्रवरुणौ, पुनर्दर्शनाय = पुनः आवयोः सङ्गमो भविता इति कथयित्वा, स्वस्वनिवेशाभिमुखम् = आत्मनः आत्मनः गृहाभिमुखम्, सहर्षम् = हर्षपूर्वकम्, प्रतस्थाते = प्रस्थानं चक्रतुः ।

(१८) तपसा कृशोऽपि……प्रकाशमदीपयताम् ।

सन्दर्भप्रसङ्गौ—अयं गद्यखण्डः सत्यहरिश्चन्द्रोदयनामकस्य गद्यकाव्यस्य तृतीयप्रकरणात् परिगृहीतो वर्त्तते । राजा हरिश्चन्द्रो पुत्राप्राप्तेरिच्छया महर्षि

वसिष्ठमाराध्य जानाति स्म यत् यदा राजा हरिश्चन्द्रो गङ्गासागरसङ्गमस्थलं गत्वा स्वतपोभिः वरुणं प्रसादयिष्यति तदा सः विश्वपालनसमर्थं पुत्रं लप्स्यते। तदनन्तरं राजा तथैवाकार्षीत्। हरिश्चन्द्रस्य तपोभिः प्रसन्नो वरुणः तस्मै पुत्र-प्राप्तेर्वरमदात्। तदनन्तरं राजा स्वराजधानीं प्रति निवृत्तो बभूव। तदात्वे तस्मै राज्ञे मध्येमार्गं प्रकृतिरतीव रमणीया बभूव।

व्याख्या—तपसा=तपश्चरणेन, कृशोऽपि=कृशकायोऽपि, हरिश्चन्द्रः, अयोध्याभिमुखः=अयोध्यायाः सम्मुखः, पुत्रलाभसम्भावनाफलेन—पुत्रस्य= आत्मजस्य, लाभः=सम्प्राप्तिरेव, सम्भावना=सत्कारः अथवा आशा, तदेव तप-श्चरणस्य फलम्, तेन, निसर्गस्य=प्रकृतेः, प्रत्युद्गमनसौरभेण=सम्मुखमुत्थाय सत्कारपूर्वकस्वीकारसौगन्ध्येन च, नवताम्=नवीनताम्, समवाप=प्राप्त-वान्। तदा=तदात्वे, प्रत्यावर्तनपथे=प्रत्यावर्तनस्य मार्गे, हरिश्चन्द्राय= अयोध्याधिपाय, लब्धकामाय, पृथ्वी=वसुन्धरा, सुखशाद्वलानि=आनन्द-प्रदानि हरित्तृणयुक्तानि स्थानानि, विरचितवती=कृतवती। आपः=जलानि, निर्भिन्नकमलकुमुदप्रकरैः—निर्भिन्नानां=विकसितानाम्, कमलानां=पद्मानाम्, यानि पुष्पाणि तेषां प्रकरैः=समूहैः, रागम्=आनन्दम्, प्रापयन्=प्रायच्छन्, वायु-वेगाः—वायोः=पवनस्य, वेगाः=रंहाः, वनोपवनानाम्—वनानाम्=अरण्या-नाम्, उपवनानाम्. द्रुमाणाम्=वृक्षाणाम्; शाखाः=लताः; आधूय=कम्पयित्वा, शिरसि=मूर्धनि, पुष्पाणि=कुसुमानि, प्रावर्षयन्=प्रवर्षन्ति स्म। दिवा-रात्रम्=अहर्निशम्, च सूर्यचन्द्रमसौ=चन्द्रसूर्यौ, रमणीयम्=मनोज्ञम्, मृदु= सुखस्पर्शम्, प्रकाशम्=आलोकम्, अदीपयताम्=प्रकाशितवन्तौ।

(१९) वरुणोपस्थानाद्……रञ्जकं सञ्जातम्।

सन्दर्भप्रसङ्गौ—अयं गद्यखण्डः सत्यहरिश्चन्द्रोदयनामकस्य गद्यकाव्यस्य चतुर्थात् प्रकरणात् परिगृहीतो वर्त्तते। राजा हरिश्चन्द्रः स्वकुलगुरोः वसिष्ठस्या-देशानुसारेण गङ्गासागरसङ्गमस्थलं गत्वा वरुणम् उपासितवान्। प्रसन्नो वरुणो पुत्रप्राप्तेर्वरदानेन राजानं हरिश्चन्द्रमनुजग्राह। तदनन्तरं राजा सानन्दमयोध्या-मगात्। तथा आयोध्यकाः शृण्वन्ति स्म वरुणस्य वरदानविषयकं समाचारं तदा परमप्रीतास्ते नानाप्रकारेण मङ्गलमयं महोत्सवमायोजयामासुः आनन्दार्णव-निमग्नाः।

व्याख्या—वरुणस्य=जलेशस्य, उपस्थानात्=उपासनाकरणात्, परम्, हरिश्चन्द्रे=अयोध्याधिपे, अयोध्याम्=स्वकीयां राजधानीम्, उपावर्तिते=

प्रत्यागते सति, प्रजाः=प्रकृतिजनाः, परम्=अतिशयेन, प्रह्लादिताः=आनन्दिताः, बभूवुः=सञ्जाताः। तस्य राज्ञो हरिश्चन्द्रस्य, सौमनस्येन=सुहृत्त्वात्, प्रकटीभूतः=प्रकाशितः, सर्वत्र प्रसृमर इति भावः, कुमारस्य=राजकुमारस्य, सिद्धिः=प्राप्तिरूपः, यो हि प्रियः=कर्णमनोहरः, उदन्तः=समाचारः, स्वीयमेव=आत्मीयमेव, अभ्युदयस्य=कल्याणस्य, साधनम्, इति=इत्यनेन प्रकारेण, प्रजाभिः=प्रकृतिजनैः, निकामम्=यथेष्टम्, सुगृहीतम्=सुष्ठुतया हृदये धारितम्। तस्य=राज्ञो हरिश्चन्द्रस्य, सुदर्शनेन=मनोज्ञेन दर्शनेन, प्रजानाम्=प्रकृतिजनानाम्, हृदयानि=अन्तःकरणानि, नयनानि=नेत्राणि, च समम्=समकालमेव, समानरूपेण, रेमिरे=आनन्दानुभवं चक्रिरे। पौरैः=पौरजानपदैः, सर्वत्र=सम्पूर्णायामयोध्यायाम्, नन्दितूर्यशङ्खमिश्रेण=मङ्गलमयपटहशङ्खमिश्रितेन, नान्दीनादेन=मङ्गलमयघोषेण, मङ्गलम्=मङ्गलाचारः, आयोजितम्। तदा=तदात्वे, नगरमण्डलम्=नगरसमूहः, सम्मृष्टसिक्तपथम्—सम्मृष्टः=सम्मार्जितः, सिक्तः=सेचितश्च, पथः यस्याऽसौ तथाविधम्, पुष्पप्रकरशोभितम्—पुष्पाणां=कुसुमानाम्, प्रकरेण=समूहेन, शोभितम्=विराजितम्, सञ्जमम्। पुण्यगन्धैः=सुगन्धैः, शीतैः=शीतलैः, चन्दनरसैः=चन्दनजलैः, निषेवितम्=संसिक्तम्, सङ्गीतकसमापन्नम्—सङ्गीतकेन=सङ्गीतगोष्ठ्या, समापन्नम्=सम्पन्नम्, परम्=अत्यन्तम्, रञ्जकम्=मनोरञ्जकम्, सञ्जातम्=अभूत्।

(२०) प्रजानां मङ्गलकामना······नित्यं वर्धयामास।

सन्दर्भप्रसङ्गौ—अयं गद्यखण्डः सत्यहरिश्चन्द्रोदयनामकस्य गद्यकाव्यस्य चतुर्थप्रकरणात् परिगृहीतो वर्त्तते। अनपत्यो राजा हरिश्चन्द्रो महर्षेर्वसिष्ठस्य आज्ञया गङ्गासागरं गत्वा, सुन्दरवने स्थितः सन् बहुवर्षं यावत् वरुणस्य प्रसन्नतायै कठिनं तपश्चचार। सन्तुष्टो वरुणो हरिश्चन्द्रसमक्षमाविर्भूय तस्मै पुत्रप्राप्तेर्वरदानमदात्। प्रसन्नो राजा अयोध्यामगात्। वरदानविषयिणीं वार्ता श्रुत्वा परमां प्रसन्नतामनुभवन्तोऽयोध्यावासिनो महोत्सवमकार्षुः सर्वत्र। कालेन शैव्यान्तर्वत्नी बभूव, जनयामास च वसन्ततौ समागते पुत्रं रोहिताश्वनामानम्। महर्षिर्वसिष्ठः समये समागत्य स्वयमेव सर्वैः संस्कारैः संवर्धयामास।

व्याख्या—प्रजानां=प्रकृतिजानाम्, मङ्गलकामना=कल्याणकामना, शैव्यायाः महाराजस्य हरिश्चन्द्रस्य महिष्याः, अधिकुक्षि=जठरे, अत्र विभक्त्यर्थेऽव्ययीभावसमासः। हरिश्चन्द्रस्य=अयोध्याधिपतेः, कुलाङ्कुर-

रूपेण—कुलस्य=वंशस्य, अङ्कुररूपेण=प्ररोहरूपेण, यथाकालम्=समयानुसारेण, प्रादुर्बभूव=उत्पन्नो बभूव। महाराज्ञी=पट्टमहिषी, सत्त्वानुरूपम्=सत्त्वगुणस्यानुकूलम्, चक्रवर्तिलक्षणम्=चक्रवर्तिनो राज्ञो लक्षणेन युक्तम्, शिशुम्=पुत्रम्, सुषुवे=जनयामास। कलकण्ठकूजिते—कलकण्ठ्या=कोकिलया, कूजिते=कूजनसमाकीर्णे, अग्निविहारकाले—अग्नेः=वह्नेः, विहारस्य, अवसरे=काले, प्राप्तपुत्रजन्मसंवादेन—प्राप्तस्य=समुपलब्धस्य, पुत्रस्य=आत्मजस्य, जन्मनः=उत्पत्तेः, संवादेन=समाचारेण, हरिश्चन्द्रेण=अयोध्याधिपतिना नृपेण, सः=समुत्पन्नो बालकः, अग्निपर्यायः=अग्नेः पर्यायभूतमपरं नाम, रोहिताश्वः=वायुसखः, 'रोहिताश्वो वायुसखः' इत्यमरः। इति=इत्येतेन, नाम्ना=अभिधानेन, ख्यापित=प्रख्यापितः, निष्पन्नजातकोचितकर्मा—निष्पन्नानि=सम्पादितानि, जातकोचितानि=जातकर्मानुकूलानि, कर्म=कर्माणि, येनाऽसौ तथाविधः सः=उपर्युक्तः, स्तनन्धयः=दुग्धमुखो बालकः, नूतनाभ्युदयोत्थापकाभिनवचन्द्र इव—नूतनः=नवीनः, अभ्युदयस्य—कल्याणस्य, उत्थापकेन—समुत्थापकेन, अभिनवः—नूतनः, चन्द्र इव=चन्द्रमा इव, अमृतस्निग्धरूपेण—अमृतम्=पीयूषमिव, स्निग्धेन=मनोहरेण, रूपेण=सौन्दर्येण, प्रमोदनिर्भरेण—प्रमोदेन=परमानन्देन, निर्भरः—परिपूर्णः, योऽसौ तथाविधेन, नयनाभिरामलावण्येन—नयनयोः—नेत्रयोः, कृते अभिरामम्=मनोज्ञं, यद्धि लावण्यम्=सौन्दर्यविशेषः, मृदुना=कोमलेन, हास्येन च केवलम्=मात्रम्, पितरौ=मातापितरौ, न=नहि, अपितु=किन्तु, सर्वांल्लोकान्—सर्वान्=सम्पूर्णान्, लोकान्—जनान्, प्रहर्षयामास—प्रहृष्टानकार्षीत्। कुलाचार्यः—कुलस्य=इक्ष्वाकुकुलस्य, आचार्यः=पुरोधाः, वसिष्ठः=एतन्नामा ब्रह्मर्षिः, स्वयमेव=आत्मनैव, बालोचितसंस्कारान्—बालाय=बालकाय, उचिताः=अवश्यं करणीयत्वेन प्रख्याताः, ये संस्काराः=कार्यान्तरकरणयोग्यतास्वरूपाः बालोत्थापनान्नप्राशनचौलकर्मचूडाकरणादिकाः, तान् यथाकालम्=समयानुसारेण, विधाय=सम्पादयित्वा, तस्य=बालकस्य, गुणानां गरिमाणम्=गुरुत्वम्, नित्यं=सततं, वर्धयामास=समृद्धं चकार।

(२१) उपनयनकाले वसिष्ठप्रमुखै······विमृशन्नासाञ्चक्रे।

सन्दर्भप्रसङ्गौ—अयं गद्यखण्डः सत्यहरिश्चन्द्रोदयनामकस्य गद्यकाव्यस्य चतुर्थप्रकरणात् परिगृहीतो वर्त्तते। राजा हरिश्चन्द्रः सुन्दरवनं गत्वा तथा तपस्तेपे येन प्रसन्नो वरुणो तस्मै पुत्रप्राप्तेः वरदानं दत्वा प्राह यत् तव पुत्रे विश्वपालकत्वसामर्थ्यविधानाय सर्वप्रथमम् उपनयनानन्तरं सः बालस्त्वया वरुणालये

प्रवेशनीयः, तं सर्वगुणसम्पन्नं विधाय यथाकालमहं समावर्तयिष्यामीति। पुनः बालको रोहिताश्वः समुत्पन्नो बभूव। तस्य सर्वे संस्काराः महर्षिणा वसिष्ठेन कृता अभूवन्। उपनयनकाले समागते महर्षिभिराहूताः सर्वे देवाः समागुः। तेषु वरुणः प्रमुख आसीत्। वरुणेनानुभूतं यत् प्रजानां रोहिताश्वे तथाविध स्नेहासीत् येन तस्य साक्षात् वरुणकुले नयनं सुकरं नहि बभूव।

व्याख्या—उपनयनकाले=उपनयनसंस्कारस्यावसरे, वसिष्ठप्रमुखैः—वसिष्ठः प्रमुखः=प्रधानो येषु तैः, महर्षिभिः=ऋषिभिः, वैदिकमन्त्रैः=वेदानां मन्त्रैः, समाहूताः=आहूताः, देवाः=सुराः, समागच्छन्=आगच्छन्ति स्म। तेषु=समागतेषु देवेषु, देवाधिराजः—देवानाम्=देवतानाम्, अधिराजः=महाराजः, वरुणः=जलेशः, अनुबन्धानुसारेण—अनुबन्धस्य=पणस्य, अनुसारेण=अनुकूलेन, रोहितम्=हरिश्चन्द्रात्मजं रोहिताश्वम्, वरुणालयनिविष्टे—वरुणालये=समुद्रे, निविष्टे=कृतप्रवेशे, सति, स्वाश्रमे=स्वकीये गुरुकुले, विनेतुकामः=शिक्षां प्रदातुकामः, आसीत्=बभूव। तेन=वरुणेन, दृष्टम्=अवलोकितम्, यत्, रोहितः=रोहिताश्वः, रसाभिनिवेशेन—रसस्य=स्नेहस्य, अभिनिवेशेन=अभिनिवेशद्वारा, प्रजानाम्=प्रजाजनानाम्, हृदयेषु=अन्तःकरणेषु, सरागम्—रागेण=स्नेहेन, सहितम्, सन्निविष्टः=कृतप्रवेशो वर्तते। ताभ्यः=प्रजाभ्यः, प्रत्यक्षम्=साक्षात्, दूरीकरणम्=अपाकरणम्, न=नहि, शक्यते=अशक्यमिति यावत्, किं करणीयम्=रोहिताश्वस्य वरुणालये प्रवेशाय कः उपायः कृतः स्यात्, इति=इत्येतत्, विमृशन्=विचारयन्, सः=वरुणः, आसाञ्चक्रे=उपविवेश।

(२२) हरिश्चन्द्रः स्वपुत्रमुपनयनकाले ·····यथाकालं ज्ञास्यते।

सन्दर्भप्रसङ्गौ—अयं गद्यखण्डः सत्यहरिश्चन्द्रोदयनामकस्य गद्यकाव्यस्य चतुर्थात् प्रकरणात् वरप्राप्तिनामकात् परिगृहीतो वर्त्तते। वरुणस्य प्रसादात् राज्ञो हरिश्चन्द्रस्यानपत्यतादोषोऽपाकृतो बभूव। हरिश्चन्द्रपुत्रस्य रोहिताश्वस्य सर्वे संस्काराः स्वयं ब्रह्मर्षिणा वसिष्ठेन कुलपुरोधसा सम्पादिता अभूवन्। उपनयनकाले समागतेषु देवेषु वरुणेनानुभूतं यत् साक्षात् रोहिताश्वस्य प्रजाभ्यो दूरीकरणमशक्यमास्ते। हरिश्चन्द्रोऽपि पणानुसारेण रोहिताश्वं प्रवेशयितुमैच्छत् वरुणालये, किन्तु प्रजानामनुरागबन्धनं समुच्छेत्तुं नहि समर्थो बभूव। हरिश्चन्द्रेण प्रार्थितो वरुणः प्राह यत् सर्वं यथापूर्वनिर्धारितं सम्पत्स्यते। अत्र चिन्तां माकार्षीः।

व्याख्या—हरिश्चन्द्रः = अयोध्याधिपतिः, स्वपुत्रम् = स्वात्मजम्, उपनयनकाले = उपनयनसंस्कारस्यावसरे, वरुणाय = जलेशाय, दातुम् = प्रदातुम्, प्रतिबद्धः = दृढनिश्चय आसीत्, विमलात्मना—विमलेन = कपटरहितेन, आत्मना = अन्तःकरणेन, तथा=तेन, प्रकारेण, चिकीर्षुरपि=कर्तुमिच्छुरपि, प्रजानाम् = प्रजाजनानाम्, रुचिम् = इच्छाम्, व्यभिचारयितुम्=व्यभिचारेण युक्तम्= विफलामिति यावत् कर्तुम्, नोदसहत=नहि उत्सहते स्म । सः=राजा हरिश्चन्द्रः, वस्तुस्थितिम् = वास्तविकीं स्थितिम्, वरुणाय = जलेशाय, स्पष्टम् = स्पष्टरूपेण, न्यवेदयत् = निवेदयति स्म, कथितवानिति भावः । वरुणः=जलेशः, प्रत्युवाच = प्रत्यवोचत्—अत्र = अस्मिन् विषये, बहु = अत्यधिकम्, शोचनीयम् = विचारणीयम्, न = नास्ति, त्वया = हरिश्चन्द्रेण । त्वम् = हरिश्चन्द्रः, यत् = यादृशम्, आकाङ्क्षसि = वाञ्छसि, तथैव = तादृशमेव, भविष्यति=सम्पत्स्यते । मम = वरुणस्य, समीहितम् = अभिलषितम् अपि, युगपत् = समकालमेव, पूर्णताम् = परिपूर्णताम्, एष्यति = यास्यति । एषः = अयम्, परस्परम् = मिथः, विपरीतम् = प्रतिकूलम्, कथम् = केन प्रकारेण, उभयः = द्वयमेव, सम्भविष्यति = सम्पत्स्यते, इति = इत्येतत्, त्वया=हरिश्चन्द्रेण, यथाकालम्=समयानुसारेण, ज्ञास्यते = अवगमिष्यते ।

(२३) उपनयनविधौ अद्भ्यस्त्वा ······ निष्पादितम् ।

सन्दर्भप्रसङ्गौ—अयं गद्यखण्डः सत्यहरिश्चन्द्रोदयनामकस्य गद्यकाव्यस्य चतुर्थात् प्रकरणात् परिगृहीतो वर्त्तते । महर्षेः वसिष्ठस्याज्ञया गङ्गासागरसङ्गमस्थलं गत्वा राजा हरिश्चन्द्रः कठिनं तपश्चरित्वा वरुणस्य प्रसादात् पुत्रप्राप्तेः वरदानमवाप । कालक्रमेण शैव्या हरिश्चन्द्रात्मजं जनयामास । उपनयनकाले समागते महर्षिभिराहूता वैदिकमन्त्रैः सर्वे देवाः तत्र समागुः । तेषु वरुणः प्रधान आसीत् । रोहिताश्वं स्वगुरुकुले विनेतुकामो वरुणः तं वरुणालये नेतुकामोऽपि सानुरक्तायाः प्रजायाः समक्षं तस्य स्वगुरुकुले नयनमशक्यं मन्यते । वरुणस्यादेशेन हरिश्चन्द्रः प्रचारयामास जनेषु यत् यदाचार्यः 'अद्भ्यस्त्वा परिददामी'ति वाक्यं समुच्चारयति तदा बटुः सरय्वामुन्मज्जति । तथैव कृते सति यदा रोहिताश्वो सरय्वां प्रविवेश तदा वरुणानुचरास्तं वरुणालयं निन्युः मायामय अपरश्च रोहिताश्वः तस्य स्थाने उन्मज्जति स्म ।

व्याख्या—उपनयनविधौ = उपनयनाख्ये संस्कारकर्मणि, त्वा = बटुम्, अद्भ्यः = जलेभ्यः, परिददामि=समर्पयामि, इति=एतादृशस्य, आचार्यवचनमनु=

आचार्यस्य वचनस्यानन्तरम्, वटुः=उपनीयमानः शिष्टः, सरयूजले=सरय्वाः स्तोये, निमज्जति=निमज्जनं करोति, उन्मज्जति=उन्मज्जनं च करोति, इति=एतादृशी, रूढिः=प्रवादः, अयोध्यायाम्=सम्पूर्णायाम् अयोध्यायाम्, प्रावर्त्तत=प्रचारितो बभूव। अनेन='अद्भ्यस्त्वा परिददामी'ति वचनेन=आचार्यस्य वचनेन, यदा=यस्मिन् काले, रोहितः=रोहिताश्वः, जले=सरय्वाः जले, निममज्ज=निमज्जितोऽभूत्, तदा=तदात्वे, वरुणदूतैः=वरुणदेवताया अनुचरैः, गृहीतः=स्वायत्तीकृतः, सः=रोहिताश्वः, वरुणालयम्=वरुणदेवताया गृहं, नीतः=प्रापितः, तस्य=रोहिताश्वस्य, स्थाने च मायोपकल्पितः=मायया निर्मितः, प्रतिरूपरोहितः=रोहितरूपसदृशप्रतिबिम्बभूतो रोहितः, उन्ममज्ज=उन्मज्जितोऽभूत्, इति=इत्यनेन प्रकारेण, सर्वम्=निखिलम्, इदम्=एतत् कार्यम्, मायोपज्ञस्य=मायाभिज्ञस्य, वरुणस्य=वरुणदेवतायाः, प्राक्कलितयोजनया—प्राक्=पूर्वमेव, कलिता=निर्मिता, या योजना=कार्यसम्पादनव्यवस्थितिः, तया, निष्पादितम्=सम्पादितमभूत्।

(२४) उपनयनकाले दिङ्मण्डलेभ्यः······मानन्दयतु इति।

सन्दर्भप्रसङ्गौ—अयं गद्यखण्डः सत्यहरिश्चन्द्रोदयनामकस्य गद्यकाव्यस्य विश्वविजयस्वरूपनिर्णयनामकात् पञ्चमप्रकरणात् परिगृहीतो वर्त्तते। राजा हरिश्चन्द्रो वरुणस्य प्रसादात् पुत्रं लब्ध्वा अनपत्यतादोषेण रहितो बभूव। हरिश्चन्द्रात्मजस्य रोहिताश्वस्य सर्वान् बालोचितान् संस्कारान् स्वयमेव महर्षिः वसिष्ठ आगत्य सम्पादयामास। उपनयनकाले समागते समागतेषु देवेषु वरुणो रोहिताश्वे सर्वप्रकारिकां योग्यतामाधातुं मायया तस्यापहरणं कारयित्वा दूतैः वरुणालयं नीतवान्, अथापि कश्चनान्यः तमपहारं न ज्ञातवान्। तदात्वे समागताः मुनयो राजानं हरिश्चन्द्रमाशीर्वचोभिः स्वकीयाभिः वर्धयामासुः। पुनस्ते राजानं धर्मेण विश्वविजयं कर्तुमादिष्टवन्तः।

व्याख्या—उपनयनकाले=रोहिताश्वस्य उपनयनसंस्कारस्यावसरे, दिङ्मण्डलेभ्यः=नानादिग्देशेभ्यः, समागताः=सम्प्राप्ताः, परम्=अतिशयेन, नन्दिताः=समृद्धया सम्पन्नाः, ऋषयः=महर्षयः, हरिश्चन्द्रस्य=अयोध्याधिपतेः, अभ्युदयाय=लोककल्याणाय, आशास्यानि=उच्चारणीयानि आशीर्वचांसि, पौनःपुन्येन=वारं वारम्, उच्चरन्ति स्म=उच्चारयामासुः। तत उत्तरम्=तस्य पश्चात्, हरिश्चन्द्रम्=राजानम्, अभिनवकर्त्तव्यपथे=नवीने कर्तव्यमार्गे, नियोजयन्तः=संयोजयन्तः, ते=महर्षयः, विबोधयामासुः=सम्बोधयामासुः।

सुचरितैः = सुष्ठ्वाचरणैः विश्वम् = निखिलं जगत्, भावयन् = सन्तोषयन्, अभिरक्षया = सर्वतो रक्षणेन कर्मणा, नृपोत्तमः = राजवर्यः, विश्वराजः = सम्पूर्णस्य जगतो राजा, भवति = जायते। एतदर्थम् = एतस्मै प्रयोजनाय, स्वयमेव = आत्मनैव, पर्यटन् = भ्रमणं कुर्वन्, सर्वान् = निखिलान्, लोकान् = जनान् भुवनानि च, आत्मनि = स्वस्मिन्नेव, सन्निवेशयन् = आत्मसात्कुर्वन् विश्वेषाम् = सकलानाम्, उच्चावचानाम् = निम्नोन्नतानाम्, जीवनविधिम् = जीवनप्रकारम्, समेधयन् = संवर्द्धयन्, भवान् = हरिश्चन्द्रः, वसुधैव कुटुम्बकम् = सम्पूर्णा पृथ्वी, तत्र विद्यमानाः समे जीवाश्च मम कुटुम्बतां गताः सन्ति अत एव कश्चनापि नहि द्वेष्यो वर्तते, इति = एतादृशस्य, आदर्शस्य = अनुकरणीयाचरणस्य, सम्यक् = सम्यग्रूपेण, आचारनिष्ठया, प्रतिष्ठापनाय = संस्थापयितुम्, युज्यताम् = सन्नद्धो भवतु भवानिति भावः। पितृत्वेन = पितारूपेण, प्रजानाम् = प्रकृतिजनेषु, विनयाधानम्—विनयस्य = नम्रतायाः, आधानम् = संस्थापनम्, भवतः = हरिश्चन्द्रस्य, प्रमुखम् = प्रधानं कर्म। सूर्यवंशीयचक्रवर्तिसम्राड्भिः—सूर्यवंशीयाः = सूर्यवंशोत्पन्नाः, ये चक्रवर्तिनः सम्राजः, तैः, आदर्शीकृतेन = अनुकरणीयतां प्राप्तेन, धर्मविजयेन = धर्मेण द्वारा विश्वविजयेन, विश्वधारिणीम्—विश्वम् = जगत्, धारयति या सा तां विश्वविजयेन, विश्वधारिणीम्—विश्वम् = जगत्: धारयति या सा तां विश्वधारिणीम् = वसुन्धराम्, सुजलाम् = सुष्ठु जलेन समन्विताम्, सुफलाम् = सुष्ठु फलैः समन्विताम्, मलयजशीतलाम्—मलयजवत् = चन्दनवत्, शीतलाम् = शैत्यगुणसमन्विताम्, विदधातु = करोतु। भ्रमणकाले = प्रचरणकाले, महात्मनाम् = साधूनाम्, उपस्थानेन = समर्चया, तीर्थस्थलेषु = तीर्थस्थानेषु, महायशस्कानाम्—महता यशसा = कीर्त्या, युक्तानाम्, सुचरितश्रवणेन—सुचरितस्य = सुष्ठ्वाचरणस्य, श्रवणेन = श्रवणकरणेन, च, भवदीयः = त्वदीयः, कार्योत्साहः = कार्यस्य उत्साहः, वर्धिष्यते = वृद्धिमेष्यति। ततः = तदनन्तरम्. अनायासेन = प्रयासं विनैव, नित्यम् = सततम्, विजयवैभवम् = विजयरूपमैश्वर्यम्, अवाप्स्यति = प्राप्स्यति, भवान् = हरिश्चन्द्रः। ईदृशेन = एतादृशेन, धर्मविजयेन = धर्मेण द्वारा प्राप्तेन विजयेन द्वारा, भवान् = हरिश्चन्द्रः, अखिलम् = सम्पूर्णम्, जगत् = संसारम्, आनन्दयतु = आनन्दयुक्तं करोतु इति।

(२५) राजन्! विश्वविजयस्तु ·····भवतोऽनुगामिभिश्च।

सन्दर्भप्रसङ्गौ—अयं गद्यखण्डः सत्यहरिश्चन्द्रोदयनामकस्य गद्यकाव्यस्य पञ्चमप्रकरणात् परिगृहीतो वर्त्तते। हरिश्चन्द्रपुत्रस्य रोहिताश्वस्य यज्ञोपवीत-संस्कारस्यावसरेऽनेके महर्षयः समागुः अयोध्याम्। संस्कारसमाप्तेरनन्तरं ते तैस्तैराशीर्वचोभिर्हरिश्चन्द्रं वर्धयामासुः। अन्ते तैरभिहितं राजानं हरिश्चन्द्रं प्रति यत्—तेन धर्मेण विश्वविजययात्रा करणीयः। धर्मेण विश्वविजययात्रायाः महत्त्वं प्रतिपादयता महर्षिणा वसिष्ठेनाभिहितं यदनेके राजानो विश्वविजयं सैन्यबलैरकार्षुः परन्तु विश्वस्य धर्मविजयस्तु असाधारणं कर्म। अत्र विश्व-विजयस्य साधनं सत्त्वगुण एव भवति। तच्च महाराजेण मान्धात्रा कृतं तव पूर्वजेन। तस्य मार्गस्यानुसरणं करोतु भवान्।

व्याख्या—राजन्=महाराज हरिश्चन्द्र! विश्वविजयस्तु—विश्वस्य=जगतः, विजयः=स्वाधीनीकरणन्तु, स्वसैन्यबलैः—स्वस्य=आत्मनः, सैन्यस्य=सेनायाः, बलैः=बलेन, पूर्वमपि=प्राक्कालेऽपि, बहुभिः=अनेकैः, प्रतापशालिभिः=प्रतापान्वितैः, सम्राड्भिः=राजभिः, अनुष्ठितः=कृतः। भवतः=तव कृते, अयम्=सैन्यबलैर्विश्वविजयः, न=नहि, दुष्करः=दुःखसाध्यः, किन्तु=परन्तु, विश्वस्य=जगतः, धर्मविजयः=धर्मेण द्वारा विजयः, असाधारणम्=असामान्यं, कर्म। तदर्थम्=विश्वस्य धर्मविजयार्थम्, प्रथमम्=सर्वप्रधानम्, साधनम्=सामग्री साधकतमं वा, केवलम्=मात्रम्, सत्त्वमेव=सत्त्वगुण एव। तत्तु=सत्त्वगुणस्तु, सूर्यवंशीयानाम्=सूर्यवंशोद्भूतानाम्, चक्रवर्तिसम्राजाम्=चक्रवर्तित्वगुणसम्पन्नानां महाराजानाम्, निसर्गोपात्तम्—निसर्गतः=स्वभावेनैव, उपात्तम्=समुपलब्धम्। विशेषतः=विशेषरूपेण, भवतः=तव हरिश्चन्द्रस्य, तपस्समाधिभिः=तपस्यया समाधिभिश्च, सत्त्वोत्कर्षः=सत्त्वगुणस्योत्कर्षः, निकामम्=यथेष्टम्, सुसिद्धः=समुपलब्धः। मनुना=मानवेन्द्रेण मनुना, प्रकृतम्=प्रारब्धम्, च=किञ्च, मान्धात्रा=एतन्नामकेन तव पूर्वजेन, प्रप्रथितम्=विशेषरूपेण ख्यापितम्, मार्गम्=पन्थानम्, अनुसरता=अनुसरणं कुर्वता, भवताऽपि=हरिश्चन्द्रेण त्वयाऽपि, धर्मेण=धर्मेण द्वारा, विश्वविजयः—विश्वस्य=सम्पूर्णस्य जगतः, विजयः=स्वायत्तीकरणम्, वरणीयः==अङ्गीकरणीयः। अथ च=किञ्च, भवतः=तव, दर्शनेन=अवलोकनेन, सत्त्वानुभावविशेषेण—सत्त्वस्य=सत्त्वगुणस्य, अनुभावविशेषेण=प्रभावविशेषेण द्वारा च, लोकाः=जनाः, प्रभाविताः=अभिभूताः, एव सात्त्विकीम्=सत्त्वगुणप्रधानाम्, वृत्तिम्=प्रवृत्तिम्, ऊरीकरिष्यन्ति=स्वीकरिष्यन्ति। भवतः=

तव, राज्ये=साम्राज्ये, ज्ञानविज्ञानप्रयोगेण—ज्ञानम्=सामान्यं ज्ञानम्, विज्ञानं च=विशेषज्ञानम्, तयोः प्रयोगेण=व्यवहारेण द्वारा, यत्=किमपि, आध्यात्मिकम्=आत्मविषयकम्, शिल्पशास्त्रात्मकम्=शिल्पशास्त्रस्वरूपं च, परम्=सर्वोत्कृष्टम्, औदात्यम्=उदात्तता, तत् प्रतिपदम्=सर्वत्र, प्रवर्त्तते=प्रसरति। येन च प्रजानाम्=प्रकृतिजनानाम्, सात्त्विकी=सत्त्वगुणयुक्ता, वृत्तिः=प्रवृत्तिः, सुकरा=सुगमा, जाता=सञ्जाता। तदेव=प्रजानां सात्त्विकीवृत्तिरेव, विश्वसाम्राज्ये=सम्पूर्णस्य जगतः साम्राज्ये अपि, सम्पद्येत=जायेत, इति उदिद्श्य=प्रयोजनं कृत्वा, भवता=त्वया हरिश्चन्द्रेण भवतः=तव, अनुगामिभिः=अनुगमनकर्तृभिः च, भूयोभूयः=पुनः-पुनः, प्रयतनीयः=प्रयसनीयः।

(२६) इदं प्रयोजनमभिलक्ष्य······विधातुं प्राणपणेन यतेत।

सन्दर्भप्रसङ्गौ—अयं गद्यखण्डः सत्यहरिश्चन्द्रोदयनामकस्य गद्यकाव्यस्य विश्वविजयस्वरूपनिर्णयनामकात् पञ्चमप्रकरणात् परिगृहीतो वर्त्तते। हरिश्चन्द्रपुत्रस्य रोहिताश्वस्योपनयनसंस्कारावसरे अनेके महर्षयः समागुः। ते तैस्तैराशीर्वचोभिः राजानं हरिश्चन्द्रं संवर्द्धयित्वा प्राहुः तं धर्मेण विश्वविजयं कर्तुम्। तस्य महत्त्वं प्रतिपादयता महर्षिणा वसिष्ठेनाऽभिहितं यत् तव पूर्वजेन मान्धात्रा धर्मेण विश्वविजयमकार्षीत्। त्वयाऽपि तस्य मार्गानुसरणं कर्तव्यम्। तेन जनतायां सात्त्विकता वर्द्धते। अनेन लोके साधुवृत्तिः प्रवर्त्तते। अत एवायं विश्वविजयस्त्वया नूनं करणीयः।

व्याख्या—इदम्=विश्वसाम्राज्ये जनेषु सात्त्विकवृत्तेः समृद्धिरूपम्, प्रयोजनम्=उद्देश्यम्, अभिलक्ष्य=लक्ष्यीकृत्य, देशे देशे=राष्ट्रे राष्ट्रे, भवदीयेन=त्वदीयेन, संवर्धनेन=समृद्धिकरणेन द्वारा, कुलपतिभिः=गुरुकुलस्याधिष्ठातृभिः, आश्रमाः=गुरुकुलानि, संस्थापनीयाः=स्थापनीयाः, तत्र च=आश्रमेषु, दूराद्दूरात्=अतीवदूरप्रदेशात्, समागत्य=आगत्य, ज्ञानाचारशिक्षार्थिनः=ज्ञानस्याचारस्य च शिक्षाग्रहणमेवार्थो येषां ते, वेदवेदाङ्गादीन्—वेदाश्च=ऋग्यजुस्सामाथर्वाख्याः, वेदाङ्गाश्च=शिक्षाकल्पछन्दोव्याकरणनिरुक्तज्योतिषाख्यानि, वेदवेदाङ्गानि, तान्येवादौ येषां तान् विषयान्, शिल्पकलाश्च=वास्तुकलाश्च, अधीत्य=अध्ययनं कृत्वा, स्वेषु स्वेषु=स्वकीयेषु, देशेषु=राष्ट्रेषु, ज्ञाननिधिम्=ज्ञानरूपं वित्तम्, वितरन्तु=वितीर्णं कुर्वन्तु, ज्ञानेन=कारणेन द्वारा, विनयोपेता=नम्रतायुक्ता, ज्ञानस्य विनयहेतुत्वात्।

उक्तञ्चापि—'विद्या ददाति विनयमि'ति। लोकाः=जनाः, भूयसीम्=अत्यधिकाम्, साधुवृत्तिम्=सज्जनानां प्रवृत्तिम्, लभेरन्=प्राप्नुयुः, इति धर्मविजयस्य=धर्मेण द्वारा विश्वविजयस्य, समुचितोपलब्धिः=यथोचितं फलम्। च=किञ्च, धर्मविजयस्य=धर्मेण द्वारा विश्वविजयस्य, अपरम्=अन्यदपि, बहुविधम्=अनेकप्रकारकम्, फलम्=परिणतिः। तथाहि=तद्यथा—लोके=जगति, यत्किञ्चित्=यत्किमपि, वैषम्यम्=कष्टम्, दृश्यते=अवलोक्यते, तत् सर्वम्=अखिलमेव तत् कष्टजातम्, अधर्मेण=अधर्मद्वारा, जन्यते=उत्पद्यते। अधर्म एव सर्वेषां कष्टानां कारणं भवतीति भावः। या च=या कापि, सुषमा=सौन्दर्यम्, वर्त्तते=विद्यते, सा धर्मस्य=धर्माचरणस्य, फलम्=परिणामः। धर्मेण द्वारा अधर्मः=वेदविपरीतं कर्म, पराभवनीयः=अभिभवनीयः। ततः=तेन, धर्मस्य=वेदविहिताचरणस्य अभ्युदयनिःश्रेयसयोः साधनरूपस्य, राज्यम्=साम्राज्यम्, भवति=जायते। येन=धर्मराज्येन, भूतग्रामः=जीवसमूहः, परस्परम्=मिथः, रक्षति=रक्षां करोति, रक्ष्यते=रक्षाकृतो भवति। तु=किञ्च, राजा=धर्मराज्यस्य स्वामी, मूर्तिमान्=सविग्रहः, धर्मो भवति=जायते। सः=राजा, जगति=लोके, सर्वत्र=सर्वेषु स्थलेषु, सर्वम्=निखिलम्, सुखमयम्=सुखेन परिपूर्णम्, विधातुम्=कर्तुम्, प्राणपणेन=सर्वप्रकारेण, यतेत=प्रयासं कुर्यात्।

(२७) धर्मराज्ये 'वसुधैव कुटुम्बकम्'······सर्वं भूतग्रामं पालयतु।

सन्दर्भप्रसङ्गौ—अयं गद्यखण्डः सत्यहरिश्चन्द्रोदयनामकस्य गद्यकाव्यस्य पञ्चमप्रकरणात् परिगृहीतो वर्त्तते। रोहिताश्वस्य उपनयनसंस्कारे समागताः महर्षयो नैकाभिराशीर्वचोभिर्हरिश्चन्द्रं वर्धयामासुः। पुनस्ते तं धर्मेण विश्वविजयं मनुवन्मान्धातृवच्च कर्तुमादिष्टवन्तः। धर्मराज्यस्य स्वरूपं निरूपतया महर्षिणा वसिष्ठेनाभिहितं यत् धर्मराज्ये सम्पूर्णे जगति वसुधैव कुटुम्बकस्य भावना प्रसृमरा भवति। येन प्रकारेण पिता सर्वान् नैजान् पुत्रान् समानरूपेण पालयति पोषयति शिक्षयति संस्कारयति च तेनैव प्रकारेण धर्मः सर्वेषां जनानां रक्षां करोति।

व्याख्या—धर्मराज्ये=धर्मप्रधाने राज्ये, वसुधैव कुटुम्बकम्=पृथिव्यां विद्यमानाः समे जीवाः स्वकुटुम्बस्थाः वर्तन्ते, इति=एतादृशं, सत्यम्=तथ्यम्, लोकानाम्=जनानाम्, सदाचारेण, संव्यवहारेण=सम्यक्कृतेन व्यवहारेण च, प्रत्यक्षीक्रियते=सर्वत्र विलोक्यते। यथा=येन प्रकारेण, कश्चित्=कश्चन,

पिता=जनकः, स्वकीयान्=आत्मीयान्, सर्वान्=निखिलान्, पुत्रान्=आत्मजान्, समानरूपेण=अविषमतया, सुखयति=सुखिनः करोति, वर्द्धयति=समृद्धान् करोति, शिक्षयति=शिक्षितान् करोति, संस्कारयति–संस्कृतान् करोति, समुन्नयति=समुन्नतान् च करोति, तथैव=तेनैव प्रकारेण, धर्मराज्ये=धर्मप्रधाने राज्ये, धर्मः=लोकाभ्युदयपरं निःश्रेयसस्य च साधनस्वरूपो धर्मः एव, पिता=रक्षकः, सर्वान्=निखिलान्, जीवलोकान्=प्राणिवर्गान्, सुखयति=सुखितान् करोति, च=किञ्च, समुन्नयति=समुन्नतान् करोति। हि=यतः, तत्र=धर्मराज्ये, जन्ममात्रेण=धन्मग्रहणमात्रेण, उच्चावचत्वादिभेदभावः=उन्नतत्वावनतत्वादिरूपो यो हि भेदस्तस्य भावः, न=नहि भवति। स्वस्य=आत्मनः, चरितस्य=आचरणस्य, औदार्येण=उदारताद्वारा, कश्चित्=कोऽपि, पुरुषः=मनुष्यः, महान्=महत्त्वगुणसम्पन्नः, भवति=जायते, धर्मराज्ये=धर्मप्रधाने राज्ये। यथा=येन प्रकारेण, सूर्यः=रविः, स्वरश्मिभिः=स्वकीयैः किरणैः, सर्वान्=सम्पूर्णान्, प्राणिनः=जीववर्गात्, पालयति=रक्षयति, तथैव=तेनैव प्रकारेण, सूर्यवंशीयः=सूर्यवंशोद्भूतः, भवान्=हरिश्चन्द्रः, केवलम्=मात्रम्, मानवम्=मनुष्यम्, न=नहि, अपितु=किन्तु, सर्वम्=सम्पूर्णम्, भूतजातम्=प्राणिवर्गम्, पालयतु=रक्षतात्।

(२८) धर्मराज्ये सर्वे लोका······लाघवं विज्ञायेत धर्मराज्ये।

सन्दर्भप्रसङ्गौ—अयं गद्यखण्डः सत्यहरिश्चन्द्रोदयनामकस्य गद्यकाव्यस्य विश्वविजयस्वरूपनिर्णयनामकात् पञ्चमप्रकरणात् परिगृहीतो वर्तते। राजानं हरिश्चन्द्रं महर्षयो रोहिताश्वस्योपनयनसंस्कारे समागताः नानाविधाभिराशीर्वचोभिः संयोज्य धर्मेण विश्वस्य विजयं कर्तुमादिदिशुः। तत्र विश्वस्य धर्मेण कृतस्य विजयस्य महत्त्वं निरूप्य महर्षिर्वसिष्ठो धर्मराज्यस्य स्वरूपं फलादिकं च निरूप्याह यत् धर्मराज्ये समे जनाः परोपकारपरायणा भवन्ति। प्रायेण जनाः परोपकारार्थं दानं कुर्वन्ति। वदान्यतोत्कर्षं एव जीवनोत्कर्षस्य प्रमापको भवति।

व्याख्या—धर्मराज्ये=धर्मप्रधाने राज्ये, सर्वे=निखिलाः, लोकाः=जनाः, स्वार्थम्=स्वप्रयोजनम्, समीहितुम्=समुपलब्धुं, न=नहि, अपि तु=किन्तु, परार्थम्=परमार्थम्, साधयितुम्=सिद्धं कर्तुम्, एव आत्मानम्=स्वम्, उद्योजयन्ति=उद्युक्तं कुर्वन्ति। कश्चित्=कोऽपि, जनः=मनुष्यः, स्वकीयेन=आत्मीयेन, महता=अतिगभीरेण, श्रमेण=परिश्रमेण, कियन्मात्रम्=कस्यां

मात्रायाम्, अपरान्=स्वव्यतिरिक्तान्, जनान्=मनुष्यान्, समुन्नयति= समुन्नतान् करोति, इत्यनेन, तस्य=परोपकारपरायणस्य पुरुषस्य, महिमा= महत्त्वम्, प्रमाणीभवति=प्रामाणिकतामेति । तस्य=परमार्थपरायणस्य पुरुषस्य, परेभ्यः=स्वव्यतिरिक्तेभ्यो जनेभ्यः, अधिकाधिकदानेन=सर्वाधिक-दानकरणेन, माहात्म्यम्=महत्त्वम्, विजानीयात्=अवगच्छेत् । परेभ्यः= स्वातिरिक्तेभ्यो जनेभ्यः, अधिकाधिकेन=सर्वाधिकेन, ग्रहणेन=दान-स्वीकरणेन, लाघवम्=लघुताम्, विज्ञायेत=अवगच्छेत्, धर्मराज्ये=धर्मप्रधाने राज्ये ।

(२९) पुरा धर्मविजयेन भवदीयः······ प्रस्थातव्यमिति ।

सन्दर्भप्रसङ्गौ—अयं गद्यखण्डः सत्यहरिश्चन्द्रोदयनामकस्य गद्यकाव्यस्य विश्वविजयस्वरूपनिर्णयनामकात् पञ्चमप्रकरणात् परिगृहीतो वर्त्तते । राजा हरिश्चन्द्रो रोहिताश्वस्योपनयनसंस्कारे समागतानां महर्षीणामाशीर्वचोभिः संवर्धितः सन् तैरादिष्टो बभूव धर्मेण विश्वविजयं कर्तुम् । तत्रादौ महर्षिः वसिष्ठः धर्मराज्यस्य महत्त्वं स्वरूपं चोपदिदेश । महर्षिणाभिहितं यत् भवतः पूर्वजो मान्धाता पुरा धर्मेण विश्वविजयमकार्षीत् अत एवाधुनाऽपि तस्य पराक्रमगाथा लोके गीयते । तस्यैवादर्शस्य पालनं करोतु भवान् । भवता अस्यां विश्वविजययात्रायां नैमिषारण्यकुरुक्षेत्रयोरपि दर्शनं कर्तव्यम् ।

व्याख्या—पुरा=पूर्वस्मिन् काले, धर्मविजयेन=धर्मप्रधानेन विश्वविजयेन, भवदीयः=त्वदीयः, पूर्वजः=पूर्वपुरुषः, आयोध्यकः=अयोध्यानिवासी, मान्धाता=एतन्नामा राजर्षिः, प्रख्यातः=लोकविख्यातः, चक्रवर्तीराज्ञामपि प्रशासकः, सम्राट्=पृथ्वीपतिः, बभूव=अभवत् । अधुनाऽपि=इदानीमपि, तस्य=मान्धातुः, कीर्तिमालिनी—कीर्तिः=यशः, माला=स्रग्, यस्याः सा तथाविधा, पराक्रमगाथा—पराक्रमस्य=विक्रमस्य, गाथा=गानम्, श्रूयते= कर्णगोचरी क्रियते । तस्याः=मान्धातुः पराक्रमगाथायाः, श्रवणेन=कर्णगोचरी-करणेन, आत्मानम्=स्वम्, ऊर्जस्वितमम्=तेजस्वितमम्, प्रोन्नमयतु=प्रोन्नतं करोतु भवान् । तस्य=मान्धातुः, आदर्शः=अनुकरणीयाचरणम्, भवतः= हरिश्चन्द्रस्य, पथप्रदर्शनात्=मार्गप्रदर्शकत्वात्, वरेण्यः=वरणीयः । स महात्मा =प्रख्यातो राजर्षिः मान्धाता, धर्मक्षेत्रे=धर्मप्रधाने क्षेत्रे, कुरुक्षेत्रे, नैमिषारण्ये च, अयजत=देवयजनमकार्षीत्, विश्वविजयपथे=विश्वस्य विजयस्य मार्गे,

पुण्याश्रमद्वयदर्शनम्—पुण्यः=पवित्रश्चासौ आश्रमः पुण्याश्रमः, तस्य द्वयं पुण्याश्रमद्वयम्=कुरुक्षेत्रनैमिषारण्यनामकम्, तस्य दर्शनम्=अवलोकनम्, यथा स्यात्=येन प्रकारेण सम्भवेत्, तथा=तेनैव प्रकारेण, भवता=हरिश्चन्द्रेण, प्रस्थातव्यम्=प्रस्थानं करणीयम्, विश्वविजययात्रार्थं।

(३०) धर्मविजय-यात्रा वेदसम्पन्नैः ···· प्रतिष्ठापयामास।

सन्दर्भप्रसङ्गौ--अयं गद्यखण्डः सत्यहरिश्चन्द्रोदयनामकस्य गद्यकाव्यस्य षष्ठप्रकरणात् परिगृहीतो वर्त्तते। राजा हरिश्चन्द्रो महर्षिभिः धर्मेण विश्वविजययात्रां कर्तुमादिष्टः सन् वैदिकैः ब्राह्मणैः महर्षिभिः, सर्वभाष्यविदांवरैः महाव्रतैश्च पुरुषैः साकं यात्रां प्रारब्धवान्। सर्वप्रथमं सः नैमिषारण्याय प्रतस्थे। सार्धद्वयदिनं चलित्वा सः नानापक्षिसङ्घेन समुद्घुष्टाम्, चरन्तीनां गवां कोटिभिः शुभ्रायमाणाम्, निर्मलशीतलजलकणिकामिश्रवायुभिः तटोपासकानां तापं हरन्तीं मन्दं मन्दं प्रवहन्तीं नदीं गोमतीं ददर्श नैमिषारण्ये।

व्याख्या—सा=महर्षिभिः कर्तुमादिष्टा, हरिश्चन्द्राय, यात्रा=विश्वविजययात्रा, वेदसम्पन्नैः=वैदिकैः, देवद्विजमहर्षिभिः=देवताब्राह्मणमहर्षिभिः, समाकीर्णा=अचिता, नक्षत्रैः=ताराभिः, द्यौरिव=आकाशं यथा, आयता=विस्तृता, अवभासे=शोभते स्म। तत्र=तस्यां यात्रायाम्, सर्वभाष्यविदांवरा=सर्वेषां भाष्याणाम् अभिज्ञवर्याः, धर्मार्थकुशलाः—धर्मश्चार्थश्च धर्मार्थौ, तयोः कुशलाः=दक्षाः, केचित्=केचन, महाव्रताश्च=ब्रह्मचारिणश्च, विविधकथाकदम्बकम्—विविधानाम्=बह्वीनाम्, कथानाम्=आख्यायिकानाम्, कदम्बकम्=वृन्दम्, श्रावयन्तः=कथयन्तः, रेमिरे=रमणमकार्षुः। रथशकटगजाश्वादिवाहनैः—रथाश्च=स्यन्दनानि च, शकटाश्च, गजाश्च=हस्तिनश्च, अश्वाश्च त एवादौ येषां तथाभूतैः वाहनैः, विश्वस्य=सम्पूर्णस्य जगतः, धर्मविजयाय=धर्मेण विजयं कर्तुम्, नान्दीनादसमुत्साहितम्—नान्द्याः=वाद्यविशेषस्य, नादेन=घोषेण, समुत्साहितम्=समुत्प्रेरितम्, शिष्टजनवृन्दम्—शिष्टानाम्=शिष्टाचारसमन्वितानाम्, जनानाम्, वृन्दम्=समूहम्, हरिश्चन्द्रानुगतिकम्=हरिश्चन्द्रं राजानमनुगच्छति यत् तथाभूतम्, सत्, प्रययौ=प्रस्थानमकार्षीत्। दिनद्वयप्रगमनेन—दिनानाम्=अह्नाम्, द्वयम्=द्वितयम्, तेन प्रगमनेन=प्रकृष्टगमनद्वारा, तटप्रदेशे=कूलप्रदेशे, चरन्तीनाम्=सञ्चरणं कुर्वन्तीनाम्, गवाम्, कोटिभिः=कोटिसंख्याकैः, शुभ्रायमाणा=धवलायमाना,

मरकतहरितनीरैः=मरकतमणिवन्नीलवर्णजलैः, रम्यान्तरा—रम्यम्=मनोज्ञम्, अन्तरम्=मध्यभागः, यस्याः सा तथाविधा, कलहंसीनाम्=वरटानाम्, मधुर-गीतैः=श्रोत्रपेयैः रुतस्वनैः, मनोहरा=मनोज्ञा, गोमती नाम्नी नदी=स्रोत-स्विनी, दर्शनपथमागता=दृग्गोचरा बभूव। सा च=गोमती नदी, नगाधिरा-जात्=हिमालयात् 'अस्त्युत्तरस्यां दिशि देवतात्मा हिमालयो नाम नगाधि-राजः'। इति वाक्ये हिमालयस्य नगाधिराजत्वमाह महाकविः कालिदासः, ऊर्जस्वलानि=समुत्पादकानि, तत्त्वानि, समाहृत्य=आनीय, कृषीवलानाम्= कृषकाणां, क्षेत्रेषु=केदारेषु, वितरन्ती=वितरणं कुर्वन्ती, निर्मलजलकणिका-शीतलेन—निर्मलस्य=स्वच्छस्य, जलस्य=तोयस्य, या कणिकाः=कणानि, ताभिः शीतलेन=शैत्यगुणसमन्वितेन, अनिलेन=वायुना, तटोपासकानाम्= कूलसेवकानाम्, तापम्=सन्तापम्, हरन्ती=हरणं कुर्वन्ती, सुगन्धेन=सौगन्ध्य-समन्वितेन, दिगन्तान्=दिशामन्तभागान्, वासयद्भिः=सौगन्ध्यसमन्वितं कुर्वद्भिः, नलिनीषण्डैः=कमलवृन्दैः, पथिकान्=यात्रिणः, प्रकामं=यथेष्टं, रोचयन्ती=मनोरञ्जनं कुर्वन्ती, पुराणाख्यानम्=पुराणानां कथाम्, श्रोतुम्=श्रवणं कर्तुम्, मन्दं मन्दं=शनैः शनैः, वहन्ती=प्रवहन्ती, तटवर्तिलोकानाम्—तट-वर्तिनः=तटे निवासिनः, ये लोकाः=जनाः, तेषां हृदयेषु=अन्तःकरणेषु, सहजभावेन=नैसर्गिकरूपेण, आत्मनिदर्शनेन=स्वकीयदृष्टान्तेन सर्वोदया-दर्शम्—सर्वेषाम्=निखिलानां जनानाम्, यो हि उदयः=उन्नतिः, तस्या-दर्शम्=अनुकरणीयानि कर्माणि, प्रतिष्ठापयामास=संस्थापयामास।

(३१) परमश्रद्धया हरिश्चन्द्रः······चतुर्वर्गोपायान् विममर्श।

सन्दर्भप्रसङ्गौ—एष गद्यखण्डः सत्यहरिश्चन्द्रोदयनामकस्य गद्यकाव्यस्य विश्वविजयपथे नैमिषारण्यदर्शननामकात् षष्ठप्रकरणात् परिगृहीतो वर्त्तते। राजा हरिश्चन्द्रो महर्षिम् आदेशमवाप्य, विद्वद्भिः शिल्पकलानिपुणैः साधुभिश्च साकं धर्मेण विश्वविजयं कर्तुं यात्रां प्रारब्धवान्। तत्र सर्वप्रथमं सः नैमिषारण्यनामकं तीर्थमगात्। अस्य तीर्थस्य पथः स्वर्णमयानकार्षीत् सूर्य-वंशीयो राजा मान्धाता। सः अत्र अनेकेषां यागानामनुष्ठानमकार्षीत्। अत्र राजा हरिश्चन्द्रो मासमेकमुवास, पदातिरेव गत्वा सर्वेषां महर्षीणामाश्रमाणां दर्शनमप्यकार्षीत्। अत्रैव मुनीनां षड्विंशतिसाहस्रं चतुर्वर्गोपायविमर्शमकार्षीत् इति भावः।

व्याख्या—परमश्रद्धया—परमा=अतिशायिनी, चासौ श्रद्धा तया

हरिश्चन्द्रः=अयोध्याधिपतिः, कृतस्वर्णपथाम्—कृताः=निर्मिताः, स्वर्णेन=सुवर्णेन, पन्थानो यस्यास्सा तथाविधम्, ताम्=प्रख्याताम्, पुण्यमयीम्=पुण्यादृष्टेन समन्विताम्, भूमिम्=पृथ्वीम्,=अवलोकयामास, यत्र=नैमिषारण्ये, शताधिकैः=शतसंख्यातोऽप्यधिकैः, यज्ञैः=देवयजनैः, मान्धाता=एतन्नामा सूर्यवंशीयो राजा, शतक्रतुम्=शतानां क्रतूनां कर्तारम्, इन्द्रम्=पाकशासनम्, अतिचक्राम=अतिक्रामति स्म। तस्मिन्=नैमिषारण्याख्ये, प्रदेशे=स्थाने, प्राक्तनमुनीनाम्—प्राक्तनानाम्=प्राचीनानाम्, मुनीनाम्=तत्त्वमननशीलानाम्, उत्प्रेक्षितम्=अभिकाङ्क्षितम्, साह्यम्=सहायताम्, विदधानः=कुर्वन्तः, हरिश्चन्द्रः=अयोध्याधिपतिः: पूर्वविद्भिः—पूर्वम्=पूर्वकालिकं तथ्यं, विदन्ति=जानन्ति, ये ते तैः, व्याख्यातानि=व्याकृतानि, महासत्त्वानाम्=महज्जनानां चरितावदानानि=चारित्र्यस्य साह्यानि, शृण्वन्=श्रवणं कुर्वन्, तपोधनानाम्=तपस्विनाम्, रम्याः=मनोज्ञाः, क्रियाः=कर्माणि, समवलोकयंश्च=सम्यक् प्रकारेण विलोकयंश्च, एकं मासम्, उवास=निवसति स्म। तस्मिन्नवधौ=तस्मिन् काले, सः=राजा हरिश्चन्द्रः, तपोवनस्य=तपसः अरण्यस्य नैमिषारण्यस्य, परिसरे=सविधे, परिवारयमाणान्=परिवारवन्निवसमानान्, तीर्थभूतान्=तीर्थस्वरूपतां गतान्, अतिशयपावनानिति भावः, आश्रमान्=मुनीनां निवासस्थानानि, मुनिभिः=तपस्विभिः, सह=साकम्, पद्भ्यां विचरन्=पदातिरेव सञ्चरन्, सश्रद्ध श्रद्धया सहितम्, ददर्श=अवलोकयामास। सिद्धाश्रमम्=सिद्धानां महात्मनाम् आश्रमम्, पर्यालोचयता=पर्यालोचनं कुर्वता, तेन=राज्ञा हरिश्चन्द्रेण, श्रुतम्=श्रवणं कृतम्, यत् अत्र=नैमिषारण्ये, मुनीनाम्=तपस्विनाम्, षड्विंशतिसाहस्रम्, चतुर्वर्गोपायान्—चतुर्वर्गस्य=धर्मार्थकाममोक्षाणां समूहस्य, उपायान्=साधनानि, विममर्श=विचारितवान्।

(३२) मिश्रके तीर्थे तेन महर्षेः……विधातुं प्रतिजज्ञे।

सन्दर्भप्रसङ्गौ—अयं गद्यखण्डः सत्यहरिश्चन्द्रोदयनामकस्य गद्यकाव्यस्य षष्ठप्रकरणात् परिगृहीतो वर्तते। राजा हरिश्चन्द्रो महर्षीणामादेशमवाप्य, विद्वद्भिः, प्रामाणिकैः पुरुषैः साधुभिश्च साकं धर्मेण विश्वस्य विजयचिकीर्षया प्रस्थानमकार्षीत्। सर्वप्रथमं सः नैमिषारण्यं स्वपूर्वजानां तपःस्थलीं द्रष्टुमाययौ। अस्मिन्नेव नैमिषारण्ये राजा मान्धाता नैकान् यज्ञानकार्षीत्। अत्रैव राजा हरिश्चन्द्रोऽपि एकं मासमुषित्वा तेषां तेषामाश्रमाणां तीर्थीभूतानां दर्शनं पदातिरेव गत्वाऽकार्षीत्।

व्याख्या—मिश्रके=मिश्रकनामके, तीर्थे=पुण्यक्षेत्रविशेषे, नैमिषार स्य, तेन—राज्ञा हरिश्चन्द्रेण, महर्षेः—ऋषेः, दधीचस्य, दक्षयज्ञकालिकम् दक्षप्रजापतेः यज्ञस्यावसरे कृतम्, व्रतम्=सङ्कल्पम्, अश्रूयत=शुश्राव, अनृ नोक्तपूर्वं मे इत्यादिकम् । अयमाशयः—

मे=मम दधीचस्य, अनृतम्—मिथ्यार्थम्, न=नहि, उक्तपूर्वम्=पू कथितम्, इदानीं यावज्जीवनं मया कदापि मिथ्याभाषणं नहि कृतमि भावः । च=किञ्च, कदाचन=कदाचिदपि भविष्यत्काले, न=नहि, वक्ष्ये= मृषा भाषणं करिष्ये । अहम्=दधीचः, ऋषीणाम्=क्रान्तदर्शिनां पुरुषाणा देवतानां—देवानाञ्च, मध्ये=समाजे, सत्यम्=तथ्यं, ब्रवीमि=वच्मि ।

सोऽयम्=उपर्युक्तलक्षणविशिष्टोऽयम्, दधीचः=दधीच ऋषिः, अतिकायः विपुलकायः, तेजस्वी=तेजस्सम्पन्नः, लोकसारः, शैलगुरुः=पर्वतवदगुरुत्व विशिष्टः, भृगुणा—भृगुमहर्षिणा, विश्वहिताय—विश्वस्य=जगतः, हिताय कल्याणाय, विनिर्मितः=रचितः, इति=इत्यनेन प्रकारेण, विजानन्=विशेष रूपेणावगच्छन्, इन्द्रः=पाकशासनः, वृत्राक्रमणैः=वृत्रासुरस्य अनेकैः आक्रमणै पुनः पुनः=भूयो भूयः, व्याहन्यमानः=विशेषरूपेण तुद्यमानः, अन्यथा= तद्व्यतिरिक्तेन मार्गेण, आत्मनः=स्वस्य, रक्षणम्=रक्षाम, न=नहि, पश्य =अवलोकयन्, दधीचशरणम्==दधीचस्य ऋषेः शरणम्, संश्रितः=प्राप् सन्, तस्य—दधीचर्षेः, अस्थीनि, वज्रं=पविः, निर्मातुम्=कर्तुम्, अयाच =याचयामास । महर्षिः=दधीचः, प्राणत्यागेन=प्राणानां परित्यागेन देवकार्यार्थम्—देवानाम्=सुराणाम्, कार्यार्थम्=प्रयोजनसिद्धये, अस्थीनि, दत्त्वा =प्रदाय, वृत्रासुरीयं=वृत्रासुरेणोपस्थापितं, विश्वव्यापिनम्=जगद्व्यापकम् दुष्प्रभावम्=कुप्रभावम, निराकरोत्=अपाकार्षीत् । दधीचकथाश्रवणेन— दधीचस्य महर्षेः कथायाः=आख्यानस्य, श्रवणेन=श्रवणकरणेन, गृहीत शिक्षः—गृहीता=प्राप्ता, शिक्षा येनाऽसौ हरिश्चन्द्रः, लोकसङ्ग्रहाय=लोकानां कल्याणाय, आत्मदानम्,=स्वशरीरप्रदानम्, प्रतिजज्ञे=सङ्कल्पयामास ।

(३३) नैमिषारण्याद् हरिश्चन्द्रो····· ललितं चन्द्रायते स्म ।

सन्दर्भप्रसङ्गौ—अयं गद्यखण्डः सत्यहरिश्चन्द्रोदयनामकस्य गद्यकाव्यस्य विश्वविजयनामकात् सप्तमप्रकरणात् परिगृहीतो वर्त्तते । महर्षीणामादेशानुसारेण राजा हरिश्चन्द्रो विद्वद्भिः महात्मभिश्च साकं धर्मेण विश्वविजयं कर्तुं प्रस्था

कृत्वा सर्वप्रथमं नैमिषारण्यमतिपावनं स्वपूर्वजानां तपोभूमिमागत्य, तत्र मास-मेकमुषित्वा तत्रत्यानां समेषां तीर्थीभूतानामाश्रमाणां दर्शनं कृत्वा प्रहृष्टान्तरङ्गः सन् स्वपूर्वजस्य मान्धातुस्तपःस्थलीं कुरुक्षेत्रमाययौ। तत्र सः सकलान् चराचरान् निसर्गविनीताननुबभूव।

व्याख्या—नैमिषारण्यात्=नैमिषारण्यतीर्थात्, हरिश्चन्द्रः=अयोध्याधिपतिः, अनुत्तमस्य—नास्ति उत्तमो यस्मादसौ तथाविधस्य=सर्वोत्तमस्येत्यर्थः, स्वपूर्वजस्य—स्वस्य=आत्मनः, पूर्वजस्य=पूर्वपुरुषस्य, मान्धातुः=एतन्नामकस्य महाराजस्य, तपोभूमिम्=तपस्थलीम्, कुरुक्षेत्रम्, द्रष्टुकामः=अवलोकयितुमिच्छुः, निश्चक्राम=निर्गतः। विश्वतः=सर्वतः, निसर्गविनीतेषु=स्वभावेनैव नम्रेषु, चराचरेषु=स्थावरजङ्गमेषु, भूतेषु=जीवेषु मध्ये, विचरन्=विचरणं कुर्णन्, भूयिष्ठम्=अतिशयेन, रममाणः=रमणं कुर्वन्, महात्मनाम्=महज्जनानाम्, तपोधनानाम्=तपस्विनाम्, आशीर्वचोभिः=आशीर्वचनैः, आत्मानम्=स्वम्, प्रसादयन्=प्रसन्नं कुर्वन्, प्रआसत्कारम्—प्रजानाम्=प्रकृतिजनानाम्, सत्कारम्=सम्मानम्, सहस्रगुणम्—सहस्रकृत्वः, प्रत्युपकुर्वन्=प्रत्युपकारं कुर्वन्, लोकवार्ताम्=लोकस्य वार्ताम्, साक्षात्कृत्य=प्रत्यक्षीकृत्य, श्रुत्वा च=श्रवणं कृत्वा च, आत्मीयानां=स्वकीयानां, सहचारिणाम्=सहगामिनाम्, विशेषनियोगेन—विशेषेण नियोगेन=आग्रहेण, यथायोगम्=योग्यतानुसारम्, शाश्वतीम्=सार्वभौमिकीम्, अभिवृद्धिम्=समृद्धिम्, व्यवस्यन्=व्यवस्थापयन्, पृथग्जनान्=स्वपक्षीयव्यतिरिक्तान् जनान्, स्वमहानुभावप्रकर्षेण—महांश्चासौ अनुभावः महानुभावः=महाप्रभाव इति यावत्, स्वस्य महानुभावः स्वमहानुभावः, तस्य प्रकर्षेण=प्रकृष्टतया, संस्कारपथे=संस्कारस्य मार्गे, विनयन्=विनीतान् कुर्वन्, सर्वेषाम्=सकलानां, वर्णाश्रमाणाम्—वर्णानाम्=ब्राह्मण-क्षत्रिय-वैश्य-शूद्राणाम्, आश्रमाणाम्=ब्रह्मचर्यगार्हस्थ्यवानप्रस्थसंन्यासाख्यानाम्, धर्मपरिपालनवृत्तिम्—धर्माणाम्=स्वस्ववर्णाश्रमानुकूलानाम्, पालनस्य=अनुष्ठानस्य, या वृत्तिः=प्रवृत्तिः, ताम्, सर्वत्र=सर्वेषु स्थलेषु, प्रतिष्ठापयंश्च=संस्थापयंश्च, हरिश्चन्द्रः=अयोध्याधिपतिः, प्रतिदिनम्=दिनं दिनं प्रति, ललितललितम्=अतिशयेन ललितम्, चन्द्रायते स्म=चन्द्रमिवाचरति स्म।

(३४) मासेनैकेन परिभ्रमन्……वृत्तिर्बलीयसी बभूव।

सन्दर्भप्रसङ्गौ—अयं गद्यखण्डः सत्यहरिश्चन्द्रोदयनामकस्य गद्यकाव्यस्य प्रसिद्धात् विश्वविजयनामकात् प्रकरणात् परिगृहीतो वर्त्तते। महर्षीणामादेशम-

वाप्य अयोध्याधिपो हरिश्चन्द्रो विश्वस्य धर्मविजययात्रां प्रारब्धवान् । अस्यां यात्रायां हरिश्चन्द्रेण साकं सहगामिनो विद्वांसः, महात्मानः शिल्पकला-निपुणाश्चाभूवन् । सर्वप्रथमं राजा सर्वैः साकं नैमिषारण्यमगात् । तत्र सः पदाति-रेव मासमेकं चरित्वा तेषां तेषां समेषां महात्मनामाश्रमाणां दर्शनमकार्षीत् । पुनः स राजा मान्धातुस्तपस्थलीं कुरुक्षेत्रम् आजगाम । अत्रापि राजा मासमेकं निवसति स्म । अत्रैवास्ते राज्ञः शिवेराश्रमः यत्र ब्रह्मणो नियोगेन अग्नीन्द्रौ तस्य राजर्षेः प्राणपणेन परीक्षणमकार्षीष्टाम् ।

व्याख्या—एकेन मासेन, परिभ्रमन्=परिभ्रमणं कुर्वन्, हरिश्चन्द्रः, दृशद्वतीसरस्वत्योः=एतन्नामयोरुभयोर्नद्योः, अन्तर्वर्तिनि=मध्ये विद्यमाने, कुरुक्षेत्रे=एतन्नामके स्थाने, प्रसिद्धतमम्=प्रख्याततमम्, शिवेः=राजर्षेः शिवेः, आश्रमम्=तपश्चरणस्थलम्, प्रत्युपस्थितः=समागात् । सोऽयम्=प्रख्याततमः, राजर्षिः=राजसु ऋषिरिवाचरणवान्, ब्रह्मनियोगेन—ब्रह्मणः=प्रजापतेः, नियोगेन=आदेशेन, स्वपरीक्षार्थम्=आत्मनः परीक्षां कर्तुम्, समागतौ=प्राप्तौ, श्येनकपोतरूपौ—श्येनस्य=बाजपक्षिणः, कपोतस्य=कपोतपक्षिणस्य, धृतरूपौ, इन्द्राग्नी=पाकशाशनो वह्निश्च, स्वौदार्येण=आत्मनो वदान्यतया, परितोषयामास=परितोषितौ चकार । श्येनस्य=बाजपक्षिणः, उदरभरणार्थम्=जठरं परिपूर्णं कर्तुम्, सः=शिविः, कपोतभरसमम्=कपोतस्य भारेण सदृशम्, मांसम्=पललम्, स्वशरीरात्=आत्मनः शरीरात्, उत्कृत्य=निष्कास्य, अर्पयन्=समर्पयन्, तस्य=कपोतभारसमस्य, पूर्तिम्=पूर्णताम्, अदृष्ट्वा=अनवलोक्य, आत्मनः=स्वीयम्, सम्पूर्णम्, शरीरमेव=देहमेव, तुलया धारया-श्चक्रे=तुलायां स्थापितवान् । शिवेः=राजर्षेः शिवेः, परीक्षया=परीक्षणेन, प्रभावप्रकर्षोद्बोधेन—प्रभावस्य=अनुभावस्य, यो हि प्रकर्षः=समुत्कर्षः, तस्य उद्बोधेन=प्रज्ञानेन, लोकः=जगत्, परोपकारपथम्=परोपकारस्य मार्गम्, पुण्यतमम्=अतिशयेन पुण्यावहम्, स्वीकुरुते=स्वीकरोति । इति=इत्यनेन, हरिश्चन्द्रस्य, सर्वातिशायिनी=सर्वोत्कृष्टा, वृत्तिः=प्रवृत्तिः, बली-यसी=बलवती, बभूव=सञ्जाता ।

(३५) त्रैलोक्यस्य वैषम्यं निवारयितुं······स्वमनोगतमुवाच ।

सन्दर्भप्रसङ्गौ—अयं गद्यखण्डः सत्यहरिश्चन्द्रोदयनामकस्य गद्यकाव्यस्य हरिश्चन्द्रस्य परीक्षासङ्कल्पनामकादष्टमात् प्रकरणात् परिगृहीतो वर्त्तते। मुनीनामादेशात् राजा हरिश्चन्द्रो विश्वस्य धर्मविजययात्रामकार्षीत् विद्वद्भिः

शिल्पकलानिपुणैः महात्मभिश्च साकम् । राजा सर्वप्रथमं नैमिषारण्यं गत्वा तत्र मासमेकमुषित्वा सर्वेषां मुनीनाम् आश्रमाणां दर्शनं कृत्वा अवलोक्य च दधीचर्षेराश्रमम्, दृशद्वतीसरस्वत्योरन्तराले स्थिते कुरुक्षेत्रेऽगमत् । तत्र मान्धातुराश्रममवलोक्य विलोक्य च शिबेराश्रमं हर्षप्रकर्षमनुबभूव । पुनः सः सम्पूर्णेषु राष्ट्रेषु धर्मविजयस्य सन्देशं प्रेषयित्वा, कृत्वा च सर्वत्र सर्वेषां जनानां सर्वविधमुपकारं संस्थाप्य च सर्वत्र गुरुकुलानि, लोकानां नानाप्रकारकाण्युपकाराणि रचयामास । ब्रह्माविष्णुशिवादिकाः देवा विश्वस्य संरक्षणे सञ्चालने च सर्वदा जागरूकाः सन्ति । देवर्षिर्नारदः सर्वेषां वृत्तानां सङ्कलनं कृत्वा सर्वदा श्रावयति लोकवृत्तान्तम् । सत्ययुगस्यान्तेऽपि लोकवृत्तान्तस्य जिज्ञासया देवर्षिः नारदो मेरुपर्वते आगत्य एकान्ते ब्रह्माणमवाप्य स्वपितरं स्वमनोगतमुवाच ।

व्याख्या—त्रैलोक्यस्य=लोकत्रयस्य, वैषम्यम्=कष्टम्, निवारयितुम्=अपाकर्तुम्, त्रिभुवनपतयः=भुवनत्रयस्य स्वामिनः, ब्रह्माविष्णुशिवादयः=प्रजापतिनारायणशङ्करादिकाः, नितराम्=अतिशयेन, ध्यानपराः=सावधानाः, जागरूकाश्च, सन्ति=वर्त्तन्ते । ब्रह्मणः=सर्वलोकपितामहस्य, सूनुः=आत्मजः, नारदः=देवर्षिः, भुवनत्रयभ्रमणेन=त्रिभुवनस्य भ्रमणकरणेन लोकवृत्तम्—लोकस्य=जगतः, वृत्तम्=वृत्तान्तम्, सङ्गृह्य=सङ्ग्रहं कृत्वा, यथायोगम्=यथायथम्, मेरुशिखरे=सुमेरुपर्वतस्य शृङ्गाटके, ब्रह्मादिकम्=ब्रह्माविष्णुशिवादिकम्, निवेद्य=निवेदयित्वा, ब्रह्माण्डस्य=सम्पूर्णस्य लोकस्य, सुपथसञ्चारणेन—सुपथे=सुमार्गे, सञ्चारणेन=सञ्चालनेन, आत्मानम्=स्वम्, कृतार्थयति=कृतार्थं करोति । सत्ययुगावसाने—सत्ययुगस्य=कृतयुगस्य, अवसाने=अन्ते, त्रेतायाम्=त्रेतानामके युगे, लोकाः=जीवाः, कथम्=केन प्रकारेण, विहरन्ति=विहरणं कुर्वन्ति ? इति=इत्येतत्, जिज्ञासया=ज्ञातुमिच्छया, परिभ्रम्य=परिभ्रमणं कृत्वा, सः=प्रख्यातो देवर्षिः, मुनिः=मननशीलः, परावरज्ञम्=सर्वज्ञम्, अथवा परे अवरा यस्याऽसौ परावरः=परमात्मा, तं जानातीति परावरज्ञः, तम्=परमात्मतत्त्वाधिगन्तारम्, ब्रह्माणम्=लोकपितामहम्, अभ्युपेत्य=समागत्य, स्वमनोगतम्=आत्मनः स्थितं भावम्, उवाच=अवोचत् ।

(३६) तात ! युगान्ते सति न·····भूमानमनुबभूवुः ।

सन्दर्भप्रसङ्गौ—अयं गद्यखण्डः सत्यहरिश्चन्द्रोदयनामकस्य गद्यकाव्यस्याऽस्मात् प्रकरणात् परिगृहीतो वर्त्तते । राजा हरिश्चन्द्रो विश्वस्य धर्मविजय-

यात्रामकार्षीत्। अस्मिन् प्रसङ्गे सः नैमिषारण्यकुरुक्षेत्रयोर्दर्शनं तु मुख्यरूपेणाकार्षीत् अन्यत्र सर्वत्र स्वजनैः स्वसन्देशं प्रेषितवान्। विश्वस्य कष्टनिवारणे सततं जागरूकाः ब्रह्माविष्णुशिवादिकाः देवाः, नारदं देवर्षिं लोकवृत्तान्तं सङ्ग्रहीतुं कृतयुगस्यान्ते प्रेषयामासुः। लोकवृत्तान्तं ज्ञात्वा देवर्षिर्नारद एकान्ते ब्रह्माणमाह यत् सत्ययुगे तु जनाः सत्यपरायणा अभूवन् किन्तु त्रेतायुगे तादृशी स्थितिर्नास्ति।

व्याख्या—नारदो देवर्षिः ब्रह्माणं वक्ति—तात=पितः! युगान्ते=कृतयुगस्यान्ते सञ्जाते सति, कृतयुगस्य=सत्ययुगस्य, छाया=प्रतिबिम्बं, न=नहि, प्रतिफलति=प्रतिबिम्बितं भवति। सत्ययुगे=कृतयुगे, सर्वाः=सकलाः, प्रजाः=जनाः, सदायतनाः—सत्=सत्यमेवायतनम्=आश्रयः, यासां तथाविधाः, सत्यप्रतिष्ठा=सत्ये प्रतिष्ठा यासां तथाविधाः, पारमिताप्रपन्नाः—पारमिताः=पारङ्गताः परमात्मात्मशरणाः, पारमार्थिकाः=सत्यगवेषणपरायणाश्च, आसन्=अभूवन्। लोकः=जनः, आत्मानम्=स्वम्, सत्यम्=पारमार्थिकं, कुरुते स्म=सम्पादयति स्म। सर्वेषाम्=निखिलानां, भूतानां=जीवानाम् मधु=परमं भोग्य आसीत्, सत्यम्=सत्यपालनमेवासीत्=अभूत्। किन्तु अधुना=साम्प्रतम्, समागते त्रेतायुगे, प्रभूताः=बहवः, जनाः=मनुष्याः, सत्यं विना=सत्येन रहितत्वात्, सत्यपथात्=सत्यस्य मार्गात्, च्यवन्ते=स्खलिताः भवन्तिः। प्रभो=स्वामिन्! भवता=प्रजापतिना, सर्वे=सभे, लोकाः=जीवाः, धर्मनिकेतनीकृताः=धर्माश्रिताः कृताः, यत्र=यस्यामवस्थायां, सर्वम्=निखिलं वस्तु, सर्वेषाम्=सम्पूर्णानां जनानाम्, उपभोगाय, स्यात्=भवेत्। तत्र=सत्ययुगे, किमपि वस्तु, कस्यचित्=कस्यचन, एकस्य=पुरुषविशेषस्य, नासीत्=नाभवत्। अत एव=एतस्मादेव कारणात्, सर्वे=सम्पूर्णाः जनाः, निकामम्=भृशम्, पूर्णाः=परिपूर्णाः, आसन्=अभूवन्। परान्=स्वव्यतिरिक्तान्, सर्वान्=निखिलान्, जनान्, यथासुखम्=यथेष्टम्, सम्भरन्तश्च=पारिपालयन्तश्च, ते भूमानम्=वैपुल्यम्, अनुबभूवुः=अनुभवन्ति स्म।

(३७) नारदस्य वचः परमार्थेन ·····तानधोविधं सम्बोधयामास।

सन्दर्भप्रसङ्गौ—अयं गद्यखण्डः सत्यहरिश्चन्द्रोदयनामकस्य गद्यकाव्यस्याष्टमात् प्रकरणात् परिगृहीतो वर्तते। लोकवैषम्यनिवारणविषये सततं सावधानाः भवन्ति ब्रह्माविष्णुशिवादयः। ब्रह्मपुत्रो नारदः सर्वदा लोकवृत्तान्तं

सङ्गृह्य ब्रह्माणं श्रावयति । सत्ययुगस्यान्ते देवर्षिर्नारदः लोकवृत्तान्तस्य जिज्ञासया मानवलोकं गत्वा ज्ञात्वा च लोकवृत्तान्तमेकान्ते ब्रह्माणमाह यत् साम्प्रतं लोके सद्वृत्तेरभावो जायते । राजानोऽपि कामक्रोधवशङ्गताः सन्ति, का कथा सामान्यानां जनानाम् । अत एव तेषां समक्षं महतामादर्शस्य संस्थापना अनिवार्या वर्त्तते ।

ब्रह्मा नारदस्य वचो निशम्य लोककल्याणविषये ब्रह्मसभायाः सदस्यान् शीघ्रमेव ध्यानयोगेनाह्वयामास । श्रावयामास च नैजीं लोकविषयिणीं चिन्ताम् ।

व्याख्या—नारदस्य=स्वात्मजस्य, वचः=वचनम्, परमार्थेन=सत्यरूपेण, गृहीत्वा=मनसि निधाय, तत्र मानवलोके=मर्त्यलोके, कश्चित्=कोऽपि, अपचारः=दोषः, वर्धते=वृद्धिमेति, इत्यनेन=इत्येतत्प्रकारेण, विचारेण, क्षणम्=क्षणकालं यावत्, संविग्नमानसः=उद्विग्नचेताः, विधाता=ब्रह्मा, किं करणीयम्=लोकस्य कल्याणाय मया किं सम्पादनीयम्, इति=इत्येतत्, विमर्शम्=विचारम्, उद्दिश्य=उद्देश्यं कृत्वा, सर्वज्ञस्यापि=सर्वमवगच्छतोऽपि, एकाकिनः=असहायस्य, निर्णयाभ्युपगमः=निर्णयकरणम्, दोषाय=दोषजननाय, भवतीति, नीतिम्=नियमम्, अनुसरन्=अनुसरणं कुर्वन्, ध्यानयोगसञ्चारितेन—ध्यानयोगेन सञ्चारितेन=प्रचारितेन, संवादेन=समाचारेण द्वारा, ब्रह्मसंसदः=ब्रह्मसभायाः, देवर्षिपुरोगान्=नारदप्रमुखान्, सदस्यान्=आगन्तॄन्, अकेतयत्=संसूचितानकार्षीत् । सर्वे=निखिलाः, ते=ब्रह्मसभासदस्याः, समागताः=सम्मिलिताः, अचिरमेव=शीघ्रमेव, आदिदेवम्=प्रधानदेवं ब्रह्माणम्, मण्डलायमानाः=मण्डलं कुर्वाणाः, न्यविशन्त=उपाविशन् । तेषाम्=ब्रह्मसंसदः सदस्यानाम्, उपस्थित्या=आगत्या, सत्त्वोद्रेकेण—सत्त्वगुणस्य उद्रेकेण=प्रवृद्धया, ब्रह्मलोकः=प्रजापतेर्लोकः, समष्टिशः=सम्पूर्णतया, नितराम्=अतिशयेन, वैपुल्यम्=विपुलताम्, अवाप=प्राप्तवान् । ब्रह्मा=प्रजापतिः, तेषाम्=समागतानां सदस्यानाम्, पुरतः=पुरः, ससारम्=सारांशेण सहितम्, नारदवचःसारम्=देवर्षेः कथनस्याभिप्रायम्, पुरस्कृत्य=समर्थयित्वा, लोकः=जगत्, सत्यात्=सत्यस्य पालनात्, मा=नहि, विरजेत्=विमना भवेत्, इति=इत्येतत्, सापेक्षोपायम्=उपायस्यापेक्षया, प्रस्तावयितुम्=प्रस्तावनां कर्तुम्, तान्=समागतान्, ब्रह्मसभायाः सदस्यान्, अधोविधम्=निम्नप्रकारेण, सम्बोधयामास=सम्बोधितान् चकार ।

(३८) भो ब्रह्मर्षे ! युगेऽस्मिन्……परामर्शेन निश्चेतुमर्हतीति।

सन्दर्भप्रसङ्गौ—अयं गद्यखण्डः सत्यहरिश्चन्द्रोदयनामकस्य गद्यकाव्यस्याष्टमात् प्रकरणात् परिगृहीतो वर्त्तते । त्रेतायुगस्यान्ते ब्रह्मणो निदेशेन लोकवृत्तान्तं सङ्गृह्य देवर्षिर्नारदो ब्रह्माणमेकान्ते प्राह यत् साम्प्रतं सत्ययुगस्य छाया नहि प्रतिफलति । जनाः सत्यस्योपेक्षां कुर्वन्ति । राजानोऽपि कामक्रोधयोः परतन्त्राः दृश्यन्ते । अत एव लोककल्याणाय लोकानां समक्षं महतामादर्शस्य स्थापनाऽनिवार्या प्रतीयते । नारदवचोऽवितथं मत्त्वा प्रजापतिः ब्रह्मसभामकारयामास, समेषां सदस्यानां समक्षं लोकसङ्ग्रहविषयिणीं नैजीं चिन्तां श्रावयित्वा लोककल्याणानुकूलमुपायं गवेषितुं तानाह । सदस्याश्च सम्भूय निर्णीतवन्तो यत् सूर्यवंशस्य परमो हितकारी ब्रह्मर्षिः विश्वामित्रो राज्ञो हरिश्चन्द्रस्य सत्यपरीक्षणं करोत्विति ।

व्याख्या—देवाः ब्रह्मर्षि विश्वामित्रमाहुः—भो=हे, ब्रह्मर्षे=विश्वामित्र ! अस्मिन्=एतस्मिन्, युगे=काले, त्रेतायुगे इति यावत्, मानवलोके=मर्त्यलोके, सूर्यवंशीयानाम्=सूर्यवंशे समुत्पन्नानाम्, सम्राजाम्=चक्रवर्तिनाम्, विनयाधानात्=नम्रताया आधानात, सताम्=सज्जनानाम्. समृद्धिः, अल्पप्रभाम्=न्यूनप्रकाशवतीम्, अधिकरोति=अतिशयेन सम्पादयति । यदि नाम=चेत्, सत्त्वादीनाम्=सत्त्वगुणप्रभृतीनाम्, आत्मगुणानाम्=आत्मनो गुणानाम्, प्रचयः =विस्तारः, न=नहि, विधास्यते=करिष्यते । तर्हि=तदा, सत्त्वप्रकाशः=सत्त्वगुणस्यालोकः, क्षयिष्यते=क्षयमेष्यति । भवान्=ब्रह्मर्षिः विश्वामित्रस्तु, सूर्यवंशस्य=इक्ष्वाकुवंशस्य, संवर्धकः=संवर्धनकर्ता, अत एव तथा=तेन प्रकारेण, प्रयतताम्=प्रयत्नं करोतु भवान्, यथा=येन, लोके=जगति, तस्य=सूर्यवंशस्य, सम्राजाम्=चक्रवर्तिनां राज्ञाम्, सत्त्वावदानम्=सात्त्विकं सहयोगम्, नित्यम्=प्रतिदिनम्, उपचीयेत=उपचितं स्यात् । एतदर्थम्=एतस्मै प्रयोजनाय, सम्राजाम्=चक्रवर्तिनां राज्ञाम्, सत्त्वोत्कर्षः=सत्त्वगुणस्योत्कर्षः, ब्रह्मबलेन, साधनीयः=संवर्धनीयः ।

अधुनातनम्=साम्प्रतम्, भुवनत्रयतिलकम्=त्रिभुवनस्यालङ्कारस्वरूपम्, महाराजम्=नृपम्, पुंरत्नम्—पुंसु=मानवेषु, रत्नम्=रत्नवत् सर्वश्रेष्ठम्, हरिश्चन्द्रम्=एतन्नामानं महाराजम्, भवान्=ब्रह्मर्षिः, विश्वामित्रः, भूयिष्ठम्=अत्यधिकम्, उच्छ्रयेत्=उन्नतिं गमयेत् । येन=कर्मणा, यावच्चन्द्रदिवाकरौ=सूर्याचन्द्रमसौ यावद् देदीप्यमानौ, भवतः तावत्कालपर्यन्तम्, तस्य=हरिश्चन्द्रस्य,

सत्त्वप्रकाशः=सत्त्वगुणस्यालोकः, अखिललोकम्=सम्पूर्णं जगत्, सत्पथम्=सन्मार्गम्, दर्शयेत्=प्रकाशयेत् । स एव=हरिश्चन्द्र एव, सत्यस्य=सत्यवादितायाः, रक्षणाय=पालनाय, सम्यक्=सम्यग्रूपेण, कल्पते=समर्थो वर्त्तते । अस्मिन्=एतस्मिन्, प्रकरणे=विषये, भावियोजनाविधानम्—भाविन्याः=भविष्यति काले जायमानायाः, योजनायाः=कार्यसंयोजनायाः, विधानम्=स्वरूपम्, भवानेव=विश्वामित्र एव, ब्रह्मणः=प्रजापतेः, परामर्शेण=मन्त्रणया, निश्चेतुम्=निश्चितं कर्तुम्, अर्हति=क्षमोऽस्ति ।

(३९) महामुने ! गुणाकरस्य······प्रतिश्रुत्य निर्जगाम ।

सन्दर्भप्रसङ्गौ—अयं गद्यखण्डः सत्यहरिश्चन्द्रोदयनामकस्य गद्यकाव्यस्याष्टमात् प्रकरणात् परिगृहीतो वर्तते । यदा लोकवृत्तान्तं सङ्गृह्यैकान्ते देवर्षिः नारदो ब्रह्माणं श्रावयामास यत् मर्त्यलोके जनाः साम्प्रतं सत्पथात् च्यवन्ते तदा प्रजापतिः चिन्तितः सन् ब्रह्मसभामाह्वयामास । सदस्यानां समक्षं सः लोककल्याणविषयिणीं स्वकीयां चिन्तां प्रकटयामास । समे सदस्याः समेत्य निर्धारयामासुः यत् साम्प्रतं राजा हरिश्चन्द्रो लोकेऽस्मिन् शेखरायते । अत एव सूर्यकुलस्य संवर्धको ब्रह्मर्षिः विश्वामित्रः तस्य सत्यस्य परीक्षणं करोतु । पुनर्ब्रह्मर्षिः ब्रह्माणमाजगाम । ब्रह्मणाप्यभिहितं यत् साम्प्रतं भवतैव तस्य राजर्षेः प्राणपणं परीक्षणं करणीयम् । तच्छ्रुत्वा तथा कर्तुं निश्चित्य ब्रह्मर्षिः ततो निर्जगाम ।

व्याख्या—महामुने=ब्रह्मर्षे विश्वामित्र ! गुणाकरस्य=गुणानां सागरस्य, हरिश्चन्द्रस्य=एतन्नामकस्य सूर्यवंशीयस्य राज्ञः, सत्त्वप्रकाशः=सत्त्वगुणस्य प्रकाशः, तु, लोके=जगति, विदित एव=प्रख्यात एव, सूर्यवंशीयाः=सूर्यवंशे समुद्भूताः, राजानः=नृपाः, धर्मचक्रप्रतीकात्=धर्मचक्रस्य प्रतीकभूतात्, सूर्यादेव=भास्करादेव, सतः, पुरोगतिम्=अग्रेगतिम्, लब्ध्वा=प्राप्य, सत्यपरायणः=सत्यपालनसंरताः, संराजन्ते=विराजन्तेतराम् । एतर्हि=इदानीम्, हरिश्चन्द्रस्य, समुन्नयनम्=समुन्नतिकरणं तु, भवतः=विश्वामित्रस्य, भरः=भारः, इति=इत्येतत्, देवर्षिभिः=देवैः ऋषिभिश्च, साधु=समुचितम्, निरणायि=निर्णयं कृतम्, भवता=विश्वामित्रेण, एतत्=हरिश्चन्द्रपरीक्षणकार्यम्, केन प्रकारेण=केन विधिना, निष्पादनीयम्=सम्पादनीयम्, केवलम्=मात्रम्, हरिश्चन्द्रस्य=अयोध्याधिपतेः, एव, न, अपितु=किन्तु, भवतः=विश्वामित्रस्यापि, दुःसाध्यः=दुष्करः, पन्थाः=मार्गः । केवलेन=मात्रेण, भूयिष्ठेनापि=अत्यधिकेनापि, ख्यातिमात्रेण=यशोमात्रेण, हरिश्चन्द्रस्य=

अयोध्याधिपस्य, सत्यपरायणता=सत्यपालनसंरतता, लोकान्=जनान्, न=नहि, प्रभावयिष्यति=प्रभावितान् करिष्यति, दुःसाध्यपरीक्षया—दुःसाध्या=कठिना, चासौ परीक्षा तया, निकषितम्=शाणायितम्, शाश्वतमेव=सर्वकालमेव, लोकान्=जनान्, समुद्धरिष्यति=समुद्धृतान् करिष्यति। इति=इत्येतत्, अहम्=ब्रह्मा, योगदृष्ट्या=योगस्य बलेन, प्रत्यक्षमिव=अपरोक्षमिव, प्रपद्ये=जानामि। पुराकल्पेऽपि=प्राचीने कल्पेऽपि, शिबिदधीच्यादीनाम्, महात्मनाम्=सज्जनानाम्, प्राणपणम्=प्राण एव पणो यत्र तथाविधम्, परीक्षणम्=परीक्षा, लोकोद्धरणहेतुना=लोकस्योद्धाराय, देवैः=देवताभिः, मम=ब्रह्मणः, निदेशेन=आज्ञया, अनुष्ठितम्=कृतम्। तेषाम्=दधीचशिब्यादीनां महात्मनाम्, चरितगाथा—चरितस्य=चरित्रस्य, गाथा=गानम्, केवलम्=मात्रम्, गीयते=गानं क्रियते, न=नहि, अपितु=किन्तु, सर्वकालम्=सर्वदा, सत्पथगामिभिः सन्मार्गगामिभिः, सोत्साहसङ्कल्पेन—उत्साहेन सहितं सोत्साहम्=उत्साहपूर्वकं, कृतेन सङ्कल्पेन=प्रतिज्ञया, मनसा=हृदा, ध्रियते=धारणं क्रियते। अत एव=एतस्मादेव हेतोः, भवान्=विश्वामित्रः, त्वरताम्=शीघ्रतां करोतु, देवैः=सुरैः, सह=साकम्, लोकसङ्ग्रहकाम्यया=लोकस्य कल्याणं कर्तुमिच्छया, हरिश्चन्द्रस्य=अयोध्याधिपतेः, सत्पथे=सन्मार्गे, परीक्षणाय=परीक्षणं कर्तुम्। इति। विश्वामित्रोऽपि=विश्वामित्रमहर्षिरपि, यथा=येन प्रकारेण, नियुक्तोऽस्मि=निदेशितोऽस्मि, तथा=तेनैव प्रकारेणाहम्, करिष्यामि=अनुष्ठास्यामीति, प्रतिश्रुत्य=प्रतिज्ञां कृत्वा, निर्जगाम=निर्ययौ।

(४०) आत्मगुणैः पृथिवीं मण्डयतो ······ अयोध्यां प्रतीयाय।

सन्दर्भप्रसङ्गौ—अयं गद्यखण्डः सत्यहरिश्चन्द्रोदयनामकस्य गद्यकाव्यस्य हरिश्चन्द्रपरीक्षासङ्कल्पनामकादष्टमात् प्रकरणात् परिगृहीतो वर्त्तते। लोककल्याणकामनया लोकानां समक्षं महतामादर्शमुपस्थापयितुं ब्रह्मा ब्रह्मसभामकार्षीत्। सभायां सदस्यानां समक्षं लोककल्याणोपयुतादर्शसंस्थापनार्थं प्राह च देवान् समेतान्। सदस्यैः निर्धारितं यत् ब्रह्मर्षिः विश्वामित्रो हरिश्चन्द्रस्य सत्पालनस्य प्राणपणं परीक्षणं करोतु येन तस्य त्रैलोक्ये यशो विपुलायते। ब्रह्माप्यस्य मतस्य समर्थनमकार्षीत्। ततो विश्वामित्रेण विचारितं यत् यद्यपि परीक्षणेनानेन मम यशस्तु ह्रास्यति किन्तु लोककल्याणाय सूर्यवंशीयस्य हरिश्चन्द्रस्य संवर्धनाय चेदं कार्यमहं नूनं करिष्यामीति।

व्याख्या—ब्रह्मर्षिविश्वामित्रो विचारयति यत्—आत्मगुणैः=सौशील्य-

दयादानादिकैः, पृथिवीम् = भूतलम्, मण्डयतः = समलङ्कृतां कुर्वतः, हरिश्चन्द्रस्य, परीक्षणम् = परीक्षाकरणम्, तु, मम = विश्वामित्रस्य, यशः = कीर्तिम्, क्षाययिष्यति = क्षीणं करिष्यति, तथापि = अथापि, तथाविधाम् = तादृशीं, तस्य = हरिश्चन्द्रस्य, योग्यताम् = अर्हताम्, विलोक्य = दृष्ट्वा, भूयसाम् = बहूनां जनानाम्, विश्वतः = सर्वप्रकारेण, समुन्नयनम् = समुन्नतिकरणम्, प्रतीष्यमाणेन = वाञ्छता, ब्रह्मणा = प्रजापतिना, अस्मिन् = एतस्मिन्, कर्मणि = कार्ये, नियुक्तोऽस्मि = निदेशितोऽस्मि, इति = इत्यनेन प्रकारेण, मनसा = हृदा, दृढम् = दाढर्येन, सन्धार्यं = निश्चाय्य विश्वामित्रः = ब्रह्मर्षिः, तस्य = ब्रह्मणः, आदेशम् = आज्ञाम्, शिरोधार्यं = शिरसा धारणं कृत्वा, देवानाम् = सुराणाम्, साह्येन = सहायतया, हरिश्चन्द्राय = अयोध्याधिपतये, विपदाम् = विपत्तीनाम्, अतिप्रबन्धनम् = अतिशयेन प्रबन्धम्, विधातुम् = कर्तुम्, तस्य = हरिश्चन्द्रस्य, राजधानीम्, अयोध्याम्, प्रतीयाय = प्रतिययौ ।

(४१) एतदर्थं प्रसङ्गतः पृथिवी ····राजसूयमुपतस्थिरे ।

सन्दर्भप्रसङ्गौ—अयं गद्यखण्डः सत्यहरिश्चन्द्रोदयनामकस्य गद्यकाव्यस्य नवमात् खण्डात् परिगृहीतो वर्त्तते । राजा हरिश्चन्द्रो महर्षीणामाज्ञया विश्वस्य धर्मेण विजययात्रां महात्मभिः विद्वद्भिः, शिल्पकलानिपुणैः साकमकार्षीत् । यदा विश्वविजययात्रा सम्पूर्णाऽभवत् तदा राजा यात्राया अन्ते—राजसूययज्ञस्यायोजनमकार्षीत् । तत्र सर्वेषां राष्ट्राणां प्रख्याताः कलाकृतयः प्रदर्शनीषु अगुः । पण्डितानां सभा समायोजिताऽभवत्, यत्र ते ते विद्वांसः सर्वासां शङ्कानां समाधानं कृतवन्तः । तत्र यागे समागतानां निवासाय आवसथस्य समुचिता व्यवस्थाऽऽसीत् ।

व्याख्या—एतदर्थम् = एतस्य प्रयोजनस्य राजसूययज्ञानुष्ठानरूपस्य सिद्धये, प्रसङ्गतः = प्रसङ्गवशात्, पृथिवीमण्डलस्य = भूमण्डलस्य, सर्वेषाम् = निखिलानाम्, राष्ट्राणाम् = देशानाम्, महीक्षितः = राजानः, प्रजानाम् = प्रकृतिजनानां, केनचित् = केनापि, अभिनवेन = नवीनेन, उत्साहेन = समुत्साहेन, अधिगतां = प्राप्ताम्, ज्ञानविज्ञानोपलब्धिम् = सामान्यज्ञानविशेषज्ञानानां सम्प्राप्तिम्, हरिश्चन्द्राय = नृपतये, साक्षात् = प्रत्यक्षम्, विज्ञापयितुकामाः = विज्ञापयितुमिप्सवः, तत्तद्विषयाणाम् = तेषां तेषां विषयाणाम्, विशेषज्ञान् = विशेषरूपेणाभिज्ञान्, तेषाम् = विशेषज्ञानां, कलाकृतीश्च = रचनाश्च गवेषणा वा समानेतुम् = उपनेतुम्, आमन्त्रिताः = आहूताः अभूवन् । तत्र चतुष्षष्टिकलागमप्रयोग-

विदाम्=चतुष्षष्टिसंख्याकानां कलानाम्, आगमानां प्रयोगाणां च ये विदः तेषाम्, सर्वोत्कृष्टाः=सर्वोत्तमाः रचनाः, प्रदर्शनीषु, स्थापिताः=संस्थापिताः, केवलम्=मात्रम्, लोकरञ्जिकाः—लोकानाम्=जनानाम्, रञ्जिकाः=मनोरञ्जनसम्पादिकाः, न=नहि, बभूवुः=सञ्जाताः, अपितु=किन्तु, प्रतिभोन्मेषयुतानाम्—प्रतिभायाः=नवनवोन्मेषशालिन्याः प्रज्ञायाः, यो हि उन्मेषः=उन्नतिः, तया युतानाम्=सम्पन्नानाम्, शिष्याणाम्=छात्राणाम्, प्रशिक्षणाय=प्रशिक्षणं दातुम्, बहु=अतिशयेन, उपाकुर्वन्=उपकारं कुर्वन्ति स्म। पण्डितपरिषदि—पण्डितानां=तत्त्वज्ञानाम्, परिषदि=समितौ, विद्वद्भिः=तत्तद्विषयविशेषज्ञैः, स्व-स्वविद्याविशेषेषु=स्वकीयेषु विद्याविशेषेषु, असमाहितशङ्काः—असमाहिताः=अनुत्तरिताः, याः शङ्काः=सन्देहाः, ताः अन्येषाम्=तद्भिन्नानाम्, विशेषज्ञानाम्, अनुग्रहेण=कृपया, समाधायि=समाहिता अभूवन्। कलाकलापालोचनकठोरमतयः—कलानाम्=चतुष्षष्टिसंख्याकानाम्, यो हि कलापः=समूहः, तस्य आलोचने=पर्यालोचनक्रियायाम्, कठोराः=कठिनाः, परिपक्वेति भावः, मतयः=बुद्धयः, येषां ते तथाविधाः, सङ्गीतनृत्यनाट्यविदः—सङ्गीतस्य=गानविद्यायाः, नृत्यस्य=नर्तनकलायाः, नाट्यस्य=अभिनयकलायाः, विदः=अभिज्ञाः, पौराणिकाः=पुराणानामष्टादशसंख्याकानां विद्वांसः, इन्द्रजालिकाः=सम्मोहनापरपर्यायभूतायाः इन्द्रजालविद्यायाः अभिज्ञाः, मल्लाश्च=मल्लविद्याभिज्ञाः, स्वकलानाम्=स्वाधीतानां कलानाम्, विशेषैः=सर्वोत्तमैः, प्रयोगैः=प्रदर्शनैः, प्रतियोगितासु=स्पर्धासु, सर्वेषाम्=निखिलानाम् वर्णाश्रमाणाम्—वर्णानाम्=ब्राह्मणक्षत्रियवैश्यशूद्राणाम्, आश्रमाणाम्=ब्रह्मचर्यगार्हस्थ्यवानप्रस्थसंन्यासाभिधानाम्, जनताः=जनसमूहः, वनवासिनश्च=वनेचरांश्च, रञ्जयन्ति स्म। महाजनाः=महान्तो जनाः, आवसथगणकचक्रक-पानारोग्य-व्यवस्थया—आवसथस्य=निवासस्य, गणकचक्रकस्य=सहभोजस्य, पानस्य=पेयपदार्थस्य, आरोग्यस्य=स्वास्थ्यस्य च, व्यवस्थया=व्यवस्थाद्वारा, सुखम्=सुखपूर्वकम्, राजसूयम्=एतन्नामकं यागम्, उपतस्थिरे=उपस्थिता अभूवन्।

(४२) उपात्तयज्ञो हरिश्चन्द्रो······कोशपतिमादिदेश।

सन्दर्भप्रसङ्गौ—अयं गद्यखण्डः सत्यहरिश्चन्द्रोदयनामकस्य गद्यकाव्यस्य नवमात् प्रकरणात् परिगृहीतो वर्त्तते। धर्मेण विश्वविजययात्राया अन्ते राजा हरिश्चन्द्रो राजसूयस्य यागस्यायोजनमकार्षीत्। तत्र सर्वेषां राष्ट्राणां महीक्षितः

स्वदेशस्य विशेषाणां विदुषां कलाकृतीः प्रेषयामासुः। ताः सर्वा प्रदर्शन्यां संस्थापिता अभूवन्। पण्डितानां सभायां सर्वासामसमाहितानां तत्तद्विषयिणीनां शङ्कानां समाधानं कृतमभूत्। तत्र भोजनपानादिकस्य व्यवस्थातिसमीचीना आसीत्। यागे राजा हरिश्चन्द्रो यज्ञस्य पत्नी दक्षिणा इति न्यायं स्मारं स्मारं 'हतो यागोऽदक्षिणः' इति संस्मृत्य विपुलं दक्षिणादिकं ददौ। यज्ञान्तस्नानेन हरिश्चन्द्रस्य महाराजपदेऽभिषेको यदा समारब्धो बभूव तदैव महाप्रभावोऽपि ब्रह्मर्षिः विश्वामित्रः किञ्चिन्निःश्रीक इव सम्भूय तत्रागत्य दक्षिणार्थ्यहमिति उच्चैरुदाजहार। समागतस्य मुनेः सम्यक् समर्चां विधाय राजा मुनये लक्षं सुवर्णमुद्राः दातुं कोशपतिमादिदेश।

व्याख्या—उपात्तयज्ञः—उपात्तः=प्रारब्धः, यज्ञो येनाऽसौ तथाविधः, हरिश्चन्द्रः=अयोध्याधिपः, दानदक्षिणादिकम्=याचकेभ्यो ऋत्विगादिभ्यश्च प्रदेयम्, अभीष्टात्=अभिप्रेतात्; पञ्चगुणम्=पञ्चकृत्वः, प्रददौ=प्रादात्। तस्य=राजर्षेः हरिश्चन्द्रस्य, राजकोशजातम्=राज्यस्य कोशसमूहः, निःशेषम्=सम्पूर्णम्, सर्वंगतम्=सार्वजनिकम्, बभूव=सञ्जातम्। तदनन्तरम्=तस्य पश्चात्, अवभृथेन=यज्ञान्तस्नानेन, उपाध्यायामात्यप्रकृतिजनसमक्षम्—उपाध्यायानाम्=अध्यापकानाम्, अमात्यानाम्=मन्त्रिणाम्, प्रकृतिजनानाम्=पौरजानपदानाम्, समक्षम्=पुरस्तात्, तस्य=हरिश्चन्द्रस्य, सम्राट्पदे=चक्रवर्तिपदे; अभिषेकस्य=संस्थापनस्य, क्रमः=पुरोग्रामः, समारब्धः=प्रारब्धो बभूव। तस्मिन् क्षणे=सम्राट्पदेऽभिषेकस्यैवावसरे, तडिदिव=विद्युदिव; समापत्य=समागत्य, तत्र=राजसूये यागे, उग्रतेजाः—उग्रम्=अतीवतीव्रम्, तेजः=प्रतापः, यस्याऽसौ तथाविधः, अपि, किञ्चित्=ईषत्, निःश्रीक इव=निस्तेज इव, विश्वामित्रः=एतन्नामा ब्रह्मर्षिः, कुलपतिः=गुरुकुलस्याधिष्ठाता, दक्षिणार्थी=दक्षिणां लब्धुमिच्छुः, अहम्=विश्वामित्रः, आगाम्=आगतोऽस्मि, इति=इत्यनेन प्रकारेण, तारस्वरेण=दीर्घस्वरेण, उज्जहार=अवोचत्। सर्वे=निखिलाः, राजानः=महीक्षिताः, पीठाधिकारिणश्च=पीठाधीशाश्च, आसनात्=स्वासनात्, उत्थाय=उत्थिता भूत्वा, तस्मै=विश्वामित्राय, स्वागतम्=सत्कारवचनम्, व्याजह्रुः=उच्चारयामासुः।

अस्माकम्=समागतानां नृपतीनाम्, परमसौभाग्येन=अतीवानुकूलेन दैवेन, अयम्=एषः, ब्रह्मक्षत्रनिधिः—ब्रह्मबलस्य क्षत्रियबलस्य च निधिः=आकरः, महामुनिः=विश्वामित्रः, नेत्रातिथिः=दृष्टिगोचरः, सञ्जातः=

बभूव । हि=निश्चयेन, महामुनीनाम्=महातपस्विनाम्, नामग्रहणम्=नामोच्चारणमात्रम्, पुण्यम्=पुण्यादृष्टजनकं भवति, किं पुनः दर्शनम्=दर्शनजन्यस्य पुण्यादृष्टस्य विषये किमु वक्तव्यमास्ते, इति=इत्यनेन प्रकारेण, प्रशंसन्=प्रशंसां कुर्वन्, सपरितोषम्=सन्तोषेण सहितम्, हरिश्चन्द्रः=अयोध्याधिपः, अर्घादिकं पूजासामग्रीम्=समर्चासाधनादिकम्, तस्मै=विश्वामित्राय, समर्पयामास=प्रादात् । महर्षेः=विश्वामित्रस्य, कुलरक्षणार्थम्=गुरुकुलस्य संरक्षायै, लक्षम्=लक्षसंख्यापरिमितम्, स्वर्णमुद्रा=सुवर्णनिर्मिताः मुद्राः, देहीति=प्रदेहि इति, कोशपतिम्=कोषाध्यक्षम्, आदिदेशः=आदिष्टवान् ।

(४२) कोशपतिस्तु भृशमुद्विग्नो······सिद्धिर्भवतु इति ।

सन्दर्भप्रसङ्गौ—अयं गद्यखण्डः सत्यहरिश्चन्द्रोदयनामकस्य गद्यकाव्यस्य हरिश्चन्द्रस्य विश्वामित्राय लक्षदानप्रतिश्रुतिनामकात् नवमाद् प्रकरणात् परिगृहीतो वर्तते । धर्मेण विश्वविजययात्राया अन्ते राजा हरिश्चन्द्रो राजसूयं यागमकार्षीत् । तत्र यागे सर्वेषां राष्ट्राणां प्रख्यातानां कलाकृतीनां प्रदर्शनी आयोजिता बभूव । पण्डितानां सभायां सर्वासामनुत्तरितानां शङ्कानां समाधानं कृतमभूत् । यज्ञे राजा विपुलं दानदक्षिणादिकं ददौ, सर्वं कोशजातं व्ययितमभूत् । यज्ञान्तस्नानेन यदा हरिश्चन्द्रस्य सम्राट्पदेऽभिषेकः समारब्धो बभूव तदैव महातेजस्व्यपि महामुनिर्विश्वामित्रस्समुपस्थितो बभूव । राजा महामुनेः सम्यगर्चां विधाय विश्वामित्राय मुनये लक्षं स्वर्णमुद्राः दातुं कोशाध्यक्षमादिदेश । तच्छ्रुत्वा व्याकुलेन कोशपतिना शनैः हरिश्चन्द्रो विज्ञापिता बभूव यत् इदानीं तु सम्पूर्णं कोशजातं व्ययितमत एव साधनान्तरेण महर्षये दक्षिणां ददातु भवान् । तच्छ्रुत्वा राजा प्राह—महर्षे ! सम्पूर्णं राज्यमेव गुरुकुलस्य रक्षायै दित्साम्यहमिति ।

व्याख्या—कोशपतिस्तु=कोशाध्यक्षस्तु, भृशम्=अतीव, उद्विग्नः=व्याकुलमनाः, राजानम्=हरिश्चन्द्रम्, उपांशु=शनैः, सूचितवान्=व्यजिज्ञपत्—राजसूये=एतन्नामके यागे, सर्वस्वदानेन—सर्वस्य=सम्पूर्णस्य, स्वस्य=धनस्य, दानेन=प्रदानेन, जीवनसाफल्यम्=जीवितस्य सफलताम्, सार्थकतामिति यावत्, अवाप्नुयात्=प्राप्नुयात् । इति=इत्यनेन, न्यायेन=नियमवचसा, अधुना=इदानीम्, भवान्=हरिश्चन्द्रः, शरीरमात्रेण=देहमात्रेण, शोभते=अलङ्कृतो भवति । महादेव्यपि=भवतः पट्टमहिषी शैव्याऽपि, सयौतुकम्=स्वपितृगृहात् प्राप्तेन धनेन साकम्, सर्वस्वदानेन=निखिलस्य धनस्य दानेन

कृतकृत्या = सार्थजीवनवती, वर्त्तते = विद्यते । तर्हि = तदा, केनचित् = केनापि, अन्येन = राजकोशव्यतिरिक्तेन, उपायेन = साधनेन, ब्रह्मर्षेः = विश्वामित्रस्य, दक्षिणा = दानम्, पूरणीया = प्रदेयेत । अर्थसङ्कटेन—अर्थस्य = धनस्य, सङ्कटेन = न्यूनत्वेन, वैषम्यापन्नोऽपि = कष्टापन्नोऽपि, हरिश्चन्द्रः = नृपतिः, प्रसन्नमुखः—प्रसन्नम् = प्रहृष्टम्, मुखः = वदनम्, यस्याऽसौ तथाविधः; ऋषिम् = विश्वामित्रम्, प्रति, उवाच = अवोचत् । भवतः = विश्वामित्रस्य, अभ्यर्हणम् = स्वागतम्, लक्षेण = लक्षसंख्याकेन धनेन, न = नहि, सम्पत्स्यते = भविष्यति । स्वराज्यमेव = स्वकीयं साम्राज्यमेव, समग्रम् = सम्पूर्णम्, भवतः = तव कुलाधिपतेः, कुलपालनाय = गुरुकुलस्य संरक्षणाय, समर्पयामि = परिददामि । बृहत्तमेन = महत्तमेन, सम्प्रदानेन = दानेन, आचार्यकुलस्य = भवतो गुरुकुलस्य, अक्षया = शाश्वतिकी, सिद्धिः = सम्पन्नता, भवतु = जायताम् ।

(४४) कुलपतिदान-दुराधिनोन्मनायमाना······न गणयतीति ।

सन्दर्भप्रसङ्गौ—अयं गद्यखण्डः सत्यहरिश्चन्द्रोदयकाव्यस्य दशमात् प्रकरणात् परिगृहीतो वर्त्तते । धर्मेण विश्वविजयानन्तरं राजा हरिश्चन्द्रो राजसूयं यागमकार्षीत् । तस्मिन् यागे सः सर्वस्वदानं कृत्वाऽऽत्मानं कृतकृत्यमकार्षीत् । यज्ञान्तस्नानानन्तरं यदा हरिश्चन्द्रस्य महाराजपदेऽभिषेकः प्रारब्धो बभूव तदैव महत्तेजस्व्यपि ब्रह्मर्षिः विश्वामित्रो दानं ग्रहीतुमगमत् । समागतस्य ब्रह्मर्षेः सविधि सपर्यां विधाय यदा राजा हरिश्चन्द्रः तस्मै लक्षं स्वर्णमुद्राः दातुं कोषाध्यक्षमादिशत् तदा कोशपतिनाभिहितं यत् साम्प्रतं सम्पूर्णः कोशो रिक्तो वर्त्तते । तदनन्तरं राजा प्राह ब्रह्मर्षिं यत् सप्ताहावधौ सः प्रतिश्रुतां दक्षिणां दास्यतीति । यदा प्रजाभिः कुलपतेर्विश्वामित्रस्य दानविषयिणीं वार्तां श्रुता तदा ताभिः विश्वामित्रस्य महती निन्दा कृताऽभूत् ।

व्याख्या—कुलपतिदानविषयकविसंवादेन—कुलपतेः = विश्वामित्रस्य, दानविषयकेण = दक्षिणासम्बन्धिना, विसंवादेन = विरुद्धेन संवादेन, समाचारेणेत्यर्थः, उन्मनायमानाः = उद्वीज्यमानाः, आयोध्यकाः = अयोध्यावासिनो जनाः, विपत्तिकरम् = दुःखोपस्थापकम्, विश्वामित्रम् = कुलपतिम्, अपवदन्तः = निन्दन्तः, परस्परम् = मिथः, ऊचुः = अवोचन् । अयम् = एषः, विश्वस्य = जगतः, मित्रम् = सुहृत्, न = नास्ति, अपि तु = किन्तु, वस्तुतः = वास्तविकेन रूपेण, विश्वेषाम् = सम्पूर्णानां जनानाम्, अमित्रः = शत्रुरेवायम्, अयम् = एषः कुलपतिः, महाशत्रुः = महान् अरिः वर्त्तते । कूटनीत्या = कपटस्य नीत्या,

अस्माकम् = आयोध्यकानाम्, राजराजम् = महाराजं हरिश्चन्द्रम्, न्यक्करोति= तिरस्करोति, अयम् = एषः, ब्रह्मर्षिः विश्वामित्रः = कौशिकः, न = नास्ति, अपितु = किन्तु, जिह्मः = कुटिलः, अर्थपिशाचः = धनस्य लोलुपः, राक्षसः = कौणपः, 'राक्षसः कौणपः क्रव्यादि'त्यमरः । महाडम्बरः, विश्वामित्ररूपधरः = विश्वामित्ररूपकर्ता, कश्चन, छद्मतापसः = कपटी तपस्वी, पाषाणहृदयः = पाषाणतुल्यहृदयवान्, सताम् = सज्जनानाम्, समृद्धिसुखम् = समृद्धिजन्यं आनन्दम्, अपहर्तुम् = अपहरणं कर्तुम्, अस्मान् = आयोध्यकान्, सर्वान् = निखिलान्, विप्रलब्धुम् = प्रवञ्चितुम्, च, समागतः = अत्रागतो वर्त्तते । सावलेपम्—अवलेपेन = दर्पेण, सहितं सावलेपम्, अयम्—एषः, जनः—मनुष्यः, प्रजाकाङ्क्षाम्—प्रजानाम् = प्रजाजनानाम्, आङ्काक्षाम् = अभिलाषां, न = नहि, गणयति इति ।

(४५) विश्वामित्राय प्रतिश्रुतं····· विषयेऽस्मिन् समर्थाः ।

सन्दर्भप्रसङ्गौ—अयं गद्यखण्डः सत्यहरिश्चन्द्रोदयनामकात् गद्यकाव्यात् परिगृहीतो वर्त्तते । राजा हरिश्चन्द्रो दक्षिणार्थिने विश्वामित्राय लक्षं स्वर्णमुद्राः प्रतिश्रावयामास । किन्तु सम्पूर्णस्य कोशस्य राजसूययागे रिक्ततां गतत्वात् दातुमसमर्थः सन् महर्षिं प्राह यत् सप्ताहावधौ सः नूनं प्रतिश्रुतां दक्षिणां दास्यतीति । पुनः राजा सत्वरमेव प्रतिश्रुतां दक्षिणां दातुं मन्त्रिभिः साकं मन्त्रशालायां परामर्शमकार्षीत् । बहुधा विचार्यापि मन्त्रिण उचितस्योपायस्यप्रदर्शनेऽक्षमा अभूवन् । तदा ते राजानमाहुः यत् अत्र भवतैव कश्चनापि निर्णय कार्य इति ।

व्याख्या—विश्वामित्राय = कुलपतये, प्रतिश्रुतम् = प्रतिज्ञातम्, दानम् = प्रदेयम्, कथम् = केन प्रकारेण, देयमिति, परामृष्टुम् = परामर्शं कर्तुम्, हरिश्चन्द्रः = अयोध्याधिपतिः, सत्वरमेव = शीघ्रमेव, मन्त्रशालाम् = विचारशालाम्, प्राविशत् = प्रविवेश । तत्र = मन्त्रशालायाम्, सङ्गतान् = सम्मिलितान्, मन्त्रिणः = अमात्यान्, सः = राजा, अन्वयुङ्क्त=पप्रच्छ, सप्ताहावधौ = सप्तानां दिनानामभ्यन्तरे, दक्षिणा = दानम्, कथम् = केन प्रकारेण, प्रदेया = प्रदातव्या, महर्षये = विश्वामित्राय, इत्यस्मिन् = इत्येतद्विषये, भवताम् = अत्र सङ्गतानां मन्त्रिणां, का = कीदृशी, मतिरिति = बुद्धिरिति । प्रत्युत्पन्नमतयोऽपि = शीघ्रमेव समुपस्थितायाः समस्यायाः समाधाने क्षमा अपि, मन्त्रिणः = अमात्याः, विषण्णवदनाः—विषण्णानि = दुःखितानि, वदनानि=मुखानि, येषां ते, दक्षिणा-

राशिम्—दक्षिणायाः=दानस्य, राशिम्=धनम्, अर्जितुम्=उपार्जितुम्, कमपि=एकमपि, उपायम्=साधनम्, राजानम्=हरिश्चन्द्रम्, प्रतिबोधयितुम्=दर्शयितुम्, विफलविमर्शाः=व्यर्थविचाराः, बभूवुः=सञ्जाताः। सैन्यबलेन=सेनायाः शक्त्या, धनावाप्तिः=धनस्य सम्प्राप्तिः, विश्वप्रतिष्ठापितधर्मविजयस्य—विश्वे=जगति, प्रतिष्ठापितस्य=संस्थापितस्य, धर्मविजयस्य, विपर्ययः=विपरीतः, भविष्यतीति=सम्पत्स्यते इति, सर्वेषाम्=मन्त्रिणाम्, मन्त्रनिर्णयः=विचारस्य निश्चयः आसीत्। सर्वसम्मतेन=सर्वेषां सम्मिलितानाम् अमात्यानां सम्मत्या, ते=मन्त्रिणः, राजानम्=हरिश्चन्द्रं प्रति, ऊचुः=अवोचन्, यत् कर्त्तव्याकर्त्तव्यनिर्णये=करणीयाकरणीयकार्यस्य निश्चये, सन्देहास्पदे=सन्देहस्य विषये सञ्जाते सति, भवान्=हरिश्चन्द्रः, स्वीयान्तःकरणप्रवृत्तिम्—स्वीयस्य=आत्मनः, अन्तःकरणस्य=हृदयस्य, प्रवृत्तिमेव=वृत्तिमेव, प्रमाणीकरोतु=प्रमाणरूपेण स्वीकरोतु। अस्मिन्=एतस्मिन्, विषये, वयम्=मन्त्रिणः, समर्थाः=सक्षमाः, न=नहि स्मः इति भावः।

(४६) वैषम्यसखो हरिश्चन्द्रोऽपि······स्रष्टुं प्रचक्रमे इति।

सन्दर्भप्रसङ्गौ—अयं गद्यखण्डः सत्यहरिश्चद्रोदयनामकस्य गद्यकाव्यस्य दशमात् प्रकरणात् परिगृहीतो वर्त्तते। राजा हरिश्चन्द्रः प्रतिश्रुताया दक्षिणायाः प्रदानविषये मन्त्रशालां गत्वा मन्त्रिभिः साकं विचारमकार्षुः। किन्तु ते मन्त्रिणः उचितस्योपायस्य प्रदर्शनेऽक्षमा अभूवन्। तदनन्तरं तैरभिहितं यत् अस्मिन् विषये भवान् स्वान्तःकरणप्रवृत्तिमेव प्रमाणत्वेन स्वीकरोतु इति। राजाऽपि विचारितं यत् कष्टानन्तरमेव राजाऽनुत्तमं फलं लभते। अत्र मुनिना उपस्थापिता विपत्तिरपि मम कल्याणकारिण्येव भविश्री। महर्षिः विश्वामित्रो मम पितुः त्रिशङ्कोः महत्कल्याणमकार्षीत्। देवानां विरोधो मम पितुः सहायार्थं च सः अपरस्य स्वर्गस्यैव निर्माणं प्रारब्धवानिति।

व्याख्या—वैषम्यसखः—वैषम्यम्=दुःखमेव, सखा=मित्रं, यस्याऽसौ तथाविधः, हरिश्चन्द्रोऽपि=अयोध्याधिपतिरपि, राज्ञाम्=नृपाणाम्, चरितार्थता=साफल्यं तु, दुःखोत्तरैव=दुःखप्राप्तेरनन्तरमेव, अपि च=किञ्च, हि=निश्चयेन, पुण्यवन्तः=पुण्यादृष्टशालिनः जनाः, हि, दुःखभाजः=दुःखास्पदाः भवन्ति, इति=इत्येतेन, न्यायेन=नीत्या, आत्मानम्=स्वम्, बहु=अत्यधिकम्, मेने=निश्चिकाय, स्वजीवनस्य=आत्मनो जीवितस्य, अभिनवोद्योगे=नवीनोद्योगे, असह्योऽपि=अक्षमोऽपि, सः=राजा हरिश्चन्द्रः, अभिनवो-

त्साहस्फूर्तिम्—अभिनवस्य—नवीनस्य, उत्साहस्य स्फूर्तिम्, अन्वभवत्=अनुबभूव। मुनेः=विश्वामित्रस्य, व्यवधानेन=अन्तरायेण, सम्पातितम्=समुपस्थापितम्, वैषम्यम्=कष्टम्, कल्याणोदर्कम्=कल्याणप्रदमेव, इति=इत्थम्भूता, तस्य=राज्ञो हरिश्चन्द्रस्य, मतिः=विचारः, आसीत्=अभवत्। तेन=राज्ञा हरिश्चन्द्रेण, पुनः=भूयः, विचारितम्=निश्चायितम्, महात्मनाम्=सज्जनानाम्, साधूनाम्, प्रवृत्तयः=व्यवहाराः, स्वप्नेऽपि=स्वापावस्थायामपि, का कथा जाग्रदवस्थायाम्, अश्रेयः=अकल्याणं, न=नहि, विधत्ते=कुर्वन्ति। पुरा=प्राचीने काले, मम=हरिश्चन्द्रस्य, पितुः=जनकस्य त्रिशङ्कोः, कृते=कल्याणसम्पादनाय, देवानाम्=देवतानाम्, विरोधे=विपरीतपक्षे, सत्यपि=सञ्जातेऽपि, ब्रह्मर्षिणा=विश्वामित्रेण, अपरम्=द्वितीयम्, स्वर्गमेव=स्वर्गलोकमेव, स्रष्टुम्=निर्मातुम्, प्रचक्रमे=प्रारब्धवानिति।

(४७) काशीं वा कैलासं वा ······ महायात्रां विधास्यामीति।

सन्दर्भप्रसङ्गौ—अयं गद्यखण्डः सत्यहरिश्चन्द्रोदयनामकस्य गद्यकाव्यस्य दशमात् प्रकरणात् परिगृहीतो वर्त्तते। राजा हरिश्चन्द्रो मन्त्रशालायां मन्त्रिभिः साकं बहुधा विचार्यापि यदा कमपि निर्णयं कर्तुं समर्थो नाभूत्, तदा तेन विमृष्टं यत्—स्वस्य दुःखस्यापनोदनार्थमिह भगवतः शिवस्योपासनां कर्तुं काशीं वा कैलासं वा यास्यामि। किन्तु कैलासे मानवव्यवहारस्यात्यन्ताभावो वर्त्तते। अत एव भगवतः शङ्करस्य नगरीं काशीमेव यास्यामि।

व्याख्या—आत्मनः प्रयोजनस्य सिद्धयै मया क्व गन्तव्यमिति विचारे समुपस्थिते राज्ञा हरिश्चन्द्रेण, स्वमनसि निर्णीतम्—काशीं वा=वाराणसीं वा, कैलासं वा=कैलासं पर्वतं वा, यत्र=यस्मिन् स्थाने, शिवस्य=भगवतः शङ्करस्य, शरणम्=शरणागतिः, आनन्त्यमेव=अक्षयमेव, लोकोत्तरोपलब्धिः—लोकोत्तरा=अतिलौकिकी, चासौ उपलब्धिः=समुपलब्धिः, भवतीति शेषः। किन्तु=परन्तु, कैलासे=कैलासपर्वते, यत्र भगवान् शङ्करः सर्वदा भगवत्या पार्वत्या सह निवासं करोति, तत्र, मानवव्यापारशून्यत्वात्—मानवानाम्=मनुष्याणां, व्यापारेण शून्यत्वात्=रहितत्वात्, मम=हरिश्चन्द्रस्य, अर्थस्य=धनप्राप्तेः, अभिलाषा=आशा, न=नहि, पूर्येत=पूर्तिमियात्। काश्याम्=वाराणस्याम्, पुनः=भूयः, अकिञ्चनः=वित्तविहीनः, शिवः=जगत्कल्याणकर्ता भगवान् शङ्करः, मादृशाय=मत्सदृशानां जनानाम्, अकिञ्चनानाम्=

वित्तविहीनानाम्, उपस्थानम् = पूजनम्, बहु = अत्यधिकम्, मंस्यते = समादरिष्यति । च = किञ्च, प्रकृत्या = स्वभावेनैव, सौमनस्यम् = सौख्यम्, वितनिष्यति = वर्धयिष्यते । अथ किम् = किञ्च, शिवः = शङ्करः, नग्नः = दिगम्बरः, तिष्ठति, तम् = भगवन्तं = शङ्करम्, संवीतदिव्यांशुकाः—संवीताः = परिवेष्टिताः, दिव्यैः = अतिलौकिकैः, अंशुकैः = वस्त्रैः, ये तथाविधाः, देवाः = देवताः, नमन्ति = नमस्कुर्वन्ति । सः = शिवः, वृद्धवृषेण—वृद्धेन = जरठेन, वृषेण = वृषभेण, प्रीतः = प्रसन्नः सन्, याति = यत्र कुत्रापि गच्छति, तम् = शिवम्, ऐरावतारूढः—ऐरावताख्ये हस्तिनि, आरूढः = कृतारोहणः, देवेन्द्रः = इन्द्रः, सेवते = भजति । सः = शिवः, कपालशकलैः = शिरःखण्डैः, आत्मानम् = स्वशरीरम्, अलङ्करोति = समलङ्कृतं करोति, तम् = शिवम्, समागत्य = आगत्य, शिवपुरीम्, अक्षयनिधिः = अपारसम्पत्तिसम्पन्नः, कुबेरः = यक्षराट्, 'कुवेरस्त्र्यम्बकसखो यक्षराड् गुह्यकेश्वरः' इत्यमरः । स्तौति = प्रार्थयते । दुर्गतिम्, प्रपन्नोऽपि = प्राप्तोऽपि, भगवान् = ऐश्वर्यसम्पन्नः, शम्भुः = शिवः, विभुत्वस्य = व्यापकत्वस्य, परमं पदम् = परमां प्राप्यतां गतो वर्त्तते इति भावः । दर्शनमात्रेण = अवलोकनमात्रेण, शिवः = भगवान् शिवः, मे = मम, राज्यभोगात् = साम्राज्यस्य भोगात्, अधिकतराम् = अत्यधिकाम्, रमणीयताम् = मनोज्ञताम्, सम्भरिष्यति = प्रपूरयिष्यति । तस्य = शिवस्य, उपस्थानेन = आराधनेन, काश्याम् = वाराणस्याम्, निःसीमान् = सीमातीतम्, सुखोदयम् = आनन्दावाप्तिम्, भाविजीवने = आगामिनि जीवने, मन्ये = भविष्यतीति तर्कयामि । तत्र = वाराणस्याम्, शिवसङ्कल्पेन = भगवतः सत्येन सङ्कल्पेन, मम = हरिश्चन्द्रस्य, मनीषितम् = अभिलषितम्, स्वार्जनेन = सम्यक्तयोपार्जनेन, विश्वामित्राय = महर्षये, दक्षिणाराशिप्रापणम् = दक्षिणाराशिप्रदानम्, इति = इत्येतत्, नावहेलितम् = नानादृतम्, भविष्यति । अत एव = एतस्मादेव हेतोः, काशीम् = वाराणसीम्प्रति, यात्रां विधास्यामि = करिष्यामि ।

(४८) मार्गे हरिश्चन्द्रो भविष्येण……तेषां विनिर्णय आसीत् ।

सन्दर्भप्रसङ्गौ—अयं गद्यखण्डः सत्यहरिश्चन्द्रोदयनामस्य गद्यकाव्यस्य द्वादशात् प्रकरणात् परिगृहीतो वर्त्तते । राजा हरिश्चन्द्रो विश्वामित्राय प्रतिश्रुतां दक्षिणां स्वार्जनेन दित्सया काश्यै प्रस्थितवान् भार्यया पुत्रेण च साकम् । राज्ञा लक्षितं यत् शैव्यायाः मनसि भविष्येण वैभवराहित्येन चिन्ता समुत्पन्ना वर्त्तते । अत एव तस्याः सन्तोषाय सः प्राह यत्—ये मनस्विनः सन्ति ते परि-

ग्रहस्य परित्यागं कुर्वन्ति। अत एव ते सर्वत्र लोके पूजिता अपि भवन्ति। अत एव त्वया भाविवैभवराहित्यशङ्कया चिन्ता नहि करणीयेति।

व्याख्या—मार्गे=पथि, हरिश्चन्द्रः=अयोध्याधिपतिः, भविष्येण=भाविकालिकेन, वैभवराहित्येन=ऐश्वर्यराहित्येन, समुत्पन्नाम्=सञ्जाताम्, शैव्यायाः=स्वपत्न्याः, चिन्ताम्=वैयाकुलीम्, परिलक्ष्य=अनुमाय, ताम्=शैव्याम्, पारमार्थिकेन=पार्यन्तिकेन, सत्येन=तथ्येन, समाश्वासयितुम्=सन्तोषयितुम्, व्याजहार=अवोचत्—भोः=शैव्ये! जानीहि=अवेहि, अस्माकम्=हरिश्चन्द्रादिकानां सपरिवाराणाम्, अपूर्वम्=अभूतपूर्वम्, सुखविधानम्=आनदावाप्तेः विधानम्, यत् वयम्=सपरिवारो हरिश्चन्द्रः, राज्यपाशात्=राज्यस्य बन्धनात्, विनिर्मुक्ताः=लब्धावकाशाः, स्वीयम्=आत्मीयम्, श्रेयसः=कल्याणस्य, प्रेयसश्च=आनन्दावाप्तेश्च, साधनम्=सामग्रीम्, स्वयमेव=आत्मनैव, स्वीयेन=स्वकीयेन, श्रमेण=परिश्रमेण, तपसा=तपश्चर्यया, च अर्जयिष्यामः=उपार्जयिष्यामः। एतदर्थम्=एतस्मै प्रयोजनाय, धनराहित्यप्रपत्तिः=धनाभावस्य प्राप्तिः, प्रथमम्=सर्वप्रथमम्, पदम्=सोपानम्, तत्=तस्मात्, अस्मत्कृते=अस्मभ्यम्, भगवतः=परमात्मनः, अनुग्रहेण=कृपया, विश्वामित्रेण=महर्षिणा, स्वत एव=स्वयमेव, पुरस्कृतम्=उपस्थापितम्। पुरा=अग्रे, ज्ञानविज्ञानयोः=सामान्यज्ञानविशेषज्ञानयोः, पारङ्गताः=पारङ्गमाः, ब्राह्मणाः=ब्रह्मज्ञानिनः, स्वीयब्रह्मबलेन=स्वकीयेन ब्रह्मज्ञानबलेन, विश्वम्=सम्पूर्णं जगत्, अधीनम्=स्वाधीनम्, कर्तुम्=सम्पादयितुम्, समर्थाः=सक्षमा अपि, अपरिग्रहव्रतम्=असङ्ग्रहनामकं व्रतम्, स्वीकुर्वन्ति=अभ्युपयन्ति स्म। त एव=तथाविधाः ब्राह्मणा एव, शाश्वतम्=शाश्वतिकम्, सर्वत्र=सर्वस्मिन् स्थाने, समाजे, सर्वोच्चम्=सर्वोत्कृष्टम्, प्रतिष्ठास्पदम्=प्रतिष्ठासमन्वितम्, सम्मानिताः=समादृताः अभूवन्। परिग्रहे=सङ्ग्रहे, राजवैभवे=राज्यस्य ऐश्वर्ये वा, सम्पाद्यमाने=जायमाने, तत्र कश्चित्=कोऽपि, महान् दोषः=अवद्यम्, उत्पद्यते=जायते, इति=एतादृशः, तेषाम्=महतां जनानाम्, विनिर्णयः=निश्चयः, आसीत्।

(४३) काशिराजो हरिश्चन्द्रस्य·····विदध्यादिति।

सन्दर्भप्रसङ्गौ—अयं गद्यखण्डः सत्यहरिश्चन्द्रोदयनामकस्य गद्यकाव्यस्य त्रयोदशप्रकरणात् परिगृहीतो वर्तते। राजा हरिश्चन्द्रो विश्वामित्राय महर्षये प्रतिश्रुतां दक्षिणां दातुं वाराणस्यै प्रस्थानमकार्षीत्। हरिश्चन्द्रस्य राजसूय-

यज्ञावसरे काशिराजोऽपि तत्रोपस्थित आसीत् । अत एव अयोध्यातः काशीं प्रत्यागत्यापि काशिराजः हरिश्चन्द्रस्य विषये चिन्तित आसीत् । यदा काशिराज अश्रौषीत् यत् हरिश्चन्द्रः स्वार्जितेन वित्तेन विश्वामित्राय प्रतिश्रुतां दक्षिणां दातुं काशीमायाति, तदा सः स्वीयैरामात्यैस्सह सङ्गत्य निश्चितं चकार महाराजस्य हरिश्चन्द्रस्य समुचितं स्वागतं कर्तुम् ।

व्याख्या—काशिराजः=काश्या अधिपतिः, हरिश्चन्द्रस्य=अयोध्याधिपतेः, राजसूययज्ञे=राजसूयनामके यागे, उपस्थितः आसीत्=अभूत् । काशीम्=वाराणसीम् प्रति, आवर्तितः=समागतः, अनुध्यानपरः=सततं चिन्तनपरायणः, सः=काशिराजः, तस्य=हरिश्चन्द्रस्य, सम्राट्पदे=सम्राजः पदोपरि, अभिषेके=संस्थापनावसरे, विश्वामित्रेण महर्षिणा, कृतम्=उपस्थापितम्, विघ्नम्=अन्तरायम्, राज्याद्=साम्राज्यात्, विवासनम्=निष्काशनं च, स्मारं स्मारम्=संस्मृत्य संस्मृत्य, महतीम्=अतिशयाम्, चिन्ताम्, प्रपेदे=प्राप्तवान्, यत् ईदृग्विधः=एतादृशः, पुरुषविशेषः=असामान्यः पुरुषः, इदृशीम्=एतादृशीम्, आपदम्=आपत्तिम्, प्राप्नोति=लभते, इति=अतः, अनतिक्रमणीयः=अनुल्लङ्घ्यः, विधिः=दुर्दैवम् । तस्मिन्=हरिश्चन्द्रे, आत्मनिष्क्रयार्थम्=आत्मनः उद्धारार्थम्, काशीम्=वाराणसीम्, समागते=आगते सति, मया=काशिराजेन, किं विधेयम्=किं करणीयम्, येन=कर्मणा कृतेन, तस्य=हरिश्चन्द्रस्य, वैषम्यम्=कष्टम्, न्यूनीभवेत्=अल्पतामियात्, इति=इत्येतत्, विषयम्, अधिकृत्य=आश्रित्य, सः=काशिराजः, सचिवैः=मन्त्रिभिः, मन्त्रयामास=मन्त्रणामकार्षीत् । ते सर्वे=सम्मिलिताः मन्त्रिणः, राज्ञा=हरिश्चन्द्रेण, प्रतिबोधिताः=सम्बोधिताः सन्त, धर्मविजयप्रवर्तयिता=धर्मेण विश्वविजयस्य प्रवर्तनकर्ता, महाराजः=सम्राट्, हरिश्चन्द्रः=एतन्नामा अयोध्याधिपः, राजसूये=एतन्नामके यागे, सर्वस्वम्=स्वकीयं सम्पूर्णं धनम्, विसृज्यापि=दत्त्वापि, महामुनये=महर्षये, विश्वामित्राय=कौशिकाय, लक्षम्=लक्षं सुवर्णमुद्राः, दातुकामः=प्रदातुमिच्छया, अस्मिन्=एतस्मिन्, सप्ताहे=सप्तदिनेषु, अस्माकम्=काशिराजानाम्, नगरीम्=काशीम्, आगत्य=सम्प्राप्य, अत्रैव=काश्यामेव, आत्मनिष्क्रयेण, धनम्=वित्तम्, सङ्ग्रहीष्यति=सङ्गृहीतं करिष्यति । अस्माभिः=काशिवासिभिः, अस्मिन्=एतस्मिन्, अवसरे=समये, सर्वम्=निखिलम्, तत्=कार्यम्, विधेयम्=करणीयम्, येन=कर्मणा, उपस्कृता=उपस्कारप्राप्ता, इयम्=एषा, काशीपुरी=वाराणसीनगरी, लोके=जगति,

सुप्रथितनाम्नी=प्रख्याताभिधाना, काशयति=प्रकाशयति, विश्वलोकम्=सम्पूर्णं जगत्, सत्क्रियाभिः=सत्कारैः, इति=एतादृशीम्, अभिख्याम्=संज्ञाम्, अर्थवतीम्=सार्थकाम्, विदध्यादिति=कुर्यादिति भावः।

(५०) विश्वामित्रः ससम्भ्रमं······राजानुभाव इति।

सन्दर्भप्रसङ्गौ—अयं गद्यखण्डः सत्यहरिश्चन्द्रोदयनामकस्य गद्यकाव्यस्य चतुर्दशात् प्रकरणात् परिगृहीतो वर्त्तते। राजा हरिश्चन्द्रो विश्वामित्राय प्रतिश्रुतां दक्षिणां स्वार्जितेन धनेन दातुं मम नगरीं वाराणसीमायातीतिं ज्ञात्वा स्वपरीक्षणस्य विफलताम् अनुमाय निश्चितवान् यत् मया मायया हरिश्चन्द्रपरिवारस्य रूपपरिवर्तनं कर्तव्यम्। तदर्थं सः उपकाशि हरिश्चन्द्रपरिवारस्य समक्षं प्रकटो बभूव। तस्यापचितिं विधाय हरिश्चन्द्रः सपद्येव प्रतिश्रुतां दानराशिं दातुमाह। विश्वामित्रेणाभिहितं यत् राजानुभावसम्पन्नं त्वां कः भृत्यं करिष्यति। अस्मिन् कर्मणि तु तव राजरूपमेव महाबाधकम्। तच्छ्रुत्वा हरिश्चन्द्रेणाभिहितं यन्मे राजरूपमपाकृतं भवतु कृतं भवता महामुनिना।

व्याख्या—विश्वामित्रः=महामुनिः कौशिकः, ससम्भ्रमम्=शीघ्रम्, प्रत्युवाच=प्रत्यवोचत्, हरिश्चन्द्रं प्रति, किन्तु=परन्तु, त्वाम्=हरिश्चन्द्रम्, पुन्नागम्=पुरुषश्रेष्ठम्, उदारदर्शनम्=विस्तृतनेत्रम्, उन्नम्रशरीरम्=उन्नतशरीरम्, उन्नसाननम्—नासा च आननं च नासानने=नासिकामुखे इत्यर्थः, उन्नते नासानने यस्याऽसौ तथाविधम् उन्नसाननम्, राजानम्=नृपतिम्, भृतौ=भृत्यायां, कः=कः पुरुषः, नियोजयिष्यतीति=सम्पादयिष्यतीति, मे=मम, महान् वितर्कः=ऊहः, मनसि=अन्तःकरणे, जायते=उत्पद्यते। लोकाः=जनाः, किङ्करं=भृत्यम्, नियोजयन्ति=सेवायां नियुक्तं कुर्वन्ति, न तु राजानम्=नृपतिम्। तव=भवतः, सत्त्वम्=सत्त्वगुणः, अभिजनम्=कुलम्, 'कुलेऽप्यभिजनो जन्मभूम्याम्' इत्यमरः। विज्ञानम्=विशिष्टं ज्ञानम्, वयः=अवस्था, राजरूपम्=राज्ञः स्वरूपम्, तु, भाविकार्यविधौ=भाविनः कार्यविधाने, महाबाध एव=अतीवबाधको वर्त्तते। कश्चित्=कोऽपि, त्वाम्=हरिश्चन्द्रम्, काकणीम्=कणिकामपि, दत्त्वा=प्रदाय, तव=हरिश्चन्द्रस्य, निष्क्रयम्=क्रयणं, न=नहि, अभियास्यति=उद्यतो भविष्यति। क्षिप्रनिश्चयः—क्षिप्रम्=शीघ्रम्, निश्चयः=निर्णयः, यस्याऽसौ तथाविधः, हरिश्चन्द्र=अयोध्याधिपः, विश्वामित्रस्य=महर्षेः कौशिकस्य, सोपपत्तिकम्=युक्तियुक्तम्, वचः=वचनम्, अनुसृत्य=श्रुत्वा, न्यवेदयत्=निवेदयामास—तर्हि=तदा, माम्=हरिश्चन्द्रम्,

सर्वशः=सर्वप्रकारेण, राजरूपम्=नृपतेः स्वरूपम्, विजहातु=त्यजतु। विघ्न एव=अन्तराय एव, येन=राजरूपपरित्यागेन, मे=मम, दक्षिणाप्रदानपथः=दानराशिप्रदानमार्गः, निर्बाधः=बाधया रहितः, स्यात्=भवेत्। इदानीम्=साम्प्रतम्, राजानुभावः=राज्ञः प्रभावः, अकिञ्चत्करः एव=अलाभप्रद एव इति।

(५१) विश्वामित्रोऽनेन प्रस्तावेनात्मसमीहितं······निश्चक्राम।

सन्दर्भप्रसङ्गौ—अयं गद्यखण्डः सत्यहरिश्चन्द्रोदयनामकस्य गद्यकाव्यस्य चतुर्दशात् प्रकरणात् परिगृहीतो वर्त्तते। महर्षिः विश्वामित्रः काशीराजस्य प्रयासं विफलं कर्तुं स्वप्रयासं सफलयितुं च सपरिवारस्य काशीमागच्छतः हरिश्चन्द्रस्य समक्षमाविर्बभूव। समागतमहर्षेः पूजां विधाय हरिश्चन्द्रः प्राह यत् सप्ताहाभ्यन्तरे एवाहम् आत्मानं भृत्यं कृत्वा निर्धारितां दानराशिं दास्यामीति। विश्वामित्रस्त्वाह यत् तव राजानुभावं विलोक्य कस्त्वां भृत्यं करिष्यति। जनाः किङ्करान् भृत्यं कुर्वन्ति न तु राजानम्। तच्छ्रुत्वा राजा प्राह तदा तु मम राजरूपं मां तव प्रभावात् विजहातु। तच्छ्रुत्वा विश्वामित्रः सपरिवारस्य हरिश्चन्द्रस्य दासवत् रूपं माययाऽकार्षीत्।

व्याख्या—विश्वामित्रः=कौशिको महामुनिः, अनेन=मां राजरूपं विजहातु मम दक्षिणादानरूपे कर्मणि अन्तरायरूपम् इत्यनेन हरिश्चन्द्रेण कृतेन प्रस्तावेन, आत्मसमीहितम्—आत्मनः=स्वस्य, समीहितम्=अभिप्रेतम्, सिद्धम्=संसिद्धि गतम्, अवेक्षमाणः=अभिजानन्। एवमस्तु=विजहातु त्वां ते राजरूपम्, भवदीयम्=हरिश्चन्द्रस्य, राजारूपम्=राज्ञः स्वरूपम्, दासभावेन=दासरूपेण, परिणतम्=परिणामं गतम्, भवतु=जायताम्, इत्युक्त्वा=इति कथयित्वा, मायाम्, उद्भाव्य=उत्पाद्य, तान्=हरिश्चन्द्रादित्रीन्, अपह्नुतवान्=पिहितवान्। तदनन्तरम्=तस्य पश्चात्, सम्यक्=सम्यक्रूपेण, प्रतन्यते=विस्तार्यते, कार्यतन्त्रम्, इति=इत्यनेन प्रकारेण, विमृशन्=विचारं कुर्वन्, स=विश्वामित्रो महर्षिः, तडित्स्वरः=विद्युद्वत् शीघ्रम्, ततः=तस्मात् स्थानात्, निश्चक्राम=निर्जगाम।

(५२) पुरोदारदर्शनोऽप्यर्थिभावं······नयनपथगामि सञ्जातम्।

सन्दर्भप्रसङ्गौ—अयं गद्यखण्डः सत्यहरिश्चन्द्रोदयनामकस्य गद्यकाव्यस्य चतुर्दशात् प्रकरणात् परिगृहीतो वर्त्तते। महर्षिर्विश्वामित्राय प्रतिश्रुतां दक्षिणां

दातुकामो हरिश्चन्द्रो वाराणस्यै प्रस्थितवान् । कश्चनापि तं नहि परिज्ञायते इतीच्छया विश्वामित्रो मायामुद्भाव्य तस्य राजरूपं तिरोधाय दासरूपं करोति स्म । पुनः स तु यत्र क्वचन जगाम । हरिश्चन्द्रमनुगच्छन्तोमनाः इतस्ततो जग्मुः । हरिश्चन्द्रश्चाचिरमेव काशीमाजगाम ।

व्याख्या—पुरा=पूर्वम्, उदारदर्शनोऽपि=मनोज्ञदर्शनोऽपि, अर्थिभावम्=निर्धनताम्, गतः=प्राप्तः, राजपरिवारः=हरिश्चन्द्रस्य राज्ञः परिवारः, भूयसीम्=अत्यधिकाम्, शान्तिम्, अन्वभवत्=अनुबभूव । विरूपम्=कुरूपता, खलु=निश्चयेन, बहुगुणम्=अनेकैः, गुणैः युक्तम्, सम्पद्यते=भवति । यतो हि नाम=नामेति प्रसिद्धौ यस्मात् कारणात्, सपद्येव=शीघ्रमेव, तम्=राजानम्, परितः=सर्वतः, दूरदूरतोऽपि=अत्यधिकदूरात्, अनुयायिनः=अनुगमनकर्तारः, कौतुकोत्फुल्लमनसः—कौतुकेन=कौतूहलेन, उत्फुल्लानि=विकसितानि, प्रहृष्टानीति यावत्, मनांसि=अन्तःकरणानि, येषामन्ते तथाभूताः, जनसम्मर्दाः—जनानाम्=लोकानाम्, सम्मर्दाः, व्यलीयन्त=विलीना अभूवन् । अत एव=एतस्मादेव कारणात्, हरिश्चन्द्राय=नृपतेः, काशिसमुपस्थानम्=काश्यामागमनम्, त्वरिततरम्=अतीवशीघ्रम्, समभवत्=समजायत । अचिरात्=शीघ्रमेव, चिरप्रतीक्षितम्=दीर्घकालादाकाङ्क्षितम्, आनन्दवनम्=काशीनगरम्, नयनपथगामि=दृग्गोचरम्, सञ्जातम्=अभूत् ।

(५३) पुनश्च तत्र तपोधनानां ·····समर्पयितुं च वचनं ददौ ।

सन्दर्भप्रसङ्गौ—अयं गद्यखण्डः सत्यहरिश्चन्द्रोदयनामकस्य गद्यकाव्यस्य पञ्चदशात् प्रकारणात् परिगृहीतो वर्त्तते । स्वकल्पितया मायया महर्षिविश्वामित्रः सपरिवारस्य हरिश्चन्द्रस्य राजरूपं तिरोधाय दासरूपमाविर्भावयामास । पुना राजा हरिश्चन्द्रो वाराणसीमाययौ । वाराणस्यां राजा मुनिवराणां शिवसङ्कल्पान् वेदानामविरतं घोषम्, नैकधर्मावलम्बिनां जनानां सम्वासम्, पौराणां स्वशक्त्यनुसारेण पञ्चमहायज्ञानुष्ठानं च विलोक्य प्रहृष्टः सन् वाराणस्याः रथ्यासु ससुखं विचरति स्म चन्दचर्चितकालः । हरिश्चन्द्रस्यानन्दानुभवं सोढुमक्षमो विश्वामित्रः तेन सह छायारूपेण सञ्चरन् उच्चैर्व्याजहार—मह्यं दक्षिणां देहीति । तच्छ्रुत्वा सावधानो हरिश्चन्द्रः शीघ्रमेव दक्षिणाराशिं दास्यामीत्याह—

व्याख्या—काशीमागत्य राजा हरिश्चन्द्रो हर्षप्रकर्षमनुबभूव । पुनश्च=भूयोऽपि, तत्र=काश्याम्, तपोधनानाम्=तपस्विनाम्, मुनिवराणां=महर्षीणाम्,

शाश्वतशिवसङ्कल्पेन—शाश्वतेन=सार्वकालिकेन, शिवसङ्कल्पेन=कल्याणमयेन सङ्कल्पेन, अथवा यजुर्वेदीयशिवसङ्कल्पसूत्रपाठेन, शिष्याचार्याणाम्—शिष्याणाम् =अन्तेवसतां जनानाम्, आचार्याणाञ्च, प्रज्ञानेन=उत्कृष्टेन ज्ञानेन, उद्भिन्नवेद-घोषेण=उद्भूतवेदोच्चारणेन, नैकधर्मवत्सलानाम्—नैकेभ्यः=अनेकेभ्यः, धर्मेभ्यः, वत्सलानाम्—वात्सल्यगुणयुक्तानाम्, पौराणाम्=नागरिकाणाम्, संवासेन=सहैव निवासने, पञ्चमहायज्ञैः=ब्रह्म भूत-नृ-देव-पितृयज्ञैः, ब्रह्मदेव-पितृभूतनृगणानाम्—ब्रह्मणः=वेदस्य, देवस्य=देवतायाः, पितृगणस्य, भूतस्य =आपिपीलिकस्य भूतगणस्य, नराणाम्=मनुष्याणाम्, ये हि गणाः=समूहाः, तेषाम्, आतृप्ति=तृप्तिपर्यन्तम्, भावनेन=सन्तर्पणेन, प्रतिगृहम्=सर्वेषु गृहेषु, चित्रप्रतिमाप्रतीककृतिभिः=चित्राणि च प्रतिमाश्च प्रतीकाश्च, तेषां कृतिभिः= रचनाभिः, समलङ्करणेन=सम्यगलङ्कारकरणेन, दूरदूरतोऽपि=अतिदूरादपि, ध्वजापताकातोरणैः=ध्वजाभिः पताकाभिः तोरणैश्च, सुस्वागतम्=सम्यक्-स्वागतम्, दर्शकमनोरञ्जनेन—दर्शकानाम्=अवलोकनकर्तृणां जनानाम्, मनसः=अन्तःकरणस्य, रञ्जनेन, पत्रपुष्पफलराशिभिः—पत्राणाम्=दला-नाम्, पुष्पाणाम्=कुसुमानाम्, फलानाञ्च रशिभिः, बुद्धीन्द्रियग्रामनन्दनेन—बुद्धेः=अन्तःकरणस्य, इन्द्रियाणाम्=करणानाञ्च, यो ग्रामः=समूहः, तस्य नन्दनेन =आनन्दितकरणेन, सुवासवासोऽलङ्कारतिलकाञ्चितलोकसौन्दर्येण—सुवासः= =सौगन्ध्यम्, वासः=वस्त्रम्, अलङ्काराः=आभूषणानि, तिलकम्, च तैः अञ्चितम्=समलङ्कृतम्, यद्धि लोकस्य सौन्दर्यम्=लावण्यम्, तेन च परम्= अतिशयेन, प्रीतः=प्रसन्नतां गतः, नवताम्=नवीनताम्, गतश्च=प्राप्तश्च, हरि-श्चन्द्रः=अयोध्याधिपः काश्याम्=वाराणस्याम्, परिभ्रमन्=सर्वतो भ्रमणं कुर्वन्, विश्वामित्रम्=महर्षिम्, तस्मै=विश्वामित्राय, प्रदेयम्=दक्षिणा-रूपेण प्रतिश्रुतम्, धनम्=धनराशिञ्च, विस्मरन्निव=विस्मरणं कुर्वन्निव, किञ्चित्-कालम्=किञ्चित्कालपर्यन्तम्, विहरति स्म=भ्रमणं करोति स्म। विश्वा-मित्रोऽपि, छायारूपेण=प्रतिबिम्बरूपेण, अनुसरन्=अनुसरणं कुर्वन्, तस्य =हरिश्चन्द्रस्य, सुखम्=आनन्दानुभवम्, अक्षममाणः=असहमानः, इव, मे= मह्यं, दानम्=दक्षिणां, देहि=प्रयच्छ, इति=इत्यनेन वाक्येन, प्रतिबोधनेन= जागरणेन द्वारा, तम्=हरिश्चन्द्रम्, जागरयामास=सावधानमकार्षीत्। प्रति-श्रुतपरिपूरणे—प्रतिश्रुतस्य=प्रतिज्ञातस्य अर्थस्य, परिपूरणे=पूर्तिकरणे, अन-वधानात्=असावधानात्, ते=तव हरिश्चन्द्रस्य, पापीयसी=पापहरा, वृत्तिः

=प्रवृत्तिः, प्रतिफलति=प्रतिबिम्बिता भवति, इति=इत्यनेन प्रकारेण, सः= मुनिर्विश्वामित्रः, उच्चैः=तारस्वरेण, व्याजहार=कथयामास। हरिश्चन्द्रः= अयोध्याधिपः, व्रीडितः इव=लज्जित इव, पुनः पुनः=भूयो भूयः, तम्= ऋषिम्, क्षमां ययाचे=क्षमापनमकार्षीत्। शीघ्रमेव=सपद्येव, तस्मै=विश्वामित्राय, धनम्=दक्षिणाराशिम्, समर्पयितुम्=समर्पितं कर्तुम्, च वचनं, ददौ =कथयामास।

(५४) अपरेद्युर्हरिश्चन्द्रो विश्वामित्राय......रोहितो निश्चक्राम।

सन्दर्भप्रसङ्गौ—अयं गद्यखण्डः सत्यहरिश्चन्द्रोदयनामकस्य गद्यकाव्यस्य पञ्चदशात् प्रकरणात् परिगृहीतो वर्त्तते। राजा हरिश्चन्द्रो विश्वामित्रमहर्षेः मायया परिवर्तितरूपो वाराणसीं प्रविवेश किन्तु कश्चिदपि तं नहि अभिज्ञातवान्। वाराणस्यां प्रविश्य, तस्याः नगर्याः सात्त्विकं वैभवं विलोक्य राजा आनन्दमग्नो बभूव। कस्मैचन कालाय विस्मृतवानेव महर्षि विश्वामित्रं तस्मै प्रदेयं दानञ्च। किन्तु छायारूपेण हरिश्चन्द्रेण साकं सञ्चरन् महर्षिः विश्वामित्रः तं सावधानमकार्षीत्। द्वितीये दिवसे हाटके प्रविश्य कस्यचन डोम्बराजस्य द्वादशवार्षिकीं भृत्यां महाश्मशाने स्वीचकारे अर्द्धलक्षाय अर्द्धलक्षाय च पत्नीं शैव्यां कस्यचन वैश्यब्राह्मस्य गृहदासीमकरोत्। पुनः पुत्रो रोहिता मात्रा सहैव जगाम। राजाऽपि विश्वामित्राय दक्षिणां दत्त्वा स्वस्थमानसो बभूव।

व्याख्या—अपरेद्युः=द्वितीये दिवसे, वाराणस्यां गमनस्य, हरिश्चन्द्रः= राजा हरिश्चन्द्रः, विश्वामित्राय=महर्षये, देयम्=प्रदेयम्, स्वर्णमुद्रालक्षम्= सुवर्णस्य मुद्राणां लक्षम्, दासीभूय=दासो भूत्वा, अर्जयितुम्=उपार्जयितुम्, प्रत्यूषे=प्रातःकाले, शृङ्गाटकम्=चतुष्पथम्, परितः=अभितः, पण्यप्राङ्गणं—पण्यस्य=हाटकस्य, प्राङ्गणम्=अजिरम्, प्रविवेश=प्रविष्टवान्। तत्र=वाराणस्यां, कस्यचित=कस्यचन, ब्रह्मधरस्य=वेदज्ञस्य, दासः= भृत्यः, भवितुमिच्छामि=भवितुं समीहे, इति=एतादृशी, तस्य= हरिश्चन्द्रस्य, मनोरथः=समीहा, न=नहि, सफलीबभूव=सफलतामेति स्म। नामेति प्रसिद्धौ, यतोहि=यस्मात् कारणात्, यद्यपि, तत्र=आपणे, ब्रह्मवादिनः—वेदज्ञाः, ब्राह्मणाः, गोलक्षम्=गवां लक्षम्, दत्त्वा=प्रदाय, तम्=हरिश्चन्द्रम्, ग्रहीतुकामाः क्रेतुमिप्सवः, आसन्, किन्तु=परन्तु, ते= ब्राह्मणाः, स्वर्णराशिम्=सुवर्णस्य राशिम्, नास्पृशन्=स्पर्शं नहि अकार्षुः। अत एव=अतो हेतोः, गोमात्रधनाः—केवलं, गावः एव येषां धनानि ते=वेदज्ञाः

ब्राह्मणाः, स्वर्णरहितः = सुवर्णेन हीनः, आसन् = अभूवन् । विश्वामित्रेण = महर्षिणा, पुनः-पुनः = भूयो भूयः, त्वरायिता = शीघ्रतां कर्तुं प्रेरितः, सः = हरिश्चन्द्रः, लक्षार्धदायिनः = लक्षमुद्रायाः अर्धं प्रदातुः, उड्डामरस्य = एतन्नामकस्य, डोम्बराजस्य = शूर्पजीविनां राज्ञः, श्मशानाधिपस्य = महाश्मशानस्य स्वामिनः, द्वादशवार्षिकीम् = द्वादशवर्षपर्यन्तव्यापिनीम्, भृतिम् = भृत्याम्, नामजातिविग्रहवर्जिताम् = नामग्रहणेन जातिग्रहणेन रहिताम्, स्वीचकार = स्वीकृतवान् । अपरम् = द्वितीयम्, लक्षार्धम् = लक्षस्यार्धम्, प्राप्तुम् = लब्धुम्, स्वप्रियाम् = स्वकीयां भार्याम्, शैव्याम् = एतन्नाम्नीम्, कस्यचित् = कस्यचन, वैश्यब्राह्मणस्य = वैश्यायां ब्राह्मणात् समुत्पन्नस्य, कुटुम्बे = परिवारे, आर्याम् = वृद्धाम्, ब्राह्मणीम् = ब्राह्मणपत्नीम्, परिचारितुम् = सेवितुम्, गृहदासीपदे = गृहस्य किङ्करीपदे, नियुयुजे = नियुक्तवान् । पितरम् = हरिश्चन्द्रम्, दर्शं दर्शम् = मुहुर्मुहुः विलोक्य, पुनः पुनः = भूयोभूयः, प्रणमन् = प्रणामं कुर्वन्, स्वमात्रा = शैव्यया, सह = साकम्, कुमारः = बालकः, रोहितः = रोहिताश्वः, निश्चक्राम = निर्जगाम ।

(५५) सर्वे क्षयान्ता निचयाः······दिवं गमिष्यन्तीति ।

सन्दर्भप्रसङ्गौ—अयं गद्यखण्डः सत्यहरिश्चन्द्रोदयनामकस्य गद्यकाव्यस्य षोडशात् प्रकरणात् परिगृहीतो वर्त्तते । राजा हरिश्चन्द्रो विश्वामित्रस्य दक्षिणां दातुम् आत्मानं स्वपत्नीं शैव्यां च दासीं चकार । सः डोम्बराजेन श्मशानघट्टे कर्म कर्तुं नियुक्तो बभूव । स्वकर्तव्यपरायणतया सः स्वस्वामिनोऽन्तरङ्गतां गतः श्मशाने कर्मकर्तॄणां जनानां कर्मणि सर्वविधं सौख्यं निधाय, श्मशानस्य महत्त्वं तेषां सम्बोधनस्य माध्यमेन प्रत्यपीपदत् । विशेषज्ञानां तत्र सर्वे क्षयान्ताः निचयाः, संयोगा विप्रयोगान्ता इति विषये प्रवचनान्यायोजयामास च ।

व्याख्या—सर्वे = सकलाः, निचयाः = सङ्ग्रहाः, क्षयान्ताः = क्षयिष्णवो भवन्ति, किञ्च ज्ञायमानाः, सर्वे = निखिलाः, संयोगाः = सङ्गमाः, प्रिया अप्रियाश्च, विप्रयोगान्ताः—विप्रयोगेन = वियोगेन, अन्ततां यान्ति । निचयानां क्षये परिणामो भवति संयोगानां वियोगे इति कथनस्याभिप्रायः । इति = इत्येनम्, विषयम् = प्रवचनविषयम्, अधिकृत्य = आश्रित्य, अस्माभिः = सर्वैः, अस्मिन् महाश्मशाने कर्मकारिणः, नियुक्ताः = नियोजिताः, पारायणिकाः = परायणकर्तारः, पुराविदः, = ऐतिह्यविदो जनाः, दिवानिशम् = अहोरात्रम्, महताम् = महज्जनानाम्, आख्यानम् = कथां, श्रावयन्तु = श्रवणं कुर्वन्तु ।

अस्माकम्=अस्मिन् महाश्मशाने कर्मकारिणाम्, एतावता=एतेन, कार्योदारेण =औदार्यमयेन कर्मणा, सुकृततन्त्रेण=पुण्याधीनेन, च काशीपरतन्त्राः= काश्यां परतन्त्राः, जनाः=मनुष्याः, अत्रैव=काश्यामेव, जीवनकाले=जीवतावधौ, चतुर्वर्गम्=धर्मार्थकाममोक्षाणां समूहम्, अनुभूय=अनुभवं कृत्वा, अनुमरणम्=मृत्योरनन्तरम्, स्वभावतः=स्वभावेनैव, तपस्समाधिप्रपन्नाः=तपसः समाधेश्च कर्तारः, दिवम्=द्युलोकम्, गमिष्यन्ति=यास्यन्ति ।

(५६) सर्वे ते विश्रब्धश्रोतारस्तस्य······शान्तरसो विरराज ।

सन्दर्भप्रसङ्गौ—अयं गद्यखण्डः सत्यहरिश्चन्द्रोदयनामकस्य गद्यकाव्यस्य षोडशात् प्रकरणात् परिगृहीतो वर्त्तते । अस्मिन् गद्यखण्डे लेखको वर्णयति यत्—राजा हरिश्चन्द्रो विश्वामित्राय दक्षिणां दातुं डोम्बराजस्य दासतां गतः सन् महाश्मशाने कार्यं कुर्वन् स्वकर्तव्यपरायणतया श्मशानाधिपतेः साचिव्यमगात् । एकदा सः सर्वेषां तत्र कर्मकारिणां समक्षं स्वकर्मणो महत्त्वं श्मशाने कर्मकारिणां श्रैष्ठ्यं च प्रत्यपीपदत् । तच्छ्रुत्वा तस्य समे सहकर्मकारिणः अतीव प्रहृष्टाः सन्तः तमभ्यनन्दन् तस्य यथायोगं सहयोगं चाकार्षुः ।

व्याख्या—सर्वे=निखिलाः, ते=समे, विश्रब्धश्रोतारः=विश्वासप्राप्ताः श्रवणकर्तारः, तस्य=हरिश्चन्द्रस्य, पुष्पितम्=अतीव विस्तृतम्, वचः= वचनम्, निशम्य=श्रुत्वा, सानन्दगद्गदम्=आनन्दविह्वलाः, साधु साध्विति= सम्यक् सम्यक् प्रतिपादितम्, इति=इत्यनेन प्रकारेण, आशंसमानाः=प्रशंसां कुर्वाणाः, अयम्=एषः, महात्मा=सज्जनः, अस्माकम्=अस्मिन् श्मशाने कर्मकारिणाम्, जीवनपथम्=जीवनमार्गम्, प्रकाशयति=आलोकयति, इति= इत्थम्, सोत्साहम्=उत्साहपूर्वकम्, सोत्सर्गम्=उत्सर्गपूर्वकं च, तम्=हरिश्चन्द्रम्, अभ्यनन्दन्=अभिनन्दनमकार्षुः । तेषाम्=श्मशाने कर्मकारिणां जनानाम्, निरन्तरनिर्भरसहयोगेन—निरन्तरेण=सार्वकालिकेन, निर्भरेण=अतिशयेन, 'अतिवेलभृशात्यर्थातियात्रोद्गाढनिर्भरम्' इत्यमरः । सहयोगेन=साहाय्येन, द्रुतमेव=शीघ्रमेव, महाश्मशाने=महाकरवीरे, मूर्तिमान्=साक्षात्, शिवसम्पत्त्यनुरोधिशान्तरसः—भगवतः शङ्करस्य सम्पत्तेरनुकूलः शान्तरसः=नवमो रसः, विरराज=सुशोभितो बभूव ।

(५७) दिवारात्रं निरन्तरं ······सर्वमक्षयं भवति ।

सन्दर्भप्रसङ्गौ—अयं गद्यखण्डः सत्यहरिश्चन्द्रोदयनामकस्य गद्यकाव्यस्य सप्तदशात् प्रकरणात् परिगृहीतो वर्त्तते । अत्र लेखकः प्रतिपादयति यत् राजा

हरिश्चन्द्रो डोम्बराजस्य दासतां गतो महाश्मशाने रात्रिन्दिवं कर्माणि आवश्यकानि महाश्मशानस्य सम्पादयामास । एवं कर्माणि कुर्वतस्तस्य सप्तदशवर्षाणि व्यतीतानि इव सञ्जातानि । तदा हरिश्चन्द्रो विचारयामास यत् मम दासतायाः समयस्तु व्यतीत इव सञ्जातः सद्य एवाहमतो कार्यमुक्तो भविष्यामि किन्तु भगवतो विश्वेश्वरस्य नगरीं महाश्मशानञ्चेदं विहाय क्वापि नहि यास्यामि अत्रैव स्थास्यामीति ।

व्याख्या—दिवारात्रम्=रात्रिन्दिवम्, निरन्तरम्=सततम्, महाश्मशानस्य=महाकरवीरस्य, आवश्यकेषु=अवश्यं करणीयेषु, संविधानेषु=कार्येषु, अविरामम्=सततम्, व्यापृतः=संलग्नः, गतश्रमः=अविश्रमः, हरिश्चन्द्रः=अयोध्याधिपः, भृतेः=भृत्यायाः, द्वादश समाः=वर्षाणि, उन्निद्रः=सततं जाग्रतः, समवर्तत=अभूत् । स्वभृतेः=स्वकीयायाः भृत्यायाः, अवधिः=कालः, अवसितप्रायः=समाप्तप्रायः एवेति, परिगणय्य=गणयित्वा, सः=राजा हरिश्चन्द्रः, उद्विग्नमानसः=चिन्तितः, चिन्तयामास=विचारयामास—अतः=एतस्मात् स्थानात्, निर्मुक्तः=कार्यमुक्तः अपि, अहम्=हरिश्चन्द्रः, पुण्यादृष्टप्रदम्, स्थलम्=स्थानमिदम्, परित्यक्तुम्=परित्यागं कर्तुम्, अहं, न=नहि, उत्सहे=उत्साहं करोमि । अत्रैव=अस्मिन्नेव स्थाने, मे=मम, अकारणबान्धवः=निष्कारणबान्धवाः, सन्ति=वर्त्तन्ते । सफलकृतभर्तृपिण्डाः—सफलीकृतम्=सफलायितम्, भर्तुः=स्वामिनः, पिण्डं यैस्ते तथाभूताः, सहकर्माणः—सहैव=साकमेव कर्म येषां ते तथाविधाः, मयि=मम विषये, नितराम्=भृशम्, उत्सर्गपरायणाः=परित्यागतत्पराः, लब्धप्रत्ययाः—लब्धानि=प्राप्तानि, प्रत्ययानि यैस्ते तथाविधाः=विश्वासप्राप्ता इति भावः, बहवः=अनेके, जनाः=मनुष्याः । अतः=एतस्मात्, श्रेयसी=अधिककल्याणकारिणी, लोकसेवास्थली—लोकानाम्=जनानाम्, सेवायाः स्थली=प्राकृता भूमिः, जगति=लोके, नास्ति=नहि वर्त्तते । सुसत्त्वानाम्=सज्जनानां जीवानाम्, सङ्गतिश्च=समागमश्च । यत्र=स्थाने, स्थितः=विद्यमानः, जीवनस्य=जीवितस्य, ईदृशम्=एतादृशम्, कल्याणावहम्=कल्याणकारकम्, साफल्यम्=सफलताम्, इयाम्=प्राप्नुयाम् । अत्र=वाराणस्याम्, महाविद्वांसः, मोक्षकामाः—मोक्षस्य कामना येषां ते तथाविधाः=मुक्त्याप्तेरिच्छवः, आमुक्ति=मुक्तिप्राप्तिपर्यन्तम्, योगाचारम्—योगस्य=योगविद्यायाः, आचारम्=आचरणम्, इहन्ते=कामयन्ते । इह=काश्याम्, मे=मम, आत्मोदयः=आत्मकल्याणम्, नित्यम्=प्रतिदिनम्, एव

वर्धते=वृद्धिमेति । आत्मसम्पदः=आत्मकल्याणोपयोगिन्यः सम्पत्तयः, अधिगम्यन्ते=लभ्यन्ते । परिणते=वार्धक्यं गते, वयसि=अवस्थायाम्, यदि नाम=यदि चेत्, इमाम्=एनाम्, शिवराजधानीम्=भगवतः शङ्करस्य राजधानीम्, परित्यज्य=त्यक्त्वा, अधुना=अस्यामवस्थायाम्, अन्यत्र=अन्यस्मिन् स्थाने, गच्छेयम्=यायाम्, तर्हि=तदा, विवेकशून्येषु=सदसद्विचाररहितेषु, प्रथमाम् सर्वप्रथमाम्, गणनाम्, एष्यामि=प्राप्स्यामि । एतत्=इदम्, स्थानम्=स्थलम्, विख्यातम्=प्रख्यातम्, पेशलम्=सुन्दरम्, अविमुक्तक्षेत्रम्=स्वान्तःस्थितानां सर्वेषां जनानां मुक्तिप्रदम्, शिवेन=शङ्करेण, शाश्वतम्=नित्यम्, उपसेवितम्=संसेवितञ्च, अस्ति=विद्यते । अत्र=वाराणस्याम्, अध्ययनम्=पठनम्, ध्यानम्=ध्येयस्य तैलधारावदविच्छिन्नस्मृतिसन्तानेन चिन्तनम्, ज्ञानं च, सर्वम्=अखिलम्, अक्षयम्=अक्षय्यम्, भवति=जायते ।

(५८) हरिश्चन्द्रोऽबलायाः सूर्यवंशीयत्वेन ·· ··· व्यवहरति स्म ।

सन्दर्भप्रसङ्गौ—अयं गद्यखण्डः सत्यहरिश्चन्द्रोदयनामकस्य गद्यकाव्यस्य सप्तदशात् प्रकरणात् परिगृहीतो वर्त्तते । अत्र लेखकः प्रतिपादयति यत्—राज्ञो हरिश्चन्द्रस्य महाश्मशाने क्रियमाणायाः द्वादशवर्षव्यापिन्याः भृत्यायाः अन्तिमः कालोऽयमासीत् । रात्रौ हरिश्चन्द्रो व्यचारयत् यत् समाप्तेऽपि भृत्यकाले नाहं वाराणसीं विहायान्यत्र क्वापि यास्यामि, अत्रैव निवसिष्यामि । मम पत्न्याः पुत्रस्य च किमभवदित्यपि नाहं संवेद्मि । एतस्मिन्नेवान्तरे सः कस्याश्चनाबलायाः करुणक्रन्दनमश्रौषीत् । तस्याः विलापेनैव स अज्ञासीत् यत् तस्या एकाकी पुत्रः सर्पदंशेन मृतो वर्त्तते । सः आदिशत् यत् अस्य शवस्य दाहाय सार्वजनिककोशेनेन्धनादिकमदीयताम् । सा नारी प्रत्यवोचत् यत् सूर्यवंशीयाहं नहि कस्यचनापि परिग्रहं स्वीकरोमि । ततः स्वमङ्गलसूत्रान्मणिमेकं निष्कास्य ददौ । तद्दृष्ट्वा हरिश्चन्द्रो निश्चयं चकार यत् इयं नारी मम पत्नी शैव्या पुत्रश्च मम रोहितो वर्त्तते । अथापि धैर्यधनः सः सामान्यतया व्यवहारमकार्षीत् ।

व्याख्या—हरिश्चन्द्रः=अयोध्याधिपः, अबलायाः=नार्याः, सूर्यवंशीयत्वेन =सूर्यवंशीयत्वात्, मङ्गलसूत्रग्रथितानन्यसाधारणसूर्यमणिदर्शनेन च—च=किञ्च, मङ्गलसूत्रे ग्रथितः=गुम्फितः, अनन्यसाधारणः=नान्यत्र लब्धः, हरिश्चन्द्रस्य पत्नीं शैव्यां विहाय, यो हि मणिः=रत्नम्, तस्य दर्शनेन=विलोकनेन, सद्यः=शीघ्रमेव, प्रतीयाय=जानाति स्म, यत्, इयम्=एषा, कुलाङ्गना=कुलवधूः, दासीरूपा=दास्याः रूपतां गता, मम=हरिश्चन्द्रस्य,

पत्नी = भार्या, शैव्यास्ति = शैव्या वर्त्तते । च = किञ्च, शवः = कुणपः, मम = हरिश्चन्द्रस्य, कुलपुत्रस्य = वंशाधारभूतस्यात्मजस्य, रोहितस्यैव वर्त्तते इति शेषः । कुतः = केन प्रकारेण, मे = मम हरिश्चन्द्रस्य, पुण्यप्रवृत्तयः = पुण्यमयानि कार्याणि, प्रतीपविपाकिन्यः = प्रतिकूलपरिणामवत्यः सञ्जाताः । अथवा = वा, वितर्केण किम् = तर्ककरणेन को लाभः ? अनर्थाः = विपत्तयः, खलु = इति प्रसिद्धौ, सङ्घचारिण्यः = समूहरूपेण सञ्चरन्ति । इति = इत्यनेन प्रकारेण, सः = राजा हरिश्चन्द्रः, अचिन्तयत् = विचारयामास । तथापि = अथापि—

विकारहेतौ = विकृतेः कारणे सत्यपि, येषाम् = जनानाम्, चेतांसि = अन्तःकरणानि, न = नहि, विक्रियन्ते = विकृतिं यान्ति, त एव = जनाः, धीराः = धीरशब्देनाभिधीयन्ते । इति = इत्यनेन, न्यायेन = नियमेन, प्रज्ञया = समालोचनक्षमया बुद्धया, शोकप्रतिसन्धानेन = शोकस्यानुसन्धानकरणेन, सः = राजा हरिश्चन्द्रः, स्वीये = आत्मीये, श्मशानिककर्त्तव्ये = श्मशानस्य करणीये कर्मणि, पत्नीपुत्रादीनाम् = भार्यात्मजादीनाम्, विचारम् = पर्यालोचनम्, विजहन्निव = परित्यजन्निव, सुस्थिरप्रायः = सुदृढ़प्रायः, व्यवहरति स्म = व्यवहारं करोति स्म ।

(५९) क्षत्रियान्वयं कुलजनं विहाय······निःसंज्ञो बभूव ।

सन्दर्भप्रसङ्गौ—अयं गद्यखण्डः सत्यहरिश्चन्द्रोदयनामकस्य गद्यकाव्यस्य सप्तदशात् प्रकरणात् परिगृहीतो वर्त्तते । अस्मिन् गद्यखण्डे लेखकः प्रतिपादयति यत् श्मशानेऽर्द्धरात्रौ विलपन्त्याः मृतपुत्रायाः करुणक्रन्दनं श्रुत्वा हरिश्चन्द्रो यदा तस्य शवस्य दाहादिकं कर्तुं सार्वजनिककोशेनेन्धनादिकं दातुमाह तदा साऽबला स्वसूर्यवंशमभिधाय नागृह्णात् निर्मूल्यं किमपि अपितु स्वमङ्गलसूत्रादनन्यसाधारणं सूर्यमणिं निर्मुच्य ददौ । तेन हरिश्चन्द्रोऽपि निश्चितं चकार यत् इयं मम भार्या शवश्च मम पुत्रस्य वर्त्तते । यदा साऽवोचत् यत् कश्चन सूर्यवंशीय एव मम पुत्रशवस्य गङ्गाया धारायां प्रवाहं करोतु तदा हरिश्चन्द्रेणाभिहितं यदहमस्मि सूर्यवंशीयः क्षत्रियः । इत्युक्त्वा रोहितशवं गङ्गाया धारायां निपात्य निःसंज्ञो बभूव ।

व्याख्या—क्षत्रियान्वयम् = क्षत्रियाणां वंशे समुत्पन्नम्, कुलजनम् = कुलीनं पुरुषम्, विहाय = परित्यज्य, न = नहि, कश्चित् = कोऽपि, अन्यः = भिन्नपुरुषः, मम = शैव्यायाः, पुत्रम् = आत्मजम्, अधिगङ्गम् = गङ्गायाम्, प्रवाहयेत् = प्रवाहितं कुर्यात्, इति = इत्यनेन प्रकारेण, दैवेन = भाग्येन, उपहृतायाः = प्रताडितायाः, मानिन्याः = स्वात्माभिमानयुक्तायाः, सत्याग्रहम्—सत्यम् = वास्तविकम्, आग्रहम् = अनुरोधम्, अनुरुध्य = स्वीकृत्य, हरिश्चन्द्रः = अयोध्याधिपः,

अहम्, सूर्यवंशीयः=सूर्यवंशे समुत्पन्नः, क्षत्रियोऽस्मि=राजन्योऽस्मि। इति=इत्यनेन प्रकारेण, शनकैः=शनैः, गद्गदम्=विह्वलवर्णम्, निगद्य=उक्त्वा, अह्नाय=शीघ्रमेव, शवम्=कुणपम्, स्वयमेव=आत्मनैव, गृहीत्वा=आदाय, गङ्गावारिषु=गङ्गायाः तोयेषु, प्लवते स्म=प्रवाहयति स्म। मध्येधारम्=धारमध्ये, साश्रुपातम्=अश्रुपातेन सहितम्, तम्=शवम्, प्रवाह्य=प्रवाहितं कृत्वा, पुत्रशोकेन=आत्मजस्य शोकेन, अवशः=विवशः सन्, तत्रैव=गङ्गाधारमध्ये एव, सः=हरिश्चन्द्रः, निःसंज्ञो बभूव=संज्ञारहितः सञ्जातः।

(६०) वरुणकुले शिक्षितो हरिश्चन्द्रस्य···तदनुरोधेनात्रागामिति।

सन्दर्भप्रसङ्गौ—अयं गद्यखण्डः सत्यहरिश्चन्द्रोदयनामकात् गद्यकाव्यात् परिगृहीतो वर्त्तते। अस्मिन् गद्यखण्डे लेखकः प्रतिपादयति यत् राजा हरिश्चन्द्रः स्वहस्तेनैव मायामयरोहितस्य शवं गङ्गायाः धारायां प्रवाहयित्वा निःसंज्ञो बभूव। वस्तुतस्तु रोहितो वरुणकुले एवासीत्। तस्मिन्नेव काले अधीतविद्यां रोहिताश्वमादिदेश वरुणो यत् ते पिता गङ्गाधारं निःसंज्ञो पतितोऽस्ति। शीघ्रं तं त्रायस्व। गुरोरादेशेन सपदि तत्रागत्य रोहितः निःसंज्ञं पितरं तटेऽनयत्, स्वकीयं सम्पूर्णं वृत्तान्तं च श्रावयामास सर्वजनसमक्षम्।

व्याख्या—वरुणकुले=वरुणस्य गुरुकुले, प्रशिक्षितः=प्रशिक्षणं प्राप्तः, हरिश्चन्द्रस्य=अयोध्याधिपस्य, पुत्रः=सुतः, रोहितः=रोहिताश्वः, आचार्यनियोगेन—आचार्यस्य=वरुणस्य, नियोगेन=आदेशेन, अन्वक्षम्=समक्षम्, तत्र=महाश्मशाने, उपस्थाय=उपस्थितो भूय, निश्चेष्टम्=निःसंज्ञं, पितरम्=स्वजनकम्, क्षीरनीरम्=यथायथम्, निर्भरम्=अतिशयेन, अभिषिक्तम्=संसिक्तम्, उन्निनाय=उपर्यनयत्। तम्=पितरम्, तटम्=गङ्गाकूलम्, आनीय=नीत्वा, तत्र=गङ्गातटे, स्थितान्=विद्यमानान्, शोककर्शितान्=शोकेनातिदुःखितान्, जनान्=पुरुषान्, सः=रोहिताश्वः, न्यबोधयत्=निबोधयामास—अहम्=अत्रभवतां समक्षम् उपस्थितः, रोहितोऽस्मि=रोहिताश्वनामाऽस्मि, वरुणकुले=वरुणस्य गुरुकुले, उभयविद्ययोः=शास्त्रशस्त्रविद्ययोः, पारदृश्वा=पारङ्गमः, स्नातकः=लब्धविद्यः, गुरुणा=आचार्येण वरुणेन, आदिष्टः=आदेशप्राप्तः, आशुकारी=शीघ्रं कार्यसम्पादकः, असि=विद्यसे। भो वत्स=हे शिष्य! गङ्गावारिणि=गङ्गाजले, निःसंज्ञं=संज्ञया रहितम्, निमज्जन्तम्, स्वपितरम्=स्वजनकम्, रक्ष=त्राहि। तदनुरोधेन—तस्य=आचार्यस्य, अनुरोधेन=आज्ञया, अत्र=इत्यत्र, अगाम्=आगतोऽस्मि।

(६१) जीवपुत्रा शैव्या प्रह्लादजननं······स्पर्शरसज्ञतां ययौ ।

सन्दर्भप्रसङ्गौ—अयं गद्यखण्डः सत्यहरिश्चन्द्रोदयनामकस्य गद्यकाव्यस्य सप्तदशात् प्रकरणात् परिगृहीतो वर्तते । अस्मिन् गद्यखण्डे लेखकः प्रतिपादयति यत् मायामयस्य रोहिताश्वस्य सर्पदंशेन मृतस्य शवं गङ्गायाः धारायां प्रवाहयित्वा हरिश्चन्द्रो निःसंज्ञो बभूव । वरुणकुलेऽधीतविद्यं शास्त्रशस्त्रविद्ययोः पारदृश्वानं रोहिताश्वं वरुणः स्वपितरं रक्षितुमादिदेश । तथैवाकार्षीत् रोहिताश्वः । शैव्या जीवपुत्रा बभूव । किन्तु निःसंज्ञं स्वप्राणनाथं विलोक्य मर्तुं निश्चयं चकार । तदैव तत्र देवाः ब्रह्माविष्ण्वादिकाः प्रकटीभूय अमृतवर्षेण हरिश्चन्द्रं जीवयामासुः । हरिश्चन्द्रस्य रोहिताश्वं संस्पृश्याभूतपूर्वं सुखं लेभे ।

व्याख्या—जीवितः पुत्रो यस्याः सा जीवपुत्रा, शैव्या = हरिश्चन्द्रस्य पत्नी, रोहितम् = रोहिताश्वम्, पुनः = भूयोऽपि, लब्ध्वाऽपि = सम्प्राप्याऽपि, जीवितेशम् = प्राणनाथम्, हरिश्चन्द्रम् = राजानम्, निःसंज्ञम् = संज्ञाशून्यम्, अभिज्ञाय = ज्ञात्वा, शोकाभिभूता = शोकेनातिदुःखिता, निश्चेतना = चेतनया रहिता, सती, आत्मानम् = स्वम्, धारयितुम् = धारणं कर्तुम्, न = नहि, शशाक = समर्था बभूव । सा = शैव्या, निश्चेष्टम् = चेष्टया रहिता सती, धरणीतले = पृथिव्यां, न्यपतत् = निपपात । तदा = तदानीम्, सानुक्रोशैः = रूपान्वितैः, ब्रह्मादिदेवर्षिभिः = ब्रह्मेत्यादिकैः देवैः ऋषिभिश्च, सपुष्पवर्षम् = पुष्पस्य वर्षेण सहितम्, प्रत्यक्षीभूय = प्रकटीभूय, हरिश्चन्द्रः, शैव्या च, अमृतयोगेन = पीयूषसंयुक्तेन, वारिणा = जलेन, चेतनाम् = संज्ञाम्, प्रापितौ = गमितौ । हरिश्चन्द्रादयः श्मशानवासिनः = श्मशाने निवासिनः, देवर्षीणाम् = देवानाम् ऋषीणाञ्च, समागमेन = सङ्गमेन, विस्मयापन्नाः = विस्मयान्विताः, यथायोगम् = योग्यतानुसारेण, समुदाचारेण = शिष्टाचारेण, स्तुतिपुरस्सरम् = स्तुतिपूर्वकम्, तान् = तत्रोपस्थितान्, अभ्यनन्दन् = अभिनन्दितानकार्षुः । शैव्याहरिश्चन्द्रौ = शैव्या च हरिश्चन्द्रश्च तौ, सजीवम् = जीवितम्, रोहितम् = रोहिताश्वम्, पुनः = भूयः, अवाप्य = सम्प्राप्य, सुतमुखदर्शनेन = आत्मजमुखावलोकनेन, स्वस्थौ = स्वास्थ्यं गतौ, दिष्ट्या = भाग्यवशात्, आयुष्मान् = दीर्घायुः, वर्धस्व = वृद्धिं प्रापय, इति = इत्यनेन प्रकारेण, साशीर्वचोभिः = आशीर्वादयुक्तैः वचनैः, ननन्दतुः = आनन्दयुक्तौ बभूवतुः । तदा = तस्मिन् काले, हरिश्चन्द्रः चिरात् = दीर्घकालपर्यन्तम्, पुत्ररत्नस्पर्शरसज्ञताम् = पुत्रवर्यसंस्पर्शजन्यरसाभिज्ञताम्, ययौ = प्राप्तवान् ।

पद्यानां व्याख्यात्मको भागः

(१) बहुकल्याणोदर्कमिच्छेच्च नृपतिः सुतम् ।
प्रजानां ब्रह्मचर्येण सत्येन च तितिक्षया ।
उपवासैस्तथेज्याभिर्व्रतैः कौतुकमङ्गलैः ।। इति ।

सन्दर्भप्रसङ्गौ—अयं पद्यांशः सत्यहरिश्चन्द्रोदयनामकस्य गद्यकाव्यस्य चतुर्थप्रकरणात् परिगृहीतो वर्त्तते । अत्र लेखकः प्रतिपादयति यत् राजा बहूनां कल्याणकरं पुत्रमिच्छेत् । तदर्थं नहि केवलेन राज्ञा अपि तु प्रजाभिश्चापि सत्योपवासब्रह्मचर्यतितिक्षादिकस्य पालनं कर्त्तव्यम् । तथाहि—

व्याख्या—नृपतिः = राजा, बहुकल्याणोदर्कम्—बहु = अनेकप्रकारकम्, कल्याणम् = मङ्गलमेव, उदर्कं यस्याऽसौ तथाविधम्, सुतम् = पुत्रम्, इच्छेत् = अभिलषेत् । तथाविधस्य पुत्रस्य प्राप्तेः साधनानि प्राह—प्रजानाम् = प्रकृतिजनानाम्, ब्रह्मचर्येण = ब्रह्मचर्यस्य पालनेन, सत्येन = सत्यवादित्वेन, तितिक्षया = सहिष्णुतया च, उपवासैः = लङ्घनैः, इज्याभिः = यज्ञैः, तथा = किञ्च, कौतुकमङ्गलैः—कुतूहलरूपैः मङ्गलैः = मङ्गलकारिभिः व्रतैश्च ।

(२) सुरभिकुसुमगन्धैर्वासिताशामुखानां
फलभरनमितानां वृक्षकाणां सहस्रैः ।
विरचितपरिवेशश्यामलोपान्तरेखं
शमयति परितापं स्वागतानां जनानाम् ।।

सन्दर्भप्रसङ्गौ—अयं श्लोकः सत्यहरिश्चन्द्रोदयनामकस्य गद्यकाव्यस्य षष्ठात् प्रकरणात् परिगृहीतो वर्त्तते । अनेन श्लोकेन कविः वर्णयति यत् नैमिषारण्ये वृक्षाः सुरभितैः कुसुमैः फलैश्च परिपूर्णाः आसन्, यदा हरिश्चन्द्रो विश्वस्य धर्मेण विजयप्रसङ्गेन तत्रागमत् । तथाविधैः पादपैरेव नैमिषारण्यं तत्रागतानां जनानां स्वागतं विदधाति ।

व्याख्या—सुरभिकुसुमगन्धैः—सुरभिः = सौगन्ध्ययुक्तं, चेदं कुसुमम् = पुष्पम्, तस्य गन्धैः = सुगन्धैः, वासिताशामुखानाम्—वासिता = सुवासिता, आशानाम् = दिशाम्, मुखानि = वदनानि, यैस्ते तेषाम्, फलभरनमितानाम्—

फलानाम्, भरेण=भारेण, नमितानाम्=नम्रतां गतानाम्, वृक्षकाणाम्=पादपानाम्, सहस्रैः=सहस्रसङ्ख्याभिः, स्वागतानाम्=स्वस्मिन् सम्प्राप्तानाम्, जनानाम्=मनुष्याणां, विरचितपरिवेशश्यामलोपान्तरेखम्—विरचितः=निर्मितः, परिवेशः=मण्डलम्, विरचितपरिवेशः, स चासौ श्यामलः=श्यामवर्णः, विरचितपरिवेशश्यामलः, तथाविधा उपान्तरेखा=सविधे विद्यमाना रेखा, येन तं विरचितपरिवेशश्यामलोपान्तरेखम्, परितापम्=सन्तापम्, शमयति=अपाकरोति, इदं नैमिषारण्यमिति शेषः।

(३) आनाकमेकधनुषा भुवनं विजित्य
पुण्यैर्दिवः क्रतुशतैर्विरचय्य मार्गम्।
इक्ष्वाकवः सुतनिवेशितराज्यभारा
निःश्रेयसाय वनमेतदुपाश्रयन्ते ॥ इति।

सन्दर्भप्रसङ्गौ—अयं श्लोकः सत्यहरिश्चन्द्रोदयनामकस्य गद्यकाव्यस्य षष्ठात् प्रकरणात् परिगृहीतो वर्त्तते। धर्मेण विश्वस्य विजयं कर्तुं प्रवृत्तो राजा हरिश्चन्द्रो नैमिषारण्यं गत्वा तत्र मासमेकमुवास। तत्र सो विद्यमानः कदाचित् स्मारयामास यत् अस्माकं पूर्वजाः केवलं धनुष एव बलेन सम्पूर्णस्य जगतो विजयं कृत्वा, भुक्त्वा चानन्यसाधारणान् भोगान् वार्धक्ये समागते, पुत्रोपरि राज्यस्य भारं संस्थाप्य तथाचरितुमन्ते नैमिषारण्यमाश्रयन्ति।

व्याख्या—एकधनुषा—एकेन=केवलेन, धनुषा=कार्मुकेन, आनाकम्=स्वर्गलोकपर्यन्तम्, भुवनम्=जगत्, विजित्य=स्ववशवर्ति विधाय, पुण्यैः=पुण्यफलप्रदैः, क्रतुशतैः—क्रतूनाम्=यज्ञानाम्, शतैः=शतसङ्ख्याकैः, दिवः=स्वर्गस्य, मार्गम्=पन्थानम्, विरचय्य=रचयित्वा, इक्ष्वाकवः=इक्ष्वाकुवंशीया राजानः, सुतनिवेशितराज्यभाराः—सुते=पुत्रे, निवेशितः=स्थापितः, राज्यस्य=साम्राज्यस्य, भारः यैस्ते तथाविधाः, निःश्रेयसाय=मुक्तये, एतत्=इदम्, वनम्=अरण्यम्, उपाश्रयन्ते=सेवन्ते।

(४) पृथिव्यां सन्ति ये धर्मा मया सर्वे समादृताः।
एकराजोऽस्मि संवृत्तो मनुधर्मविवृद्धये ॥
कर्मविजय इत्यसौ विश्वं येन मया धृतम्।
विश्वव्यापि-हितान्वेषि-प्रवृत्तिपरिकल्पनात् ॥
धर्मेण विश्वसंश्रयं कृत्वा स्मः पुण्यकामिनः।
अस्माकं हि कुले जाता धौरेयाश्चक्रवर्तिनः ॥

निवापाञ्जलिदानेन पूर्वान् पूर्वान् नृपान् सदा।
तर्पयिष्यन्ति योग्यत्वादित्यस्माकं मनीषितम् ॥

सन्दर्भप्रसङ्गौ—इदं श्लोकचतुष्टयं सत्यहरिश्चन्द्रोदयनामकस्य गद्यकाव्यस्य सप्तमात् प्रकरणात् परिगृहीतो वर्त्तते। हरिश्चन्द्रस्य पूर्वजेष्वन्यतमो मान्धाता धर्मविजयमकार्षीत्। कुरुक्षेत्रं धर्मविजयप्रसङ्गेन गतो हरिश्चन्द्रो मान्धातृविषयिणीं गाथामसकृत् शुश्राव—पृथिव्यां सन्ति इत्यादिकाम्।

व्याख्या—पृथिव्याम्=भूम्यां, ये धर्माः=शैवशाक्तसौरगाणपत्यादिकाः धर्माः, सन्ति, ते सर्वे=समे धर्माः, मया समादृताः सन्ति, तेनाहम् एकराजोऽस्मि=प्रधानराजाऽस्मि, सर्वेषां पृथिव्यां वर्तमानानाम् अन्येषां राज्ञां प्रशासकत्वात्, संवृत्तोऽस्मि=सञ्जातोऽस्मि। मानवेन्द्रेण मनुना प्रवर्तितो धर्म एव सर्वेषां धर्माणां श्रेष्ठः स्यात्, तदन्तर्वतिरूपेणान्ये अपि धर्माः समादृताः स्युरिति भावः। मनुवंशस्यैवाखिलायामिलायां प्रशासनत्वात्। मनुप्रोक्त एव धर्मो मानवधर्मः।

विश्वव्यापिहितान्वेषिप्रवृत्तिपरिकल्पनात्—विश्वम्=सम्पूर्णं जगत्, व्याप्नोति यत् तत् विश्वव्यापि, विश्वव्यापि च तत् हितम्=कल्याणम्, तदन्वेषति यत्तत् विश्वव्यापिहितान्वेषि, तथाभूता या प्रवृत्तिः=व्यवहारः, तस्याः परिकल्पनात्=कल्पनाकरणात्, असौ धर्मविजयः—धर्मस्य विजयः= धर्म एव सर्वत्र विजयते इति, येन च धर्मविजयेन, मया=मान्धात्रा, विश्वम्= सम्पूर्णं जगत्, धृतम्=धारितम्।

धर्मेण=धर्मद्वारा, विश्वसंश्रयम्—सम्पूर्णस्य जगतः, संश्रयम्=आश्रयं, कृत्वा=निर्माय, वयम्, पुण्यकामिनः—पुण्यानि कामयन्ते ये ते=पुण्येप्सवः, स्मः=भवामः। अस्माकम्=सूर्यवंशीयानाम्, कुले=वंशे, हि=निश्चयेन, धौरेयाः=अग्रगण्याः, चक्रवर्तिनः=चक्रवर्तिनो राजानः, सञ्जाताः=उत्पन्नाः।

योग्यत्वात्=योग्यतायुक्तत्वात्, सदा=सर्वदा, पूर्वान् पूर्वान्=स्वपूर्वपूर्वकालवर्तिनः, नृपान्=राज्ञः, निवापाञ्जलिदानेन—निवापस्य=पितृतर्पणस्य, अञ्जलीनां दानेन=प्रदानेन, तर्पयिष्यन्ति अस्मत्कुले सञ्जाताः इति अस्माकम्=मान्धाताप्रभृतीनां राज्ञाम्, मनीषितम्=मनीषया निर्धारितमास्त इति भावः।

(५) सर्वं पुण्यं भवतु भवतो भव्यभाग्योदयाय।
विश्वाग्रे ते विलसतुतमां कीर्तिराशिः सुधामा ॥

सन्दर्भप्रसङ्गौ—अयं श्लोकः सत्यहरिश्चन्द्रोदयनामकस्य गद्यकाव्यस्यैकादशप्रकणात् उद्धृतो वर्त्तते। राजा हरिश्चन्द्रो विश्वामित्राय प्रतिश्रुतायाः दक्षिणाया दानस्योपायान्तरमनवेक्ष्य अयोध्यां विहाय काशीं यातुं निश्चिकाय। तेन समाचारेणायोध्यकाः सर्वे प्रजाजना दुःखिताः सञ्जाताः। तैरपि निश्चितं यत् यत्र राजा हरिश्चन्द्रो यास्यति तत्रैव वयमपि यास्याम इति। ज्ञात्वा राजा हरिश्चन्द्रः प्रजाः बहुधा सान्त्वयामास। तेन सन्तुष्टास्ते प्राहुः—'सर्वं पुण्यं भवतु भवतो' इत्यादिकं श्लोकम्।

व्याख्या—भवतः=हरिश्चन्द्रस्य, भव्यभाग्योदयाय—भव्यस्य=दिव्यस्य, भाग्यस्य=दैवस्य, उदयाय=उत्पत्तये, सर्वम्=सकलप्रकारकम्, पुण्यम्=पुण्यादृष्टम्, ते=तव हरिश्चन्द्रस्य, सुधामा—सुष्ठु=मनोज्ञम्, धाम=महः, यस्याः सा तथाविधा, कीर्तिराशिः—कीर्तेः=यशसः, राशिः=समूहः, विश्वाग्रे—विश्वस्य=सम्पूर्णस्य जगतः, अग्रे=समक्षम्, विलसतुतमाम्=अतिशयेन स्फुरत्विति भावः। महर्षये प्रतिश्रुतां दक्षिणां स्वार्जितेन धनेन दातुं यत्रेयमुपक्रमते अयोध्यां विहाय सर्वेषां सर्वमनोरथपूरणसमर्थां वाराणसीं यातुं सोऽयमुपक्रमः भव्याय महते पुण्याय ते भविष्यतीति प्रजानामभिप्रायः।

(६) परिग्रहो हि दुःखाय यद्यत् प्रियतमं नृणाम्।
अनन्तसुखमाप्नोति तद्विद्वान् यस्त्वकिञ्चनः॥ इति।

सन्दर्भप्रसङ्गौ—अयं श्लोकः श्रीरामजीउपाध्यायेन प्रणीतस्य सत्यहरिश्चन्द्रोदयनामकस्य गद्यकाव्यस्य द्वादशतमात् प्रकरणात् परिगृहीतो वर्त्तते। राजा महर्षये विश्वामित्राय प्रतिश्रुतां दक्षिणां दातुमनाः सर्वा उद्विग्नाः प्रजाः सान्त्वयित्वा वाराणस्यै प्रतस्थे। मध्येमार्गं गच्छता हरिश्चन्द्रः शैव्यायाः मनःक्लान्ति विलोकयता अभिहितं तस्या मनसः शान्त्यै यत्—जीवने धनस्य अधिकं तादृशं महत्त्वं नास्ति, यादृशं महत्त्वं त्वं जानासि। अत एव तत्त्वज्ञैः परिग्रहस्य निन्दनं कृतम् औदासिन्यस्य च प्रशंसनम्। स्वयमेव भगवताऽप्यभिहितम्—परिग्रहो हि इत्यादिकम्।

व्याख्या—हि=निश्चयेन, नृणाम्=मनुष्याणाम्, यद्यत्=वस्तु, प्रियतमम्=अतिशयेन प्रियं भवति, तस्य सर्वस्यैव वस्तुनः, परिग्रहः=सङ्ग्रहः, दुःखायैव भवति=दुःखप्रद एव भवतीत्यर्थः। परिगृहीतस्य वस्तुनः अर्जनपरिरक्षणादिषु दुःखानुभवस्य सर्वलोकानुभूतत्वात्। तद्विद्वान्—स चासौ विद्वान्=तत्त्वज्ञः पुरुषः, परिग्राह्येषु समस्तेषु रूपरसगन्धस्पर्शशब्दात्मकेषु वस्तुषु तेषां सेवन-

जन्यस्य कष्टस्य ज्ञाता पुरुषः, अतएव यः पुरुषः संसारादुदासीनः सन् अकिञ्चनः =नास्ति किञ्चनं यस्याऽसौ तथाविधः, सर्वेषु स्वेषु परेषु च वस्तुषु निःस्पृहः। तथा चाह श्रुतिः—

'ईशावास्यमिदं सर्वं यत् किञ्च जगत्यां जगत्।
तेन त्यक्तेन भुञ्जीथाः मा गृधः कस्यस्विद् धनम्' ।। इति ।

एवंविधः पुरुषः अनन्तम्=नास्त्यन्तो यस्याऽसौ तथाविधम्, सुखम्= आनन्दम्, आप्नोति=अनुभवति, लोकात् निराशत्वात् आत्मसुखानुभवपरत्वाच्चेति ।

(७) सत्यं सत्यं पुनः सत्यं विदुषामेकसंश्रयम् ।
दृश्यो विश्वम्भरो नित्यं स्नातव्या मणिकर्णिका ।।

सन्दर्भप्रसङ्गौ—सत्यहरिश्चन्द्रोदयनामकस्य गद्यकाव्यस्य चतुर्दशप्रकरणात् गृहीते अस्मिन् श्लोके सा दिव्या श्रुतिः वर्णिता वर्त्तते यां महर्षये विश्वामित्राय प्रतिश्रुतां स्वार्जितेन धनेन दातुं दक्षिणां राजा हरिश्चन्द्रः अयोध्यां स्वराजधानीं विहाय वाराणसीमागत्य शुश्राव । सैव दिव्या श्रुतिः सत्यं सत्यम् इत्यादिका वर्त्तते ।

व्याख्या—सत्यं सत्यम्, पुनः सत्यम्=इदं सार्वभौमं सत्यमास्ते, तच्च विदुषाम्=वाराणसीमाहात्म्यकृतापरोणाम्, एकम्=सर्वप्रधानम्, संश्रयम्= आश्रयस्वरूपम्, संरक्षकमिति भावः। वाराणस्याः महात्म्याभिज्ञाः ये चात्रानन्दकानने निवसन्त भगवतः शङ्करस्य चरणयुगलं संसेव्य मुक्तिमधिगन्तुं कामनया ते सर्वे अनेन सत्येन परिचिताः संरक्षिताश्च सन्तीति भावः । अत एव त्वया हरिश्चन्द्रेणाऽपि सपरिवारेणेदं सत्यमवगन्तव्यम् । कीदृशं तत् सत्यमास्ते इति चेत्—नित्यम्=प्रतिदिनम्, विश्वम्भरः=भगवान् विश्वेश्वरः, दृश्यः= अवलोकनीयः। किञ्च—स्नातव्या मणिकर्णिका=मणिकर्णिकाकुण्डे घट्टे च स्नानं करणीयम्, काशिवासिभिरिति भावः । आभ्यामेव कर्मभ्यां वाराणस्यां निवसतां सतां सर्वे पुरुषार्थाः सम्पद्यन्त इति भावः ।

(८) सत्यसत्त्वशालिनीं सुधर्ममार्गदर्शिनीम् ।
भुक्तिमुक्तिदायिनीं विरक्तिमुक्तिबोधिनीम् ।।
पापसङ्घनाशिनीं परात्परां पुरातनीम् ।
पुण्यभूमिमादरान्नमामि काशिकापुरीम् ।।

सन्दर्भप्रसङ्गौ—अयं श्लोकः सत्यहरिश्चन्द्रोदयनामकस्य गद्यकाव्यस्य चतुर्दश प्रकरणात् परिगृहीतो वर्तते । विश्वामित्राय मुनयेऽभिलषितां लक्षस्वर्णमुद्रात्मिकां दक्षिणां दातुं वाराणसीं गतो राजा हरिश्चन्द्रो भगवतो विश्वेश्वरस्य दर्शनं कर्तुमादेशमयीं, मणिकर्णिकास्नानकरणस्य चादेशमयीं दिव्यां वाणीं श्रुत्वा काशीपुरीं नमति तस्याः ऐश्वर्यवर्णनपुरस्सरम् ।

व्याख्या—सत्येन = तथ्येन, सत्त्वेन = सत्त्वगुणेन, च शालते या सा तथाभूताम्, सुधर्ममार्गदर्शिनीम्—सुष्ठु धर्मस्य = वेदविहितकर्मणः, मार्गम् = पन्थानं, दर्शयति या सा तथाभूता ताम्, भुक्तिमुक्तिदायिनीम्—अलौकिकानामभ्युदयोपयोगिनां विषयाणां भोग एव भुक्तिपदेनाभिधीयते, पुरुषार्थस्यान्यतमं नाम मुक्तिः, ते ददाति या सा तथाभूतां काशीपुरीम्, विरक्तिमुक्तिबोधिनीम्—विरक्तिर्नाम सांसारिकेभ्यस्सर्वेभ्यो विषयेभ्यो वैतृष्ण्यम्, मुक्तिः = मोक्षः, तौ बोधयति = प्रबोधयति, या सा तथाभूता तां विरक्तिमुक्तिबोधिनीम् । पापानाम् = निषिद्धकर्मरूपाणि हि पापानि भवन्ति, तेषां यो हि सङ्घः = समूहः, तं नाशयति = विनाशयति, या सा तथाविधाम्, परात्पराम् = सर्वश्रेष्ठाम्, पुरातनीम् = प्राचीनतमाम्, पुण्यभूमिम् = पुण्या चासौ भूमिः तथाविधाम्, काशिकापुरीम् = काश्यभिधानां नगरीम्, वाराणस्यपराभिधानाम्, आदरात् = आदरपूर्वकम्, नमामि = नमस्करोमि ।

(९) भाग्यैर्मेऽधिगता ह्यनेकजनुषां सर्वाघविध्वंसिनी
सर्वाश्चर्यमयी मया शिवपुरी संसारसिन्धोस्तरी ।
लब्धं तज्जनुषः फलं कुलमलञ्चक्रे पवित्रीकृतः
स्वात्मा चाप्यखिलं कृतं किमपरं सर्वोपरिष्टात् स्थितम् ॥

सन्दर्भप्रसङ्गौ—अयं श्लोकः श्रीरामजीउपाध्यायेन प्रणीतस्य सत्यहरिश्चन्द्रोदयनामकस्य गद्यकाव्यस्य चतुर्दशात् प्रकरणादुद्धृतो वर्त्तते । विश्वामित्राय महर्षये दक्षिणां दातुमना राजा हरिश्चन्द्रः वाराणसीमागत्य लक्षसङ्ख्यात्मिकाः सुवर्णमुद्रा लब्धुमनाः वाराणसीं विलोक्य काशीं पुरीमुपश्लोकयति ।

व्याख्या—मे = मम हरिश्चन्द्रस्य, भाग्यैः = सौभाग्यानां प्राबल्येनैव, अनेकजनुषाम् = अनेकेषां जन्मनाम्, सर्वाघविध्वंसिनी—सर्वाणि = निखिलानि, अघानि = पापानि, विध्वंसयति = समूलं विनाशयति, या सा तथाविधा, सर्वाश्चर्यमयी = सकलाश्चर्यकारिभिः प्रभावैः सम्पन्ना, संसारसिन्धोस्तरी—

संसार:=जगत्, एव सिन्धु:=समुद्र:, समुद्रसंसारयो: दुस्तरत्वात्, तस्मै तरी=सन्तरणसाधनस्वरूपा, वाराणसीनिवासिनां जनानां संसारबन्धो विनश्यतीति भाव:, एतादृशी, शिवपुरी=भगवत: शङ्करस्य नगरी वाराणसी, मया=हरिश्चन्द्रेण, अधिगता=प्राप्ता। अस्या प्राप्तौ मम जन्मान्तरं पुण्यादृष्टमेव हेतु:। तत्=तस्मात् हेतो:, मया जनुष:=जन्मन:, फलम्=लक्ष्यमुद्देश्यं वा, लब्धम्=समुपगतम्, पवित्रीकृत:=पवित्रतां गत: अहम्, कुलम्=वंशम्, अलञ्चक्रे=समलञ्चकार। अपरं किम्=अन्यत् किम्, सर्वोपरिष्टात् स्थितम्=सर्वोपरि विद्यमानम्, स्वात्माऽपि=निजात्मा अपि, अखिलम्=परिपूर्णं कृतम्। अत एवात्रागमनेन मम सर्वाणि कर्माणि सिद्धानीति भाव:।

समालोचनात्मको भागः

(१) प्रश्नः— सत्यहरिश्चन्द्रोदयस्य प्रथमप्रकरणस्य सारांशं लिखत ।

उत्तरम्—भारते वर्षे कोशलनाम जनपदो वर्त्तते, विश्वस्मिन् विश्वे विख्यातो दिवौकसामपि दर्शनीयतां गतः जनपदमिदं मानवेन्द्रो मनुः वासयति स्म सरय्वा नद्या समलङ्कृतायां धरण्याम् । सरय्वास्तटे कोसलानां राजधानी अयोध्या नाम नगरी मनो राजधानी बभूव । अत्र महान्तो विद्वासः, महर्षयः आचार्याश्च निवसन्तः सन्त्या विश्वमानवान् सच्चारित्र्येण शिक्षायामासुः । तथाहि—

'एतद्देशप्रसूतस्य सकाशादग्रजन्मनः ।
स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः' ।। इत्याह मनुः ।

अत्रैव भगवान् भास्करः स्वेनैव सूर्यवंशीयानां क्षत्रियाणां वंशं प्रवर्तयामास लोकविश्रुतं सत्यवादिभ्यो राजभ्यः प्रत्याततम् । अस्मिन्नेव वंशे परवर्तिकाले महाराज इक्ष्वाकुः बभूव, यस्य नाम्ना सूर्यवंशीयाः इक्ष्वाकुवंशीयनाम्ना प्रख्याता बभूवन् ।

अस्मिन् त्रैलोक्यप्रख्याते सूर्यवंशे त्रेतायुगे समागते प्रजानां नन्दनः, सर्वविद्यावदातः, ब्रह्माण्डस्य गोप्ता, उदारधीः, यशस्वितमः त्रिशङ्को राज्ञः सत्यवत्यां समुत्पन्नो हरिश्चन्द्रो नाम राजर्षिर्बभूव । यस्य राज्ञः प्रजाः स्ववर्णाश्रमधर्मपालने रताः परमार्थमेव स्वजीवनस्य लक्ष्यं मन्यमानाः सौमनस्यं परस्परमावहमानाश्चासन् ।

(२) प्रश्नः—सत्यहरिश्चन्द्रोदयस्य द्वितीयप्रकरणस्य सारांशं लिखत ।

उत्तरम्—त्रेतायुगीयः सूर्यवंशीय अयोध्याधिपतिः सकलप्रजानन्दनः, सकलकल्याणगुणसागरो राजा हरिश्चन्द्रो बभूव । तस्य पत्नी शैव्या आसीत् । तस्य पुरोधाः त्रैलोक्यप्रक्यातो ब्रह्मर्षिर्वसिष्ठ आसीत् । पुत्रावाप्तिकामना राजा हरिश्चन्द्रो ब्रह्मर्षेः वसिष्ठस्याश्रमे जगाम । विना पुत्रावाप्तिं मम पितर

अतृप्ता एव भविष्यन्ति भविष्यति काले इति मनीषाऽऽसीत् महाराजस्य हरिश्चन्द्रस्य। आगतौ दम्पती वीक्ष्य महर्षिर्वसिष्ठः प्रावोचत् यत् गुणवान् सुतस्तु तपसा श्रमेण च समुपलभ्यो भवति। तव पुत्रो भवेदिति मम पिता जलाधिष्ठातृ देवो वरुणोऽपि वाञ्छतीति देवानां सभायां समुपस्थिता मम पितृमुखाज्ज्ञात्वा मामवोचत्। तव महायशस्वी लोकपालकः पुत्रो भवितेति ध्यानयोगेनाहमपि पश्यामि, तदर्थं गङ्गासागरयोः सङ्गमस्थले गत्वा वरुणदेवस्त्वया साक्षादुपासनीयः। तपसा सर्वं साध्यं भवति। महत् तपश्चरित्वा बदर्याश्रमे तव पूर्वजो मनुः सर्वाः प्रजाः ससर्ज। इत्थं विस्रम्भयित्वा सो मुनिः दम्पती विससर्ज।

ततो राजधान्यामागम्य हरिश्चन्द्रो राज्यसंरक्षणं पत्न्याः हस्ते मन्त्रिषु च विसृज्य सरयूपुलिनपथा गङ्गासागराय पदातिः सन् प्रयस्थे। वनानि, मुनीनां आश्रमान्, ग्रामान्, ग्रामजनान्, वन्यान् जन्तून्, पशून् पक्षिणश्च विलोकयन् राजा हरिश्चन्द्रो मनसि महान्तं मोदमनुभवन् गङ्गासागरक्षेत्रमाजगाम। तत्र महता श्रमेण सिद्धिक्षेत्रे तपश्चरन् राजा हरिश्चन्द्रो वरुणस्योपासनामकरोत्। तत्र दर्शं दर्शं सागरस्यामितां शोभां सः हर्षप्रकर्षमनुबभूव। गङ्गासागरस्य सुन्दरवनमेव हरिश्चन्द्रस्य तपःस्थलमासीत्।

(३) प्रश्नः—सत्यहरिश्चन्द्रोदयनामकस्य गद्यकाव्यस्य तृतीयप्रकरणस्य सारांशं लिखत।

उत्तरम्—वरुणोपासनकाले राजा हरिश्चन्द्रः ऊर्ध्वबाहुर्जितेन्द्रियश्च बभूव। तत्र सर्वदा सूर्यमेव समवलोकयन् नित्याभियुक्तः सन् वरुणं संस्मरन् जपन् ध्यायंश्चोवास राजा हरिश्चन्द्रः। योगबलादेव तं राजानं क्षुत्पिपासादिकं नहि बाधते स्म। राज्ञः प्रभावमनल्पमवलोक्य वृक्षादिकाः सुगन्धीनि पुष्पाणि मधुराणि फलानि च समर्पयामासुः राज्ञः सेवायाम्। तपःप्रभावेण हिंस्रा अपि जन्तवः क्षमावन्तः शान्ताश्चाभवन्। कुत्रापि जीवेषु वैरो नहि दृष्टोऽभूत्। तपश्चरतस्तस्यानेकानि वर्षाणि व्यतीतानि। एकदा राजा हरिश्चन्द्रः तपसा प्रसन्नं प्रसन्नवदनं लावण्यामृतधाराभिः प्रजास्तर्पयन्तम् अपरं नारायणमिव वरुणं समक्षं समागतमवलोकयामास। समक्षमागतं वरुणदेवं तैस्तैरुपचारैः राजा हरिश्चन्द्रः तं समर्चयामास। वरुणेनाभिहितं—राजन्! तव सर्वलोकहितङ्करः पुत्रो भविता, अत एव तदर्थं त्वया तपश्चरणमावश्यकमासीत्। तवायं पुत्रोदयो युष्मदीयो नास्ति अपि देवानामपि कार्यमनेन सम्पत्स्यते। अद्यावधिचरितेन

सात्त्विकेन तपसा सर्वातिशायिनी तवात्मगुणसम्पत्तिः सहस्रगुणं समुत्कर्षिता वर्धते। 'आत्मा वै जायते पुत्रः' इति न्यायेन तव पुत्रे ते गुणाः समुत्पत्स्यन्ते। तेन हि तव पितृकुलोत्थानं भविष्यति। किन्तु तव पुत्रस्य सर्वंविधाः शिक्षाः वरुणकुले भविष्यतीति। अत एव वरुणालयनिवेशेन तस्मिन् तव पुत्रे विश्वोत्थानयोग्यता प्रभुत्वं चोत्पत्स्यते।

एवं आशीर्वचोभी राजानमनुगृह्य वरुणः स्वालयाय प्रतस्थे, राजापि अयोध्यायै चचाल। तपसा कृशोऽपि हरिश्चन्द्रः पुत्रलाभसम्भावनया नवतामिव समवाप। अयोध्यामागच्छतो राज्ञो मार्गोऽतिमनोहरो बभूव। वायुस्तं शीतलमन्दसुगन्धः सिषेवे।

(४) प्रश्नः—रोहितापहारनामकस्य प्रकरणस्य साराशं लिखत।

अथवा

सत्यहरिश्चन्द्रोदयनामकस्य गद्यकाव्यस्य चतुर्थसर्गस्य कथां वर्णयत।

उत्तरम्—राजा हरिश्चन्द्रः पुत्रावाप्तये समुपास्य वरुणं लब्ध्वा च ततः पुत्रप्राप्तेर्वरम् अयोध्यामाजगाम। तं समाचारं श्रुत्वा प्रजाः प्रहृष्टा अभूवन्। सर्वत्र महोत्सव आयोजितो बभूव। सम्पूर्णो हि राजपथः शीतलैः जलैः सिञ्चितो बभूव।

सत्त्वसम्पन्नस्य पुत्रस्य प्राप्तये सर्वासां प्रजानां सात्त्विकता वरुणवचनानुसारेण शास्त्रविधिमधोविधं सङ्कल्पयामास राजा हरिश्चन्द्रः—

'बहुकल्याणोदर्कमिच्छेच्च नृपतिः सुतम्।
प्रजानां ब्रह्मचर्येण सत्येन च तितिक्षया॥
उपवासैस्तथेज्याभिर्व्रतैः कौतुकमङ्गलैः'।

अपरञ्च—'सत्त्वेषु सत्त्वमङ्कुरयति'॥ इति।

सत्त्वशीलस्य पुत्रस्यावाप्तये राजाऽत्मनि प्रजासु च सत्त्वं संवर्द्धयामास। सर्वत्र प्रजास्वात्मानात्मविवेको वर्धयामास। सर्वत्र प्रीतिसाम्राज्यं समुदितमभूत्। निष्कामकर्मयोगः प्राभवत्, ज्ञानिनो जनाः लाभालाभयोः समदर्शिनोऽभूवन्। जनानां मङ्गलकामनायाः शैब्यायाः अधिकुक्षि हरिश्चन्द्रकुलाङ्कुरो वर्धते स्म। यथाकालं शैब्या चक्रवर्तिलक्षणं सुतं जनयामास। वसन्त काले सञ्जातस्य पुत्रस्य

नाम रोहिताश्व इति चकार राजा। काले काले सर्वान् संस्कारान् सम्पादयामास ब्रह्मर्षिर्वसिष्ठः।

रोहिताश्वस्य उपनयनकाले देवा अपि तत्र महोत्सवे समागुः। हरिश्चन्द्रस्तु वाञ्छति स्म वरुणालये प्रवेशं रोहिताश्वस्य किन्तु सर्वाः प्रजा रोहिताश्वेऽनुरागान्धासीत्। अत एव ताः नैच्छन् राजकुमारस्य वरुणालये प्रवेशम्। वरुणस्यादेशानुसारेणायोध्यायां प्रचारितोऽभूत् यत् उपनयने विधौ—'अद्भ्यस्त्वा परिददामि' इति आचार्यवाक्यानन्तरं बटुः सरय्वामुन्मज्जति निमज्जति च। उपनयनकाले यदा रोहिताश्वो सरय्वां प्रविवेश तदा वरुणस्य पूर्वनियोजितयोजनानुसारेण वरुणदूताः तं निगृह्य वरुणालये प्रवेशयामासुः मायमयस्तु रोहिताश्व उन्मज्जति स्म।

(५) प्रश्नः—विश्वविजयस्वरूपनिर्णयनामकस्य सारांशं लिखत सत्यहरिश्चन्द्रोदयनामकस्य गद्यकाव्यस्य।

अथवा

सत्यहरिश्चन्द्रोदयनामकस्य गद्यकाव्यस्य पञ्चमप्रकरणस्य सारांशं लिखत।

उत्तरम्—रोहिताश्वस्य उपनयनकाले नानादिङ्मण्डलेभ्यो महर्षयः समागता आसन्। ते हरिश्चन्द्राय नानाविधान्याशीर्वचांस्युच्चारयामासुः। अनन्तरं तैरभिहितं यद् भवता प्रजास्वादर्शस्य स्थापना कर्तव्या, तदर्थं भवता धर्मविजययात्रा कर्तव्या, येन प्रजासु विशेषरूपेण विनयाधानं भवेच्च धरित्री सुजला सुफला च। भ्रमणकाले महात्मनामुपस्थानं कर्तव्यम्। अनेन प्रकारेण कृतेन धर्मविजयेन सर्वे जनाः सुखिनो भविष्यन्ति।

महर्षीणां वचांसि श्रुत्वा मया किं कर्तव्यमित्यस्मिन् विषये हरिश्चन्द्रो ब्रह्मर्षि वसिष्ठं पप्रच्छ। महर्षिणाऽभिहितं यत्—भवतां वंशेऽनेके राजानो सैन्यबलेन विश्वविजयमकार्षुः, किन्तु विश्वस्य धर्मविजयस्त्वसाधारणः। अस्य विजयस्य साधनं सात्त्विकं भवति। धर्मविजयं येन प्रकारेण महाराजो मान्धाताऽकरोत् तथैव भवताऽपि कर्तव्यः। अनेन धर्मविजयेन आध्यात्मिकं शिल्पशास्त्रात्मकं परमोदार्यं प्रवर्त्तते। प्रजासु सात्त्विकी वृत्तिः सुकरा भवति। आश्रमेषु तत्र गुरुकुलानि संस्थापनीयानि अस्मिन् प्रसङ्गे। अनेन विजयेन धर्मस्य राज्यं भवति, राजा च धर्मस्वरूपो भवति। सर्वत्र वसुधैव कुटुम्बकस्य भावना संवर्द्धते। यथा

कश्चित् पिता स्वकीयान् सर्वान् पुत्रान् समानरूपेण सुखयति, वर्धयति, शिक्षयति, संस्कारयति, समुन्नयति च तथैव धर्मराज्ये धर्म एव पिता सर्वान् जीवलोकान् समुन्नयति च।

धर्मराज्यस्य प्रजाः स्वार्थं विहाय परमार्थमेव साधयितुं प्रवृत्ताः भवन्ति। तत्र नहि कश्चिद्दानं परिग्रहीतुं कामयते अपितु सर्वे परस्मै दातुमेव कामयन्ते। तव पूर्वजो मान्धाता पुरा धर्मविजयेन चक्रवर्तिसम्राडभूत्। तस्यादर्श एव तव पथप्रदर्शनाद् वरेण्यः। सः कुरुक्षेत्रे चायजत। अस्मिन् विश्वविजये त्वया नैमिषारण्यकुरुक्षेत्रयोरुभयोरेव पुण्यतपोवनयोर्दर्शनं कर्त्तव्यम्। अस्यां यात्रायां तवानुयात्रिकाः भविष्यन्ति—महान्तो विद्वांसः, शिल्पकलाभिज्ञाः, कृषि-गोरक्ष्यादिशास्त्राभिज्ञाः साधवश्च।

(६) प्रश्नः—सत्यहरिश्चन्द्रोदयषष्ठप्रकरणस्य सारांशं लिखत।

अथवा

सत्यहरिश्चन्द्रोदयनामकस्यस्य गद्यकाव्यस्य विश्वविजयपथे नैमिषारण्यदर्शननामकस्य षष्ठप्रकरणस्य सारांशं लिखत।

उत्तरम्—महर्षिभिः आदिष्टः हरिश्चन्द्रो ब्रह्मर्षिणा वसिष्ठेन स्वरूपतो निरूपितां धर्मेण विश्वविजययात्रां प्रारब्धवान्। तदात्वे राज्ञा सहासन् महान्तो विद्वांसः, सर्वभाष्यविदांवराः, धर्मकुशलाः महाव्रताश्च। प्रारब्धया यात्रया राजा हरिश्चन्द्रो दिनद्वयानन्तरं नैमिषारण्यमगात्। तत्र गवां कोटिभिः शुभ्रायमाणां, मरकतहरितनीरैः रम्यन्तराम्, शीतलैः स्वच्छैः जलैर्मज्जनं कुर्वतां जनानां सकलकलुषनिकन्दिनीं गोमतीं नदीं दर्शं दर्शं महान्तं मोदमनुबभूव। अस्मिन्नेव नैमिषारण्ये मानवेन्द्रो मनुः परं तप अकार्षीत्। अत एव नैमिषारण्यं हि—

'सुरभिकुसुमगन्धैर्वासिताशामुखानां,
फलभरनमितानां वृक्षकाणां सहस्रैः।
विरचितपरिवेशश्यामलोपान्तरेखं,
शमयति परितापं स्वागतानां जनानाम्' ॥

गोमत्यास्तटे महात्मनामाश्रमास्सन्ति नैके, यत्र पतत्रिणः कलरवं कुर्वन्ति, मृगाश्च तत्र शान्ताश्चरन्ति। तत्र ब्रह्मर्षिः वसिष्ठो हरिश्चन्द्रपूर्वजानां नैमिषारण्य-संश्रयत्वं स्मारयामास—

'आनाकमेकधनुषा भुवनं विजित्य, पुण्यैर्दिवः क्रतुशतैः विरचय्य मार्गम् ।
इक्ष्वाकवः सुतनिवेशितराज्यभारा, निःश्रेयसाय वनमेतदुपाश्रयन्ते' ।। इति ।

अस्मिन्नेव नैमिषारण्ये मान्धाता शताधिकैः देवयजनैः इन्द्रमप्यतिचक्राम । पुनः राजा हरिश्चन्द्रः तत्र मासमेकमुषित्वा तेषां तेषामृषीणां पावनानामाश्रमाणां दर्शनमकरोत् पदातिः तत्र तत्र गत्वा । अत्रैव महर्षिः दधीचः समेषां देवानां मिश्रके तीर्थे प्राह दक्षयज्ञकाले—

'अनृतं नोक्तपूर्वं मे न च वक्ष्ये कदाचन ।
देवतानां ऋषीणां च मध्ये सत्यं ब्रवीम्यहम्' ।। इति ।

अयमेव महर्षिः लोकहिताय वज्रनिर्माणाय स्वास्थीन्यपि ददाति स्म देवानां कल्याणाय वृत्रासुरवधाय च ।

(७) प्रश्नः—सत्यहरिश्चन्द्रोदयगद्यकाव्यस्य विश्वविजयनामकस्य प्रकरणस्य सारांशं लिखत ।

अथवा

सत्यहरिश्चन्द्रोदयगद्यकाव्यस्य सप्तमप्रकरणस्य सारांशं लिखत ।

उत्तरम्—धर्मविजययात्राप्रसङ्गेन राजा हरिश्चन्द्रो नैमिषारण्यात् मान्धातुः महाराजस्य तपोभूमिं कुरुक्षेत्रदिदृक्षया तपोधनानां महर्षीणामाशीर्वचोभिरात्मानं पावयन्, प्रजानां सत्कारं सहस्रगुणं प्रत्युपकुर्वन्, पृथग्जनानपि स्वमहानुभावप्रकर्षेण संस्कारपथे विनयन्, सर्वेषु वर्णेष्वाश्रमेषु च धर्मपरिपालनप्रवृत्तिं परिवर्द्धयन् मासेनैकेन दृशद्वतीसरस्वत्योरन्तर्वर्तिनि कुरुक्षेत्रे शिवेराश्रमं कुरुक्षेत्रे विद्यमानमाजगाम । शिवेरेव धर्मपरीक्षणाय ब्रह्मणो निदेशेनेन्द्राग्नी श्येनकपोतयो रूपमास्थाय तस्याश्रममाजग्मतुः । श्येनाक्रान्तः कपोतः शिवेः शरणमाजगाम । शरणागतरक्षणपरायणः शिबिः कपोतमांसभरतुल्यं स्वशरीरमादातुं प्रतिजज्ञे । कपोतमांसभरश्चापूर्यमाणमवलोक्य स्वशरीरमेव तुलायामपरस्यां संस्थापयामास । इत्थम्भूतं शिवेश्चारित्र्यं निशम्य हरिश्चन्द्रे सत्यपालनविषयिणी प्रवृत्तिः प्रबला बभूव । तत्र सः मान्धातुः धर्मविजयकारिणो विषयिणीं गाथामश्रोषीत्—

'पृथिव्यां सन्ति ये धर्माः मया सर्वे समादृताः ।
एकराजोऽस्मि संवृत्तो मनुधर्मविवृद्धये ।।

धर्मविजय इत्यसौ विश्वं येन मया धृतम् ।
विश्वव्यापिहितान्वेषिप्रवृत्तिपरिकल्पनात् ॥
धर्मेण विश्वसंश्रयं कृत्वा स्म: पुण्यकामिनः ।
अस्माकं हि कुले जाता धौरेयाश्चक्रवर्तिनः ॥
निवापाञ्जलिदानेन पूर्वान् पूर्वान् नृपान् सदा ।
तर्पयिष्यन्ति योग्यत्वादित्यस्माकं मनीषितम्' ॥

राजा हरिश्चन्द्रो धर्मेण विश्वविजयप्रसङ्गे स्वानुयायिभिः सर्वत्र शिल्पकलानिष्णातान् प्रेषयामास । ते च जना राजानुशासनं सभाजयितुं लोकलोकान्तरं परिभ्रमन्तः यथायोगं सर्वत्र लोकेषु इष्टापूर्तानि सम्पादयन्तः आचार्यकुलानि संस्थापयन्तः, महापथेषु वृक्षारोपणेन जलाशयातिथिगृहनिर्माणादिकेन च लोकाननुजगृहुः । इत्थं सर्वत्र धर्मस्यैव प्राधान्यं दृग्गोचरमभूत् ।

(८) प्रश्नः—सत्यहरिश्चन्द्रोदयगद्यकाव्यस्याष्टमप्रकरणस्य कथां वर्णयत ।

अथवा

सत्यहरिश्चन्द्रोदयगद्यकाव्यस्य परीक्षासङ्कल्पनामकस्याष्टमप्रकरणस्य सारांशं लिखत ।

उत्तरम्—त्रैलोक्यस्य कष्टनिवारणाय ब्रह्माविष्णुशिवादिका देवाः सदा जागरूका भवन्ति । ब्रह्मसूनुर्नारदो लोकानां कष्टनिवारणेच्छया सर्वदा लोकेष्वटति । कृतयुगे समाप्ते समागते च त्रेतायुगे लोकवृत्तान्तजिज्ञासया देवर्षिर्नारदो लोकान् विलोक्य ब्रह्माणं लोकपितामहमेकान्ते आगत्याह—समागतेऽस्मिन् त्रेतायुगे जनास्तेन प्रकारेण सदाचारपरायणा नहि विलोक्यन्ते यथा कृतयुगे आसन् । तदात्वे जनाः सदायतनाः सत्प्रतिष्ठाश्चासन् सत्यं चात्मानं कुर्वन्ति स्म । भवता धर्मनिकेतनीकृता जना निकामं पूर्णाश्चासन् । स्वेतरान् जनान् सम्भरन्तश्च भूमानमनुबभूवुः । साम्प्रतं तेषु सद्वृत्तेरभाव इव सञ्जायते, अत एव तेषां समक्षं विशिष्टादर्शानां सम्प्रतिष्ठाऽनिवार्या वर्त्तते । साम्प्रतं राजसु प्रजासु च कामक्रोधावधिकायेते । दुश्चारित्र्याभिभूतास्तेऽस्तङ्गतमहिमानः चाण्डालीक्रियन्ते ।

लोकसंरक्षणेप्सया ब्रह्मा देवानां समितौ नारदोक्तमर्थमवोचत् । तदनन्तरं विचारपरायणैः समस्तैर्देवैर्महर्षिभिर्निर्णीतं यत् लोकसङ्ग्रहाय विशिष्टादर्शस्य

प्रतिष्ठा अनिवार्या वर्त्तते । साम्प्रतम् अयोध्याधिपतिः हरिश्चन्द्रो विशिष्यते । स एव साम्प्रतं सत्यरक्षणे प्रभवति । अत एव सूर्यवंशस्य कल्याणपरायणो ब्रह्मर्षिः विश्वामित्रः तस्य सत्यस्य कठिनां परीक्षां करोतु । सर्वैः परीक्षणं कर्तुं निवेदितो विश्वामित्रो तस्य विषये परीक्षणं कर्तुं ब्रह्मलोकं जगाम ।

समागतं ब्रह्मर्षिं विश्वामित्रं विलोक्य ब्रह्मावोचत् यत् देवैर्महर्षिभिश्च सम्यक् निर्णीतम् । अत एव भवता तस्य राजर्षेः हरिश्चन्द्रस्य सत्यपरीक्षणं प्राणपणेन कर्त्तव्यम् । महाप्रभावसम्पन्नोऽपि हरिश्चन्द्रो लोकान् नहि तथाविधं प्रभावयिष्यति, अत एव तस्य भवता सम्यक् सत्यपरीक्षणं विधेयम् । ब्रह्मणो वचो निशम्य ब्रह्मर्षिणा विचारितं यत् कर्मणाऽनेन मे कीर्तिस्तु क्षयमेष्यति, किन्तु तेन हरिश्चन्द्रस्य प्रभावो नूनं वर्द्धयिष्यति; अत एव तस्यात्मगुणोत्कर्षाय अहं तस्य परीक्षणं करिष्यामीति । एतदर्थं स हरिश्चन्द्रस्य राजधानीमयोध्यां प्रतीयाय ।

(९) **प्रश्नः**—सत्यहरिश्चन्द्रोदयस्य गद्यकाव्यस्य नवमप्रकरणस्य सारांशं लिखत ।

अथवा

सत्यहरिश्चन्द्रोदयस्य गद्यकाव्यस्य हरिश्चन्द्रस्य विश्वामित्राय लक्षदानप्रतिश्रुतिनामकस्य नवमप्रकरणस्य सारांशं लिखत ।

उत्तरम्—धर्मविजयानन्तरं राजा हरिश्चन्द्रो राजसूयस्य यागस्यायोजनमकार्षीत् । तस्मिन् यागे सर्वेभ्यो राष्ट्रेभ्यः प्रख्याताः कलाकृतयः प्रदर्शनीषु प्रदर्शिता आसन् । पण्डितपरिषदि महान्तो विद्वांसः तत्तद्विषयकाणां शङ्कानां समाधानमकार्षुः । तत्र पौराणिकाः, इन्द्रजालिकाः सङ्गीतनृत्यनाट्यविदश्च विद्वांसः स्वस्वकलानां प्रदर्शनमकार्षुः ।

तस्मिन् राजसूययागे 'यज्ञस्य पत्नी दक्षिणा' 'हतो यज्ञोऽदक्षिणः' इत्यादिभिः सूक्तिभिः सम्यक् परिचितो राजा सर्वत्र पञ्चगुणं दानमकार्षीत् । सर्वे याचका अयाचकाः सम्पादिताः । इत्थं सम्पूर्णं राजकोषं व्ययितमभूत् । 'राजसूये सर्वस्वदानेन जीवनसाफल्यमवाप्नुयादि'ति नियमानुसारेण राजा हरिश्चन्द्रो राज्ञी च शैब्या सयौतुकं सर्वस्वं दानमकार्षुः । यज्ञान्ते अवभृथस्नानेन द्वारा राज्ञो हरिश्चन्द्रस्य सम्राट्पदेऽभिषेकः प्रारब्धोऽभूत् । तस्मिन्नेव काले महोग्रतेजा अपि ब्रह्मर्षिर्विश्वामित्रः किञ्चित् हीनतेज इवात्मानं कृत्वा सर्वेषां समक्षमागत्य प्राहोच्चैः—दक्षिणार्थ्यहं भो ! इति । समागतस्य महर्षेः सम्यक्पूजां

विधाय राजा हरिश्चन्द्रो कोशाधिपतिमादिदेश तस्मै लक्षं सुवर्णमुद्राः दातुम्। तच्छ्रुत्वा व्याकुलः कोशपतिः राज्ञः सविधे समागत्य प्राह शनैः यत् साम्प्रतं कोशः सर्वो व्ययितो वर्त्तते। अत एव प्रतिश्रुतां दक्षिणां साधनान्तरेण ददातु भवानिति। तच्छ्रुत्वाऽनुद्विग्नो हरिश्चन्द्रः प्राह ब्रह्मर्षि विश्वामित्रं यत् भवतो गुरुकुलस्य सम्यक् सञ्चालनाय राज्यमेवाखिलमहं ददामि। विश्वामित्रेणाभिहितं यत् राज्यं परित्यज्याहमनुगतोऽस्मि, अत एव मह्यं लक्षं मुद्रा एव ददातु भवान्।

हरिश्चन्द्रो मुनिवचनं सादरं स्वीकृत्याह सप्ताहावधावेव दक्षिणां भवते प्रतिश्रुतां दास्यामीति। तच्छ्रुत्वा ब्रह्मर्षिः विश्वामित्रो ब्रह्मनियोगपालनरूपायां स्वकार्यसिद्धौ हरिश्चन्द्रवचनं साधकं मत्वा प्रसन्नेन मनसा ततो यथायोगं विहर्तुं निश्चक्राम।

(१०) प्रश्न—सत्यहरिश्चन्द्रोदयस्य गद्यकाव्यस्य काशीगमनाय परिवारमन्त्रणं नामकस्य दशमप्रकरणस्य सारांशं लिखत।

उत्तरम्—विश्वामित्राय दानविषयकं समाचरं श्रुत्वा सर्वे नागरिकाः विषण्णवदनाः सन्तस्तथा तथा निन्दन्ति स्म। कश्चन तं विश्वस्यामित्रमाह, कश्चनार्थपिशाचः, कश्चन कपटमुनिः कश्चन च पाषाणहृदयः। राजा हरिश्चन्द्रस्तु सत्वरमेव मन्त्रशालायामामात्यैस्सह सङ्गत्य विश्वामित्राय प्रतिश्रुता दक्षिणा केन प्रकारेण प्रदेयेति बहुधा विचारयामास। प्रत्युत्पन्नबुद्धयोऽपि मन्त्रिणो राज्ञे कमप्युपायं यथोचितं कृतस्य धर्मविजयस्यानुकूलं दर्शयितुमसमर्थास्तेऽन्ते प्राहुः यत् कर्त्तव्याकर्त्तव्यविषयाणां सन्देहास्पदतां गते भवता स्वेनैवान्तःकरणेन किमपि निर्धारणीयं तत्र भवतामन्तःकरमेव प्रमाणम्।

मन्त्रिभिः मन्त्रविचारणायां विफलप्रयासेन हरिश्चन्द्रेण स्वमनसि निर्धारितं यत् स्वार्जितवित्तावाप्तयेऽहं कैलासं काशीं वा यास्ये। तत्रैव भगवान् भूतभावनो मे मनोरथान् सफली करिष्यति। किन्तु कैलासे मानवव्यवहारस्याभावत्वात् काशीगमनमेव मे वरम्। सेयं काशी भगवतो विश्वेश्वरस्य राजधानी वर्त्तते, यत्र सकलसुरासुरमुकुटमणिमञ्जरीसमर्चितपादपीठो भगवान् शङ्करो विराजते विश्वेश्वराख्येन ज्योतिर्लिङ्गरूपेण।

काशीं यातुं कृतनिश्चयो राजा स्वपत्नीं शैव्यां श्रावयितुं यदान्तःपुरं प्रविवेश तदा तमागच्छन्तं विलोक्य राजसूये सर्वस्वं कृतदानवती, सर्वैराभूषणैर्विरहिता शव्या जयत्वार्यपुत्रः इति समुत्थाय तस्य स्वागतं व्याजहार। राजा

चोपविश्य यदा स्वमनीषितं श्रावयति स्म तदा तयापि तेन सह काशीं यातुं स्वाभिप्रायं तथा सविनयं प्रकाशितवती येन राजा तां वारयितुं नहि समर्थो बभूव, अनुमेने च तां स्वकीयामर्द्धाङ्गिनीं पतिव्रतां शैव्यां स्वेन सह काशीं गन्तुम।

(११) प्रश्न—सत्यहरिश्चन्द्रोदयनामकस्य महाकाव्यस्य 'हरिश्चन्द्रस्य पौरजानपदामन्त्रणं' नामकस्यैकादशस्य प्रकरणस्य सारांशं लिखत।

उत्तरम्—राजा हरिश्चन्द्रः सपरिवारो विश्वामित्राय प्रतिश्रुतां दक्षिणामर्जयितुं श्वः प्रातःकाले काश्यै प्रस्थास्यतीति विषयः समाचारः कर्णाकर्णिपरम्परया शीघ्रमेव नगरे परिव्याप्तो बभूव। सर्वे जनाः तत्र तत्र सङ्गत्य व्याकुलाः विषण्णवदनाः वार्तयन्ति स्म, दीनहीनमानसाः। राजानं हरिश्चन्द्रं विना नहि वयं जीवितुं समर्थाः स्म, तं विनाऽयोध्येयं भयङ्कराकारा भविष्यति। अराजके जनपदे उत्पाता एव वर्द्धन्ते। अतः वयमपि तत्रैव यास्यामो यत्र यास्यति अस्माकं राजा हरिश्चन्द्रः। तेन सहारण्येऽपि निवासो वरम्। तं विना अयोध्यावासो नहि रोचतेऽस्मभ्यम्। महाराजपदोपरि अभिषेकावसरे राज्ञा तु प्रतिज्ञातमासीत् यावज्जीवं प्रजाः पालयिष्यामीति। तस्याः कृतायाः प्रतिज्ञायाः प्रतिघातेनापरस्याः प्रतिज्ञायाः पालनं नहि साम्प्रतम्। विश्वामित्रस्तु कपटमुनि अतएव तस्मै काकणिकाऽपि नहि प्रदेया।

अनेन प्रकारेण वार्तयत्सु सकलेषु पौरजानपदेषु अप्रकम्पः स्वनिश्चये राजा हरिश्चन्द्रः प्रकृतिजनानवोचत्—भवद्भिः मम प्रतिज्ञाघाताय कश्चनापि प्रयासो नहि कर्तव्यः। यत्र क्वाप्यहं भविष्यामि सर्वत्रैव युष्माभिस्सहैव मे मनो भविष्यन्ति। विपत्तिकाले समागते भवद्भिः धैर्यधारणं कर्तव्यम्। सत्यसंरक्षणमेव मम कुलस्य मम च व्रतम्। अत एव सत्यं नहि हास्ये केनापि प्रकारेण। सत्यसंरक्षणेनैव भवतामपि सुतरां संरक्षणं सम्पत्स्यते। अनेन महर्षिणा विश्वामित्रेणोपस्थापितेन वैषम्येन नः कल्याणमेव भावि। भवन्ति हि श्रेयांसि बहुविधानि। अत एवाहं काशीं यास्ये। धनं च स्वेनैवोपार्जयित्वा प्रदास्ये महर्षये विश्वामित्राय।

राज उपर्युक्ताशयकेन सम्बोधनेन सर्वे प्रकृतिजना विगतसन्तापा अभूवन्। तैरभिहितम्—

'सर्वं पुण्यं भवतु भवतो भव्यभाग्योदयाय ।
विश्वाग्रे ते विलसतुतमां कीर्तिराशिः सुधामा' ।। इति ।

(१२) प्रश्नः—सत्यहरिश्चन्द्रोदयनामकस्य गद्यकाव्यस्य 'काशी-प्रगमन'नामकस्य द्वादशतमप्रकरणस्य सारांशं लिखत ।

उत्तरम्—पत्नीपुत्राभ्यां सहितो राजा हरिश्चन्द्रः काश्यै अयोध्यातः प्रचचाल । काशीं गच्छतस्तान् त्रीन् मध्येमार्गं विलोक्य, विलोक्य चैतेषामलोकसामान्यं लावण्यं महाप्रभावं च जना आश्चर्यचकिताः सन् विचारितवन्तः—कोऽयमसाधारणो जनः स्वयमपि दुःखमनुभवन् श्रियमिव लावण्यवतीं सुकुमारातिशयां पुष्पमृद्वीं स्वकीयां भार्यामपि दुःखयति कान्तारेषु पदातिः पर्यटन् ? केचन तु तेषां नामग्रामोद्देश्यादिकं प्रष्टुम्मना अपि तेषां प्रभावातिशयेनाभिभूतमानसाः किमपि वक्तुमक्षमाः तैः साकं किञ्चिद्दूरं गत्वा निवर्तिता अभूवन् । केचन तान् त्रीन् देवविज्ञान् मत्वा तेषां पुष्पफलादिभिः समर्चामकार्षुः । तेऽपि त्रयः तत्र जनानां स्नेहातिशयमनुभवन्तः, वननिर्झरस्रोतस्विनीवृक्षलतागुल्मादिकानां विपुलां शोभामवलोकयन्तु काशीपथपथिकाः अभूवन् ।

मध्येमार्गं हरिश्चन्द्रः शैव्याः मनसि सञ्जातां चिन्तामनुभूय, तां सान्त्वयन्नाह यदिदमस्माकं सौभाग्यमेवाऽस्ते यद् वयं राज्यबन्धाद्विनिर्मुक्ताः स्मः । इदानीं वयं स्वश्रमेण धनमर्जयिष्यामः । धनराहित्यमेव तपश्चर्यायाः प्रथमं सोपानम् । पुरा महर्षयो धनरहिता एव स्वब्रह्मबलेन विश्वं विश्वं स्ववशीचक्रुः । अपरिग्रहव्रतेनैव ते सम्पूर्णे समाजे सम्मानिता अभूवन् । तथा चोक्तं भगवता—

'परिग्रहो हि दुःखाय यद्यत् प्रियतमं नृणाम् ।
अनन्तसुखमाप्नोति तद्विद्वान् यस्त्वकिञ्चनः' ।। इति ।।

हरिश्चन्द्रस्य विचारस्य मनसा समर्थनं कुर्वन्त्यपि शैव्या प्राह यत्—विना धनं हरितोषणानां यज्ञानामप्यनुष्ठानमसम्भवं भवति, अतएव धनस्य सङ्ग्रहोऽप्य निवार्यो भवति । हरिश्चन्द्रेणाभिहितं—शैव्ये ! बहुभिर्द्रव्यैरनुष्ठितस्य यज्ञस्यापि पुण्यदृष्टमतिशेते स्म । उञ्छवृत्त्या जीवननिर्वाहं कुर्वतः ब्राह्मणपरिवारस्य सक्तुदानोत्थितं पुण्यादृष्टमिति शृणुमो वयम् । एवं बहुविधां शास्त्रसमर्थितां वार्तां कुर्वन् सपरिवारो राजा हरिश्चन्द्रः काशीमुपजगाम ।

(१३) प्रश्नः—सत्यहरिश्चन्द्रोदयगद्यकाव्यस्य काश्यां 'सम्मान-योजना'नामकस्य त्रयोदशप्रकरणस्य सारांशं लिखत ।

उत्तरम्—राज्ञो हरिश्चन्द्रस्य राजसूययागे काशिराज उपस्थित आसीत्। ततः काशीं प्रत्यागतोऽपि सः सम्राट्पदाभिषेकावसरे विश्वामित्रकृतं विघ्नं हरिश्चन्द्रस्य राज्याद् विवासनं च स्मारं स्मारं भृशं दुःखितो बभूव, निश्चिकाय च दैवस्यानतिक्रमणीयताम्। यदा सः शुश्राव यत् राजा हरिश्चन्द्र आत्मनिष्क्रयार्थं काशीमायाति, सः मन्त्रणाविशारदैः मन्त्रिभिः सह राजोचितकरणीयविषये विमृश्य निर्णीतवान् यदस्माभिस्तथाविधं राजानं प्रति विधेयं येन विश्वप्रकाशिनी काशी अन्वर्थसंज्ञावती सम्भवेदिति।

राज्ञी मन्त्रिणः प्राहुः यद् हरिश्चन्द्रस्य सम्माने तस्य काशीयात्रां च सफलीकर्तुमस्माभिस्तथाविधो महोत्सवो माननीयो येन सम्पूर्णायां काश्यामानन्दवीचिः प्रसृमरा भवेत्। अत एव तस्यागमनात् प्रागेव राजमार्गा रथ्याश्च सुपरिष्कृताः करणीयाः, कुत्रापि वैषम्यमौद्धत्यं वा न स्यात्। सर्वे मार्गाः शीतलैः जलैः सेचनीयाः, राजमार्गाश्च सुगन्धितैः कुसुमैः सुशोभिताः कृतास्स्युः। गीतवाद्यनाट्यैः सर्वेषु मन्दिरेषु देवाः माङ्गल्याशंसयोत्थापनीयाः। स्वयमेव काशिराजः काशीमहाद्वारे गत्वा तस्य समङ्गलं स्वागतं कृत्वा राजानं तं काश्यां प्रवेशयतु। सर्वेषु प्रासादेषु ध्वजपताका उच्छ्रिताः स्युः। इत्थं स राजराजेश्वरोचितया प्रक्रिययात्र काश्यां भवतु सम्मानितः। यदि नाम तस्य हरिश्चन्द्रस्य भृत्यानुयोगायानिवार्य आग्रहो भवेत्तदा सः राजपुरोहितेनाभीष्टनिष्टनिधिप्रदानेन भृतिं गतोऽभीष्टेषु लोकाभ्युदयोद्योगेषु व्यापृतः सदातनं प्रसादमनुभवतु।

काशीराजो मन्त्रिसम्मतातिशयिनोपहारसम्भारेण हरिश्चन्द्राय स्वागतोपचारमुपचक्रमे।

(१४) प्रश्नः—सत्यहरिश्चन्द्रोदयस्य गद्यकाव्यस्य चतुर्दशस्य प्रकरणस्य हरिश्चन्द्रस्य काशीप्रपत्तिनामकस्य सारांशं लिखत।

उत्तरम्—विश्वामित्रः स्वनियोगविषये सततं सावधानो बभूव। अत एव सः योगदृष्ट्याऽवगच्छति स्म यत् साम्प्रतं काशिराजो वाराणसीसमागतस्य महतीं सेवां करिष्यति। तेन च मदीयः ब्रह्मणः आज्ञया क्रियमाणः सकलः प्रयासो विफलो भविष्यति। तत्र कर्मणि काशिराजस्य कश्चनापि दोषो नहि वर्त्तते। हरिश्चन्द्रस्य तेन क्रियमाणस्तथाविधः सम्मानोद्योगः उचित एव। अत एव मयैवात्र तथाविधं किञ्चित् कर्म करणीयं येन मम योजना विफला न स्यात्। मया मायया तस्य रूपपरिवर्तनं करणीयं येन काश्यामागतमपि समागतस्य तस्य

समादरं कर्तुं न प्रभवेत् काशीराजः। एतदर्थं काश्याः सविधे एव विश्वामित्रो मुनिः हरिश्चन्द्रपरिवारस्य समक्षं प्रकटीबभूव।

समक्षमागतं मुनि विलोक्य हरिश्चन्द्रः तस्य मुनेस्समर्चामकरोत्। पुनः स तस्यागमनप्रयोजनं पृष्ट्वाऽब्रवीत्—महर्षे! सप्ताहाभ्यन्तरे एव प्रतिश्रुतां दक्षिणां भवते दास्यामि। विश्वामित्रेणाभिहितं यत् तथाविधं पुन्नागदर्शनं मनोज्ञाकृति राजप्रभावयुक्तं त्वां भृत्यथां को नियोक्ष्यति? जनाः अकिञ्चनानेव भृत्यान् कुर्वन्ति न तु राज्ञः। अत एव तव राजरूपेण तु त्वां कश्चनापि तुभ्यं काकणिकमपि नहि दास्यति। अत्र कर्मणि तव राजानुभाव एव महान् बाधकः। तच्छ्रुत्वा हरिश्चन्द्रेण शीघ्रमभिहितं तदा ममायं राजानुभावो मत्तः शीघ्रं व्यपेतु मुने!। मुनिनाऽपि स्वयोगप्रभावेण हरिश्चन्द्रपरिवारस्य रूपं दासवत् सहसाऽकार्षीत्। पुनश्च शीघ्रमेव ततोऽन्यत्र जगाम। राजापि आत्मनः परिवर्तितमिदं रूपमवलोक्य बहुगुणं मेने। काशीमागतमपि हरिश्चन्द्रं कश्चनापि नहि परिचिनोति स्म। तत्रागत्य सः मणिकर्णिकाविश्वेश्वराभ्यां समन्वितां काशीमवलोक्य भक्तिपरतन्त्रस्सन्नवोचत्—

'सत्यसत्त्वशालिनीं सुधर्ममार्गदर्शनीम्।
भुक्तिमुक्तिदायिनीम् विरक्तिमुक्तिबोधिनीम्॥
पापसङ्घनाशिनीं परात्परां पुरातनीम्।
भूमिपुण्यमादरान्नमामि काशिकापुरीम्॥ इति।

(१५) प्रश्न—सत्यहरिश्चन्द्रोदयनामकस्य गद्यकाव्यस्य हरिश्चन्द्रस्य भृतिनियोगनामकस्य पञ्चदशप्रकरणस्य सारांशं लिखत।

उत्तरम्—महर्षेः विश्वामित्रेण कृतस्य रूपपरिवर्तनस्य हरिश्चन्द्रस्य वाराणस्यां प्रवेशे सञ्जातेऽपि तं नहि कोऽपि यद्यपि परिचिनोति स्म तथापि काशी नगरी तस्मै ब्रह्मज्ञानं प्रादात्। तच्च स्वजीवनस्य परमामुपलब्धि मन्यमानो हरिश्चन्द्रोऽतीव प्रसन्नो बभूव। वाराणस्यां हरिश्चन्द्रो मुनिवराणां शिवसङ्कल्पेन शिष्याचार्याणां प्रज्ञानोद्भिन्नवेदघोषेण, नैकधर्मावलम्बिनां पौराणां संवासेन; जनानां यथाशक्तिकृतेन पञ्चमहायज्ञाद्यनुष्ठानेन, प्रसादानां ध्वजपताकारूपेणालङ्करणेन च प्रसन्नः सन् चन्दनचर्चितभालः शिवभक्तिभरितान्तःकरणः काश्या वीथीषु सानन्दं बभ्राम। हरिश्चन्द्रसुखमक्षममाणः तमनु छायारूपेण सञ्चरन् प्रतिश्रुतपरिपूरणेऽनवधानं हरिश्चन्द्रं विलोक्योच्चैरुवाच विश्वामित्रो

तं शीघ्रं दक्षिणां ददातु। महर्षिवचो निशम्य सावधानमनो हरिश्चन्द्रः क्षमायाचनां कृत्वा शीघ्रमेव तस्मै धनं समर्पयितुं वचनं ददौ।

द्वितीयेऽहनि हरिश्चन्द्रः शृङ्गाटकं परितः पण्यप्राङ्गणं प्रविश्यात्मानमर्धलक्षस्वर्णमुद्राभ्यो डोम्बराजस्य हस्ते विक्रीय, शैब्यां चार्धलक्षाय कस्यचन वैश्यब्राह्मणस्य गृहदासीपदे नियोज्य शूर्पजीविराजस्य द्वादशवार्षिकीं भृत्यां श्मशाने स्वीचकार। रोहितोऽपि पितरमसकृत्प्रणम्य मुहुर्मुहुरवलोक्य च मात्रा सह जगाम।

(१६) प्रश्न—सत्यहरिश्चन्द्रोदयनामकस्य गद्यकाव्यस्य श्मशानमहिमानामकस्य षोडशप्रकरणस्य सारांशं लिखत।

उत्तरम्—राजा हरिश्चन्द्रो डोम्बराजेन द्वादशवार्षिक्यै भृत्यायै क्रीतः काश्या योगपीठस्य महाश्मशानस्य कर्मणि व्यापृतो बभूव। कर्तव्यपरायणो हरिश्चन्द्रोऽनुक्षणं स्वकर्मानुष्ठाने व्यापृतः सन् डोम्बराजस्यान्तरङ्गतां जगाम। अत्र मरणकाले भगवान् शङ्करो जीवानां दक्षिणकर्णे तारकब्रह्ममन्त्रमुपदिशति। भगवत्याः भागीरथ्या प्रातिवेशिकप्रतिष्ठानेन श्मशानस्य परमा पवित्रताऽतन्यते। भगवतो विश्वेश्वरस्य ज्योतिर्लिङ्गेष्वन्यतमस्य, विष्णुपद्याः भागीरथ्याः महाश्मशानस्य च महिमानो विमृश्यासकृद् भावमग्नो भवति राजऽत्र हरिश्चन्द्रः।

एकदा हरिश्चन्द्रः श्मशानप्रदेशस्य चारुतां वर्धयितुकामः सर्वेषां सहकर्मिणां सभां सम्बोधयामास—परमसौभाग्येन वयमत्र नियुक्ताः स्मः। 'राजद्वारे श्मशाने च यस्तिष्ठति स बान्धव'। इति न्यायेन वयमत्रागच्छतां सर्वेषां जनानां बान्धवाः सञ्जाताः स्मः। अत एवास्माभिः सर्वेषां समागतानां शिवसङ्कल्पेन सेवा करणीया। एतदर्थं स्वीकृतनियोगस्य सम्यक् पालनमस्माभिः सावधानतया कर्तव्यम्। महाश्मशानस्यास्य सर्वप्रदेशेषु पत्र-पुष्प-फलैः समन्विताः वृक्षाश्चारोपणीयाः येन विषादविषण्णा जना अत्रागताः सन्तः किमपि लभेरन् शवयात्रिकायां विश्रामाय रुचिराः पर्णशाला रचनीया अस्माभिः। ये चात्राकिञ्चनाः आयान्ति तेषामुपकारः सार्वजनिककोशादिन्धनादिप्रदानेन द्वारा करणीयः। नगरस्य कस्मिश्चिदपि भागे ये केचन अबान्धवाः म्रियन्ते तेषां बन्धुकृत्यमस्माभिः सम्पादनीयम्।

इत्थं प्रवचनं कुर्वतो हरिश्चन्द्रस्य वचांसि सर्वे तत्र नियुक्ताः सादरं सश्रद्धं च शृण्वन्ति स्म अभ्यनन्दति स्म च ते तम्। सर्वेषां सहयोगेन सपद्येव श्मशानः शिवसम्पत्तिस्वरूपो व्यराजत।

(१७) प्रश्नः—सत्यहरिश्चन्द्रोदयस्य गद्यकाव्यस्य सप्तदशप्रकरणस्य सारांशं लिखत ।

उत्तरम्—राज्ञो हरिश्चन्द्रस्य महाश्मशाने नियुक्तेः द्वादशवर्षाण्यतीतप्रायाणि जातानि । एकदा राजा हरिश्चन्द्रो विचारयामास इदानीं मम भृत्याकालः पूर्यते इव । मम पत्न्याः पुत्रस्य च किमभूत्, केन प्रकारेण कुत्र तौ स्तः इति नहि जानामि । अहं तु स्वकर्मणो विमुक्तो भविष्यामि किन्तु महाश्मशानमिमं विहाय क्वापि नहि यास्यामि । अत्रैव मे सन्त्यकारणबान्धवाः । भगवत्याः पतितपावन्याः भागीरथ्याः दर्शनं भगवतो विश्वेश्वरस्य च दर्शनमन्यत्र क्वापि नहि लप्स्येते । अत्रैवाऽहं भविष्यति कालेऽध्ययनं ध्यानं ज्ञानं च सम्पादयिष्यामि ।

एतस्मिन्नेव काले सः कस्याश्चनाङ्गनायाः करुणं परिदेवनमश्रौषीत् । तस्याः करुणं रोदनस्वरमेव श्रुत्वा सोऽज्ञासीत् यत् तस्याः सर्पदष्टः पुत्रो मृतो वर्तते । तामनाथां विवशां च ज्ञात्वा हरिश्चन्द्रस्तत्र कर्मकरानादिदेश यत् मृतस्य शवस्य दाहायेन्धनादिकं सर्वसाधारणकोशेनास्यै प्रदेयम् । किन्तु साऽबलाऽवोचत् यत् वयं सूर्यवंशीयाः क्षत्रियाः स्मः । कस्यचनाऽपि दानं नहि स्वीकुर्मः । तव मङ्गलसूत्रमणिभिः क्रीतया सामग्र्या शवदाहं करिष्यामीत्युक्त्वा मणिमेकं प्रादात् उद्ग्रथ्य मङ्गलसूत्रम् । इदानीं हरिश्चन्द्रः दृढतया निश्चितं चकार यदियं मम पत्नी शैब्या शवश्च मम पुत्रस्य रोहिताश्वस्य विद्यते ।

तदानीमेव कश्चन प्रवयाः चाण्डालवर्यः प्राह—सर्पदंशेन मृतस्य शवस्य दाहो नहि क्रियते, अपि तु गङ्गायाः प्रवाहमध्ये पात्यते तथाविधः शवः, सम्भवति यत् गङ्गाजलेन सिक्तः सर्वौषधिसंयोगेन सः शवोऽपहृतविषप्रभावः सन् जीवितो भवेत् । ज्ञात्वाऽपि स्वपुत्रस्य मृतिं राजा प्रकृतिस्थ एवावतस्थे । उक्तं चापि—

'विकारहेतौ सति विक्रियन्ते येषां न चेतांसि त एव धीराः' । इति ।

मम पुत्रशवस्य मध्येगङ्गं पातं कश्चित् क्षत्रिय एव करोतु इत्याग्रहं शैब्यायाः श्रुत्वा हरिश्चन्द्रः प्राहाहमस्मि सूर्यवंशीयः क्षत्रिय इति शनैः गद्गदाक्षरमुक्त्वा शवं तम् उत्थाप्य गङ्गायाः धारमध्ये विसृज्य निःसंज्ञो बभूव ।

तदैव वरुणकुले प्राप्तशिक्षो रोहिताश्वः सपदि उत्थाय गङ्गाजलेनाभ्युक्ष्य पितरं हरिश्चन्द्रं ससंज्ञमकार्षीत् । तटं चानीय तमाह—रोहिताश्वोऽहं वरुणकुले

लब्धविद्यः उभयविद्ययोः पारदृश्वा गुर्वाज्ञया गङ्गाजले निमज्जन्तं पितरं रक्षितु-मत्रागतोऽस्मि ।

जीवपुत्रा शैव्या निःसंज्ञं जीवितेशं हरिश्चन्द्रं विलोक्य निःसंज्ञा बभूव। तत्र ब्रह्मादिका देवा आगत्य पुष्पवर्षेणानुगृह्य तौ ससंज्ञौ चक्रुः । विश्वामित्रश्चागत्य स्वमायायोगं चकर्ष तेन सपरिवारो हरिश्चन्द्रो दासरूपं विहाय राजरूपो बभूव। डोम्बराजो धर्मराजो ब्राह्मणदम्पत्ती च शिवपार्वती बभूवतुः । पुनः सर्वे देवा महर्षयस्तु हरिश्चन्द्रं तथाविधाभिरनेकाभिराशीर्वचोभिः संयोज्य रोहिताश्वं सम्राट्पदेऽभिषिच्य अयोध्यायाः हरिश्चन्द्रदम्पती सशरीरं विमानमारोप्य स्वर्गं निन्युः ।

(१८) प्रश्नः—सत्यहरिश्चन्द्रोदयनामकं गद्यकाव्यमाश्रित्य हरिश्चन्द्रस्य कथां वर्णयन्तु ।

उत्तरम्—भारते वर्षे विश्वविख्यातो कोसलाख्यो जनपदः चतुर्वर्गफलोपायसम्पन्नायां भूम्यां मनुना मानवेन्द्रेण निवासित आसीद्, यस्य अयोध्यानाम्नी सरय्वास्तटे अधिवासिता नगरी राजधानी बभूव । अत्रैव भगवता भास्करेण प्रवर्तिते क्षत्रियाणां सूर्यवंशे इक्ष्वाक्वादिकाः महाप्रभावसम्पन्नाः राजानोऽभूवन् । अस्मिन्नेव वंशे त्रेतायुगे समागते त्रिशङ्कोः सत्यवत्यां समुत्पन्नो हरिश्चन्द्रनामको राजा बभूव, सकलकल्याणगुणगणैः समन्वितः ।

राजाऽयं सर्वैः गुणैः समन्वितोऽपि सन्ततिविहीनत्वात् मम पितरः भविष्यतिकाले केन प्रकारेण लब्धपिण्डोदकाः भविष्यन्तीति चिन्ताग्रस्तो बभूव जगाम च कुलगुरोः वसिष्ठस्याश्रमम् । हरिश्चन्द्रवचांसि श्रुत्वा महर्षिः वसिष्ठः प्राह यत्—कदाचित् सरयू मम पितुः सभायामुपस्थिता सती मामागत्य निवेदितवती यत् हरिश्चन्द्रस्य महाप्रभावशाली पुत्रो भवेदिति वरुणोऽपि वाञ्छति । अहमपि ध्यानयोगेन तव सर्वलोककल्याणगुणसमन्वितं सुतमवलोकयामि । अत एव गङ्गासागरसङ्गमस्थलं गत्वा भवान् भगवन्तं वरुणं तपश्चर्यया प्रसादयतु । स त्वां पुत्रप्राप्तेः वरदानप्रदानेनानुग्रहिष्यतीति ।

वसिष्ठमहर्षेर्वचो निशम्य राजा राज्यभारं मन्त्रिषु निवेश्य गत्वा गङ्गासागरसङ्गमे सुन्दरवने निवस्य वरुणमुपासयामास । प्रसन्नश्च बहुकालिकेन महता तपसा वरुणः तं पुत्रप्राप्तेर्वरदानेनानुजग्राह । कथयामास चापि समुत्पन्नस्ते पुत्रो वरुणकुले लब्धविद्यो भविष्यति । वरुणवचोभिः प्रसन्नो राजाऽयोध्यामाजगाम । अन्तर्वत्नी शैव्या यथाकालं रोहिताश्वं पुत्रं जनयामास । काले-

काले समागत्य महर्षिर्वसिष्ठो रोहिताश्वस्य संस्कारानखिलान् सम्पादयामास । उपनयनकाले समागते वरुणस्यादेशेन अयोध्यायां वार्तेयं प्रचारिताऽभूत् यत् 'अद्भ्यस्त्वा परिददामि' इत्याचार्यवाक्यानन्तरं वटुः जले निमज्जत्युन्मज्जति च। उपनयनकाले यदा रोहितः सरय्वां प्रविवेश तदा पूर्वयोजनानुसारेण वरुणदूतास्तं निगृह्य वरुणालयं प्रापयामासुः मायामयश्च रोहित उन्मज्जितो बभूव । पुनस्तत्रागताः महर्षयो हरिश्चन्द्रमनेकाभिराशीर्वचोभिरनुगृह्य धर्मविजययात्रां कर्तुमादिशन् । महर्षिः वसिष्ठो धर्मविजयस्य स्वरूपं निरूपयामास । पुनः हरिश्चन्द्रो विद्वद्भिः, शिल्पिभिः लोकोपकारकैः साधुभिश्च सार्धं यात्रां प्रारब्धवान् । दिनद्वयानन्तरं हरिश्चन्द्रः सर्वप्रथमं नैमिषारण्यक्षेत्रमाजगाम । तत्र तेषां तेषां महात्मनां तीर्थानां गोमत्याश्च मनोज्ञं दर्शनं मासमेकमुषित्वा ततः कुरुक्षेत्रं जगाम यत्र राजा मान्धाता तपश्चकार यज्ञांश्चानेकानकार्षीत् ।

लोकरक्षणपरायणैः ब्रह्मविष्णुशिवैः लोककल्याणसमीक्षणाय नियुक्तो देवर्षिर्नारदः लोकवार्तां सङ्गृह्य स्वपितरं ब्रह्माणं सम्मिल्याह यत्—यद्यपि सत्ययुगे सर्वा प्रजाः सदायतनाः सत्यप्रतिष्ठाश्चासन् किन्तु साम्प्रतं तेषु सत्यायाः प्रवृत्तेरभावेवाभाति । राजानोऽपि कामक्रोधपरायणा इव दृश्यन्ते । अत एव भवता तथाविधः कश्चन लोकसङ्ग्रहोपयोगी सदाचारादर्शः लोकानां समक्षं स्थापनीय अस्मिन् त्रेतायुगे इति ।

देवर्षेः कथनानन्तरं देवानां महर्षीणां समितिरुपविष्टा ब्रह्मण आध्यक्ष्ये सर्वैश्च निर्णीतं यत् महर्षिः विश्वामित्र एव हरिश्चन्द्रस्य प्राणपणं सत्यपरीक्षणं करोत्विति । तदनन्तरं विश्वामित्रमादिष्टवान् लोकपितामहस्तथा हरिश्चन्द्रं परीक्षितुम् । विश्वविजययात्राया अनन्तरं राजा हरिश्चन्द्रो राजसूयं यागमकार्षीत् यत्राऽनेके राजानो, विद्वांसः कलानिपुणाश्च समवेता अभूवन् । राजा यागे तस्मिन् सर्वस्वं दानमकार्षीत् । यदाऽवभृथस्नानान्ते महाराजपदेऽभिषेकः प्रारब्धोऽभूत् तदा दक्षिणार्थी महर्षिः विश्वामित्रः तत्रागमत् । तस्मै लक्षं स्वर्णमुद्राः दातुमादिशत् कोषाध्यक्षं राजा । किन्तु सम्पूर्णस्य राजकोशस्य रिक्तत्वात् मन्त्रिभिः बहुधा विमर्शं कृत्वाऽपि साधनान्तरमलभमानो राजा सपरिवारः पदातिरेव वाराणस्यै प्रतस्थे । हरिश्चन्द्रमागच्छन्तं बुद्ध्वा काशिराजः तस्य विपुलं सम्मानं कर्तुमुद्यतोऽभूत् । काशीराजस्य तथाविधमुद्योगं विज्ञाय ध्यानयोगेन विश्वामित्रः उपकाशि हरिश्चन्द्रपरिवारसमक्षं प्रकटीभूय मायया

हरिश्चन्द्रस्य दासवद्रूपं चकार सपरिवारस्य। अत एवागतमपि हरिश्चन्द्रं कश्चनापि नहि परिचिनोति स्म।

वाराणस्यां हरिश्चन्द्रः अर्धलक्षेण कस्यचन डोमराजस्य द्वादशवार्षिकीं श्मशाने भृतिं स्वीकृत्यार्द्धेन च लक्षेण शैव्या कस्यचन ब्राह्मणस्य गृहदासीं कृत्वा दत्त्वा च विश्वामित्राय प्रतिश्रुतां दक्षिणां कर्त्तव्यनिष्ठत्वात् स्वस्वामिनोऽन्तरङ्गो बभूव।

यदा हरिश्चन्द्रस्य भृतिकालः समाप्त इव समभवत् तदा विश्वेश्वरस्य, भागीरथ्याः महाश्मशानस्य च महिमा स्मारं स्मारं वाराणस्यामेवाजीवनं निवसितुं मनश्चकारैकदा हरिश्चन्द्रः तदैव सः कस्याश्चनाबलायाः करुणक्रन्दनमश्रौषीत्—यस्याः पुत्रो द्वादशवार्षिकः सर्पदंशेन मृतिं गत आसीत्। यदा हरिश्चन्द्रः सार्वजनिककोशेन शवदाहसामग्रीं दातुं कर्मकरानाह तदा तयाभिहितं यत् सूर्यवंशीयाः क्षत्रियाः वयमत एव कस्यचनापि दानं नहि स्वीकुर्मः। सा स्वमङ्गलसूत्रादेकं मणिमुद्ग्रथ्य सामग्र्यै प्रादात्। तदैव कश्चन प्रवयाश्चाण्डालवर्यः प्राह—सर्पदंशेन मृतस्य शवो गङ्गाया धारमध्ये निपात्यते। सम्भवति यत् गङ्गाजलेन संसिक्तः सर्वौषधिसंयोगेन अपहृतविषप्रभावो जीवितो भवेत्। तदा शैव्ययाऽभिहितं यत् कश्चन सूर्यवंशीयः क्षत्रिय एव ममात्मजस्य शवं गङ्गामध्ये पातयितुमर्हति।

शैव्याया वचनं श्रुत्वा हरिश्चन्द्रेणाभिहितमहमस्मि सूर्यवंशीयः क्षत्रियः। इत्युक्त्वा रोहितशवमुत्थाप्य गङ्गाया धारायां विसृज्य निःसंज्ञो बभूव। तस्मिन्नेवावसरे वरुणकुकेऽधीतविद्यः रोहिताश्वो आगत्य निर्गत्य च धारातो निःसंज्ञं पितरं गङ्गातटे आनीयाह, सम्पूर्णं निजवृत्तान्तं न्यवेदयत् स्वमातुः सविधे। जीवपुत्रा शैव्या निःसंज्ञं जीवितेशं विलोक्य निःसंज्ञा बभूव। तदैवागत्य ब्रह्मादिका देवा आकाशपुष्पवृष्ट्या अमृताभिषेकेन च तौ ससंज्ञौ कृतवन्तः। तदैव विश्वामित्रेणापकृष्टायां मायायां सपरिवारस्य हरिश्चन्द्रस्य राजरूपमभूत्। डोम्बराजो धर्मराजरूपेण ब्राह्मणदम्पती च शिवपार्वत्यो रूपेण प्रकटिताः सञ्जाता। देवानामनुग्रहात् सपत्नीकः सशरीरश्च हरिश्चन्द्रः समागतेन दिव्येन विमानेन स्वर्गलोकं जगाम। रोहिताश्वश्चाभिषिक्तो बभूव अयोध्यायाः सम्राट्पदे।

(१९) प्रश्न—सत्यहरिश्चन्द्रोदयं गद्यकाव्यमाश्रित्य हरिश्चन्द्रस्य चरित्रं चित्रयत।

उत्तरम्—हरिश्चन्द्रः सत्यहरिश्चन्द्रोदयनामकस्य गद्यकाव्यस्य नायको वर्त्तते। प्रथमप्रकरणादारभ्य अन्तिमप्रकरणं यावत् तस्यैव वर्णनाव्यापृतत्वादस्य गद्यकाव्यस्य। अस्य मातुर्नाम सत्यवती पितुश्च नाम त्रिशङ्कुरासीत्। सः सूर्यवंशे त्रेतायुगे जनिं लेभे।

सकलसद्गुणाधिष्ठानो हरिश्चन्द्रः—हरिश्चन्द्रस्य गुणानां वर्णनं कुर्वता लेखकेनाभिहितम्—'प्रजापतिरिव प्रजानन्दनः, सर्वविद्यावदातः, ब्रह्मकोशस्य गोप्ता, उदारधीः, यशस्वितमः, मनीषी, सत्यवतीपुत्रः चन्द्रनिभः हरिश्चन्द्रो नाम राजर्षिः प्राभवत्।

तपस्वी हरिश्चन्द्रः—हरिश्चन्द्रो यदा शृणोति यत् तपश्चर्यया सो लप्स्यते पुत्ररत्नं तदा सः स्वकुलाचार्यस्य वसिष्ठस्यादेशेन गङ्गासागरं गत्वा, सुन्दरवने उषित्वा बहुकालं कठिनं तपः करोति। तेन च प्रसन्नो वरुणः तस्मै पुत्रप्राप्तेर्वरदानमदात्।

महर्षीणामाज्ञाकारी हरिश्चन्द्रः—हरिश्चन्द्रस्य पुत्रस्योपनयनकाले अनेकेभ्यो दिङ्मण्डलेभ्यो नैके महर्षयः समागच्छन्। ते ताभिस्ताभिराशीर्वचोभिः संयोज्य हरिश्चन्द्रं तमादिशन् धर्मेण विश्वविजयं कर्तुम्। महर्षीणामादेशमनुतिष्ठन् राजा हरिश्चन्द्रो धर्मविजययात्रामकार्षीत् विद्वद्भिः, महर्षिभिः, कलाविद्भिः साधुभिश्च समन्वितः। सः महर्षीणामाज्ञापालने क्वाप्यनवधानो नहि दृश्यते। महर्षेः वसिष्ठस्य महर्षेर्विश्वामित्रस्य च आज्ञाः समादरपूर्वकं पालयति सः।

सत्यवादी हरिश्चन्द्रः—हरिश्चन्द्रस्य सत्यवादित्वं विश्वविश्रुतमास्ते। प्राणसङ्कटापन्नोऽपि सः मृषा वक्तुं नह्युद्यतो भवति। प्रतिश्रुतायाः प्रतिज्ञायाः संरक्षणायैव स राज्यं परित्यज्य काशीं गत्वा आत्मानं पत्नीं शैव्यां च विक्रीय प्रतिश्रुतां दक्षिणां विश्वामित्राय ददाति।

वैषम्यसखो हरिश्चन्द्रः—हरिश्चन्द्रस्य जीवनस्य वैषम्याण्येव प्रख्यातानि सन्ति। वैषम्याण्येवाश्रित्य तस्य प्रख्यातिर्भवति लोके। महाराजपदाभिषिक्तोऽपि समये समागते सः काननेषु पदातिः प्रयाति काशीं यावत्। मृतं पुत्रं व्याकुलां विह्वलाञ्चापि पत्नीमवलोक्य सः धैर्यं नहि विसृजति।

देवगुरुप्रसादभाक् हरिश्चन्द्रः—द्वादशवार्षिकया भृत्यया स्वप्रतिज्ञापालनस्य; कर्तव्यपरायणतायाः कर्मानुष्ठानवैचक्षण्यस्य च परीक्षणं दत्वा राजा हरिश्चन्द्रो देवानां ब्रह्माविष्णुशिवादिकानां देवानां विश्वामित्रादीनां महर्षीणां दयापात्रतां प्राप्नोति।

(२०) प्रश्नः–सत्यहरिश्चन्द्रोदयस्य गद्यकाव्यस्य लेखकस्य परिचयं लिखत ।

उत्तरम्—सत्यहरिश्चन्द्रोदयनामकस्य गद्यकाव्यस्य लेखकः श्रीरामजी उपाध्यायः उत्तरप्रदेशान्तर्गते बलियामण्डलस्थे मलेजीनामके ग्रामे जनिमलभत । अस्य प्रथमसंस्कृतविद्यागुरुः श्रीलक्ष्मणशास्त्रीतैलङ्गमहामहोपाध्याय आसीत् । तदनु सः प्रयागविश्वविद्यालये श्रीबाबूरामसक्सेनामहोदयस्य सविधेऽधीत्य एम० ए० परीक्षामुत्तीर्य डी० फिल् उपाधिश्चाप्तवान् । अस्य लेखकस्यानेके ग्रन्था उत्तरप्रदेशसंस्कृताकादमीतः पुरस्कृताः सन्ति । १९८७ खीष्टाब्दे सः अकादम्याः विशिष्टं पुरस्कारमाप्तवान् ।

उपाध्यायमहोदयः १९४७ ईस्वीयतः १९८० ईस्वीयं यावत् मध्यप्रदेशस्य सागरविश्वविद्यालये संस्कृतविभागस्य प्राचार्यपदमलङ्चकार । एतस्मिन्नेवान्तराले १९६३ ईस्वीये सागरविश्वविद्यालयतः डी० लिट् उपाधिमर्जितवान् । १९९१ ईस्वीये सः हिन्दूविश्वविद्यालयतः डी० लिट् उपाधिं मानदोपाधिमाप्तवान् ।

अयमुपाध्यायमहोदयो नैकेषां ग्रन्थानां प्रणयनमकरोत्, ते च ग्रन्था निम्नाङ्किताः सन्ति—

१. संस्कृतप्राकृतकाव्यानि—आङ्ग्ल्यां डी० फील्शोधप्रबन्धरूपेण ।
२. प्राचीनभारतीयसाहित्यस्य सांस्कृतिकी भूमिका—हिन्द्याम् ।
३. मध्यकालीनसंस्कृतनाटकानि—हिन्द्याम् ।
४. आधुनिकानि संस्कृतनाटकानि—हिन्द्याम् ।
५. भारतस्य प्राचीना संस्कृतिः—हिन्द्याम् ।
६. महाकविः कालिदासः—संस्कृते ।
७. भारतस्य सांस्कृतिक निधिः—संस्कृते ।
८, द्वासुपर्णा—संस्कृते ।
९. संस्कृतसाहित्यस्यालोचनात्मक इतिहासः (भागद्वयेन)—हिन्द्याम् ।
१०. भारतस्य संस्कृति साधना—हिन्द्याम् ।
११. भारतस्य सामाजिकी संस्कृतिः—हिन्द्याम् ।
१२. भारतीयसंस्कृतिसौरभम्—संस्कृते ।
१३. विंशशताब्दिकं संस्कृतनाटकम्—संस्कृते ।
१४. दशरूपकतत्त्वदर्शनम्—संस्कृते ।

१५. नान्दीटीकासहितं दशरूपकम्—संस्कृते ।
१६. मध्यकालिकः संस्कृतनाटकालोकः ।
१७. पूर्वपथः (हिन्दीनाटकम्) ।
१८. संस्कृतनिवन्धावली ।
१९. नाट्यशास्त्रीयानुसन्धानम् ।
२०. नाट्यशास्त्रीयपारिभाषिकशब्दानुक्रमणिका ।
२१. नाट्यशास्त्रीयप्रयोगविज्ञानम् ।
२२. महाभारतीयसंस्कृतिकोशः ।
२३. संस्कृतस्य महाकवयः काव्यानि च ।

अयं महाविद्वान् नैकेषां ग्रन्थानां सम्पादकः, सागरिकायाः त्रैमासिक्याश्च बहुकालं यावत् सम्पादनमकार्षीत् । साम्प्रतं निवसति भगवति विश्वम्भारे नैसर्गिक्या श्रद्धया सम्पन्नः अधिकाशि ।

अलङ्कारभागः

अलङ्कारलक्षणम्—

'शब्दार्थयोरस्थिरा ये धर्माः शोभातिशायिनः ।
रसादीनुपकुर्वन्तोऽलङ्कारास्तेऽङ्गदादिवत्' ॥

अयमाशयो यत् येन प्रकारेण कटककुण्डलहारादिकाः अलङ्कारास्तानि तानि अङ्गानि शोभयन्तः सन्तः अलङ्कारधारिणं पुरुषमपि शोभातिशयसम्पन्नं कुर्वन्ति, तेनैव प्रकारेण काव्यस्य देहभूतयोः शब्दार्थयो, अलङ्कारस्वरूपाः यमकानुप्रासोपमादिका अलङ्काराः शब्दार्थयोः शोभावर्धनद्वारेणैव काव्यात्म-भूतस्य रसादिकस्यापि उपकारं कुर्वन्ति । येन प्रकारेण हारादिका पुरुषस्य अस्थिराः धर्मा भवन्ति, तेनैव प्रकारेण इमे अलङ्कारा अपि काव्यस्यास्थिराः धर्मा भवन्ति । अत एवाहुः मम्मटाचार्या अपि—

'उपकुर्वन्ति तं सन्तं येऽङ्गद्वारेण जातुचित् ।
हारादिवदलङ्कारास्तेऽनुप्रासोपमादयः' ॥

शब्दश्लेषालङ्कारलक्षणम्—

'श्लिष्टैः पदैरनेकार्थाभिधाने श्लेष इष्यते' ॥

अयमाशयो यत्र यत्र अनेकैरर्थैः सम्पृक्तैर्वाच्यतासम्बन्धेन संश्लिष्टै-रेकोच्चारणेनैव युगपदनेकार्थबोधकैरिति यावत्पदैः सुप्तिङन्तरूपैः अनेकेषा-मर्थानां यत्राभिधानं भवति तत्र भवति श्लेषाख्यः शब्दालङ्कारः ।

सोऽयं शब्दश्लेषः अष्टप्रकारवान् भवति—वर्णश्लेष-प्रत्ययश्लेष-लिङ्ग-श्लेष-प्रकृतिश्लेष-पदश्लेष-विभक्तिश्लेष-वचनश्लेष-भाषाश्लेषाणां भेदात् । दिङ्मात्रमत्रोदाह्रियते—

उदाहरणम्—

'प्रतिकूलतामुपगते हि विधौ विफलत्वमेति बहुसाधनता ।
अवलम्बनाय दिनभर्तुरभूत् न पतिष्यतः करसहस्रमपि' ॥

अत्र 'विधौ'-पदे श्लेषः, विधिविधूरुभयोः शब्दयोः सप्तम्याम् एकवचने 'विधौ' इति रूपस्य सम्पन्नत्वात् ।

अर्थश्लेषस्य लक्षणम्—'शब्दैः स्वभावादेकार्थैः श्लेषोऽनेकार्थवाचनम् ।'
यत्रैकार्थकैरेव शब्दैः स्वभावादनेकेषामर्थानां प्रतिपादनं शब्दस्याभिधया शक्त्या भवति तत्र भवति अर्थश्लेषाख्यः अलङ्कारः ।

उदाहरणम्—

'प्रवर्तयन् क्रियाः साध्वीः मालिन्यं हरितां हरन् ।
महसा भूयसा दीप्तो विराजति विभाकरः' ॥

अत्राभिधयैव शक्त्या विभाकराख्यस्य राज्ञःसूर्ययोः प्रतिपादनं भवति अतएव अर्थश्लेषः ।

अनुप्रासालङ्कारलक्षणम्—

'अनुप्रासः शब्दसाम्यं वैषम्येपि स्वरस्य यत्' ।

अयमाशयो यत् अच्वर्णानां वैषम्येऽपि यत्र व्यञ्जनवर्णानामपि साम्यं भवति तत्र भवत्यनुप्रासाख्योऽलङ्कारः । साम्यञ्चात्र समानश्रुतिमत्वम् । अनुप्रासे वैचित्र्याभावात् स्वरमात्रस्य साम्यं नहि गणितम् । रसाद्यनुगतत्वेन प्रकर्षेण न्यासोऽनुप्रासः इति अनुप्रासशब्दस्यार्थमाह साहित्यदर्पणकारः ।

उदाहरणम्—

'निराकरिष्णू वर्तिष्णू वर्द्धिष्णू परितो रणम् ।
उत्पतिष्णू सहिष्णू च चेरतुः खरदूषणौ' ॥ इति ॥

अयमनुप्रासः—छेकानुप्रास–वृत्त्यनुप्रास–श्रुत्यनुप्रास–अन्त्यानुप्रास–लाटानुप्रासानां भेदात् पञ्चधा भवति, इत्याह साहित्यदर्पणकारः ।

यमकालङ्कारलक्षणम्—

'सत्यर्थे पृथगर्थायाः स्वरव्यञ्जनसंहतेः ।
क्रमेण तेनैवावृत्तिर्यमकं विनिगद्यते' ॥ इति ॥

अयमाशयो यत् समानक्रमवतः स्वरव्यञ्जनसमुदायस्य आवृत्तिः यमकमित्यभिधीयते । परञ्च यदि तस्य शब्दस्यार्थः स्यात् तदा तु तयोः शब्दयोरर्थः भिन्नो भिन्नो भवेत् अन्यथा तु आवृत्तयोः शब्दयोरेक एव क्वचन सार्थकः, क्वचन चोभावेव निरर्थकौ । चन्द्रालोककारस्तु यमकं कवेः प्रशंसायाः मूलं वक्ति । तथाहि—

'आवृत्तवर्णस्तवकं स्तवकन्दाङ्कुरं कवेः ।
यमकं प्रथमाधुर्यं माधुर्यवचसो विदुरिति' ॥

उदाहरणम्—

'नवपलाशपलाशवनं पुरः स्फुटपरागपरागतपङ्कजम् ।
मृदुलतान्तलतान्तमलोकयत् स सुरभिं सुरभिं सुमनोभरैः ॥' इति ॥

अस्मिन्नुदाहरणे 'पराग'-'पराग'-शब्दयोः 'पलाश'-'पलाश'-शब्दयोः 'सुरभिं-सुरभिं'-शब्दयोश्च यमकमास्ते ।

उपमालङ्कारलक्षणम्—उपमालङ्कारं निरूपयताऽऽचार्येण साहित्यदर्पण-कारेणाभिहितम्—

'साम्यं वाच्यमवैधर्म्यं वाक्यैक्ये उपमा द्वयोः ।
सा पूर्णा यदि सामान्यधर्म औपम्यवाचि च ।
उपमेयं चोपमानं भवेद् वाच्यमियं पुनः ॥'

अयमाशयो यत् यत्र वैधर्म्यं विहाय साम्यमात्रं वाच्यं भवति उपमानो-पमेययोः तत्र भवति उपमानामकोऽलङ्कारः । यत्र वाक्ये सामान्यो धर्मः, उपमावाचकः शब्दः उपमेयम् उपमानञ्च उक्तं भवति तत्र पूर्णोपमानामको-ऽलङ्कारः । यत्रैतेषु कस्यचनैकस्य द्वयोर्वा त्रयाणां वा भवति लोपः तत्र लुप्तोपमा भवति । अस्या उपमायाः शाब्द्यार्थयोर्भेदेन द्वौ भेदौ भवतः साहित्य-दर्पणकारानुसारेण ।

उदाहरणम्—

'सौरभमम्भोरुहवन्मुखस्य कुम्भाविव स्तनौ पीनौ ।
हृदयं मदयति वदनं तव शरदिन्दुर्यथा बाले ॥' इति ॥

अनन्वयालङ्कारलक्षणम्—अनन्वयालङ्कारं निरूपयताऽऽचार्येण विश्वनाथेना-भिहितम्—

'उपमानोपमेयत्वे त्वेकस्यैव त्वनन्वयः ।' इति ।

अयमाशयो यत् यत्र वाक्ये एकस्यैव वस्तुनः उपमानत्वम् उपमेयत्वञ्च भवति प्रकाशितं तत्र भवत्यनन्वयालङ्कारः । तद्व्यतिरिक्तस्य वस्तुनस्तत्रान्वया-भावात् तस्यानन्वयत्वम् अनन्वयालङ्कारे इवशब्दस्य साम्यवाचकस्य भवति प्रयोगः ।

उदाहरणं यथा—

'राजीवमिव राजीवं जलं जलमिवाजनि ।
चन्द्रश्चन्द्र इवातन्द्रः शरत्समुदयोद्यमे ॥'

रूपकालङ्कारलक्षणम्—

'यत्रोपमानचित्रेण सर्वथाऽप्युपरज्यते ।
उपमेयमयी भित्तिः तत्र रूपकमिष्यते ॥'

अयमभिप्रायो यत् यत्रोपमानरूपेण चित्रेण उपमेयरूपं फलकं सर्वथा उपरज्यते तादात्म्यप्रतिपादनेनाभिन्नीक्रियते तत्र भवति रूपकालङ्कारः, इत्याह चन्द्रालोककारो जयदेवः । साहित्यदर्पणकाराः रूपकस्य भेदत्रयं स्वीकुर्वन्ति । साङ्गरूपकम्, निरङ्गरूपकम् परम्परितरूपकञ्च ।

उदाहरणं यथा—

'आहवे जगदुद्दण्ड राजमण्डलराहवे ।
श्रीनृसिंह महीपाल ! स्वस्त्यस्तु तव बाहवे ॥'

अत्र राजमण्डलं नृपसमूह एव चन्द्रबिम्बस्यारोपो राजबाहौ राहुत्वारोपे निमित्तम् ।

उत्प्रेक्षालङ्कारलक्षणम्—उत्प्रेक्षालङ्कारं निरूपयताऽऽचार्येण विश्वनाथेन साहित्यदर्पणे अभिहितम्—

'भवेत् सम्भावनोत्प्रेक्षा प्रकृतस्य परात्मना ।'

अयमाशयो यत् यत्र वर्णनीयस्य उपमेयस्य असम्भवनीयार्थरूपेण सम्भावनैवोत्प्रेक्षेत्यभिधीयते । ऊर्ध्वं गता प्रेक्षा दृष्टिश्च यस्यां सोत्प्रेक्षा । उत्प्रेक्षायाः भेदादिकं निरूपयता आचार्येण विश्वनाथेनाभिहितम्—

'वाच्या प्रतीयमाना सा प्रथमं द्विविधा मता ।
वाच्येवादिप्रयोगे स्यादप्रयोगे परा पुनः ।
जातिर्गुणः क्रियाद्रव्यं यदुत्प्रेक्ष्यं द्वयोरपि ॥' इति ॥

अयमभिप्रायो यत् तस्याः उत्प्रेक्षाया द्वौ भेदौ भवतः—वाच्योत्प्रेक्षा प्रतीयमानोत्प्रेक्षा च । यत्र इवादिकानां शब्दानां प्रयोगो भवति तत्र वाच्योत्प्रेक्षा भवति । यत्र एतेषां प्रयोगो नहि भवति तत्र प्रतीयमानोत्प्रेक्षा भवति । एतस्याः द्विप्रकारवत्या उत्प्रेक्षायाश्चत्वारो भेदा भवन्ति जातिर्गुणक्रियाद्रव्याणां भेदात् । तदेवमष्टप्रकारवती भवत्युत्प्रेक्षा ।

उदाहरणं यथा—'तन्वङ्ग्याः स्तनयुग्मेन मुखं न प्रकटीकृतम् ।
हाराय गुणिने स्थानं न दत्तमिति लज्जया ॥' इति ॥

काव्यलिङ्गालङ्कारलक्षणम्—

'हेतोर्वाक्यपदार्थत्वे काव्यलिङ्गं निगद्यते ।'

इति काव्यलिङ्गालङ्कारं लक्षयत आचार्यस्य विश्वनाथस्याभिप्रायो वर्तते यत्—वाक्यार्थरूपस्यैकपदार्थरूपस्यानेकपदार्थरूपस्य च हेतोरभिधानं काव्यलिङ्गमित्यभिधीयते। एवञ्च अर्थविशेषे प्रतिवाक्यार्थः पदार्थो वा यदि हेतुर्भवेत्तदाऽयमलङ्कारः इति निष्कर्षः।

उदाहरणं यथा—'यत् त्वन्नेत्रसमानकान्तिसलिले मग्नं तदीन्दीवरं
मेघैरन्तरितः प्रिये तव मुखच्छायानुकारी शशी।
येऽपि त्वद्गमनानुकारिगतयस्ते राजहंसा गताः
त्वत्सादृश्यविनोदमात्रमपि मे दैवेन न क्षम्यते॥'

अतिशयोक्त्यलङ्कारलक्षणम्—अतिशयोक्तिं लक्षयता साहित्यदर्पणकारेणाभिहितम्—

'सिद्धत्वेऽध्यवसायस्यातिशयोक्तिर्निगद्यते।
भेदेऽप्यभेदः सम्बन्धेऽसम्बन्धस्तद्विपर्ययौ॥
पौर्वापर्यात्ययः कार्यहेत्वोः सा पञ्चधा ततः॥'

अयमभिप्रायो यत् विषयनिगरणेनाभेदप्रतिपत्तिर्विषयिणोऽध्यवसायः। इत्थम् अध्यवसायस्य सत्ये वस्तुनि असत्यात्मना निरुक्तसम्भावनाया एव सिद्धत्वे निश्चयरूपत्वेन सम्पत्तौ कविरचनाचातुर्येण संशयांशे अन्तर्भूते इव निश्चयमात्ररूपत्वेन परिणत्वे सति अतिशयोक्तिनामकोऽलङ्कारो भवति। सा चातिशयोक्तिः पञ्चप्रकारवती भवति—भेदे अभेदरूपा, सम्बन्धे असम्बन्धरूपा, अभेदे भेदरूपा, असम्बन्धे सम्बन्धरूपा, कार्यकारणयोः पौर्वापर्यविपर्ययरूपा च।

उदाहरणं यथा—

'कथमुपरि कलापिनः कलापो विलसति तस्य तलेऽष्टमीन्दुखण्डम्।
कुवलययुगलं ततो विलोलं तिलकुसुमं तदधः प्रवालमस्मात्॥'

दृष्टान्तालङ्कारलक्षणम्—'दृष्टान्तस्तु सधर्मस्य वस्तुनः प्रतिबिम्बनम्।'

इति लक्षणवाक्येन दृष्टान्तालङ्कारं लक्षयताऽऽचार्येण विश्वनाथेन प्रतिपादितं यत् यत्र काव्ये उपमेयेन साकं समानधर्मवतः उपमानस्य बिम्बप्रतिबिम्बभावस्य प्रदर्शनं क्रियते तत्र भवति दृष्टान्ताख्योऽलङ्कारः। दृष्टान्तालङ्कारे धर्मैः सह तुलनां कृत्वा धर्मिणं सन्तुलयति कविरितीममर्थं द्योतयति लक्षणगतं तु पदम्।

उदाहरणं यथा—

'अविदितगुणाऽपि सत्कविभणितिः कर्णेषु वमति मधुधाराम्'।
अनधिगतपरिमलाऽपि हि हरति दृशं मालतीमाला ।।' इति ॥

अर्थान्तरन्यासालङ्कारलक्षणम् —

'सामान्यं वा विशेषेण विशेषस्तेन वा यदि ।
कार्यं वा कारणेनेदं कार्येण च समर्थ्यते ।
साधर्म्येणेतरेणार्थान्तरन्यासोऽष्टधा ततः ।।

अयमभिप्रायो यत् अर्थान्तरन्यासालङ्कारः अष्टप्रकारको भवति । स च यत्र साधर्म्येण द्वारा अथवा वैधर्म्येण द्वारा सामान्येन द्वारा विशेषस्य अथवा विशेषेण द्वारा सामान्यस्य, अथवा कार्येण द्वारा कारणस्य अथवा कारणेन द्वारा कार्यस्य समर्थनं क्रियते तत्र भवति अर्थान्तरन्यासनामकोऽलङ्कारः ।

उदाहरणं यथा—

'बृहत् सहायः कार्यान्तं क्षोदीयानपि गच्छति ।
सम्भूयाम्भोधिमभ्येति महानद्या नगापगा ।।' इति ।।

विरोधाभासालङ्कारलक्षणम्—साहित्यदर्पणकारः आचार्यो विश्वनाथः विरोधाभासं दशप्रकारकं निरूपयन् प्राह—

'जातिश्चतुर्भिर्जात्याद्यैः गुणो गुणादिभिस्त्रिभिः ।
क्रिया क्रियाद्रव्याभ्यां यत् द्रव्यं द्रव्येण वा मिथः ।
विरुद्धमिव भासेत विरोधोऽसौ दशाकृतिः ।।'

अयमाशयो यत् जातिः, गुणः, क्रिया द्रव्यञ्चेति चतस्र उपाधयः । तत्र यदि जातिः गुणक्रियाद्रव्यैः सह अथवा गुणः गुणेन क्रियया, द्रव्येण वा सह अथवा क्रिया क्रियया द्रव्येण वा सह, अथवा द्रव्यं द्रव्येण सह विरुद्धमिव प्रतीयेत तदा भवति विरोधाभासनामकोऽलङ्कारः ।

उदाहरणं यथा—'वल्लभोत्सङ्गसङ्गेन विना हरिणचक्षुषः ।
राकाविभावरीजानिर्मध्याह्नसविताऽभवत् ।।' इति ।।

विभावनालङ्कारलक्षणम्-विभावनालङ्कारं लक्षयताऽऽचार्येण विश्वनाथेनाभिहितं यत्—

'विभावना विना हेतुं कार्योत्पत्तिर्यदुच्यते ।
उक्तानुक्तनिमित्तत्वाद् द्विधा सा परिकीर्तिता ।।' इति ।।

अयामाशयो यत् यत्र काव्ये हेतुम्=कारणम्, विनाऽपि कार्यस्योत्पत्तिर्वर्ण्यते तत्र भवति विभावना नामकोऽलङ्कारः। इयं विभावना द्विप्रकारवती भवति— उक्तनिमित्ता—यत्र हेत्वन्तरम् उक्तम्=अभिहितम्, भवति कार्यस्य। अनुक्त-निमित्ता—यत्र हेत्वन्तरं वाक्ये अभिहितं न भवति।

उदाहरणं यथा—'अनायासदृश मध्यमशङ्कतरले दृशौ।
अभूषणमनोहारि वपुर्वयसि सुभ्रुवः ॥'

विशेषोक्तिलक्षणम्—'सति हेतौ फलाभावे विशेषोक्तिः।'

अयमाशयो यत्—यत्र काव्ये सत्यपि कारणे कार्यं नोत्पद्यते तत्र भवति विशेषोक्तिनामकोऽलङ्कारः।

उदाहरणं यथा—'धनिनोऽपि निरुन्मादा युवानोऽपि न चञ्चलाः।
प्रभवोऽप्यप्रमत्तास्ते महामहिमशालिनः॥' इति॥

असङ्गत्यलङ्कारलक्षणम्—'कार्यकारणयोर्भिन्नदेशतायामसङ्गतिः।'

अयमाशयो यत् कार्यकारणयोर्व्यधिकरणतायामसङ्गतिः अलङ्कारो भवति। इत्थं विरोधविशेषयुक्तमेवासङ्गत्यलङ्कारो भवति।

उदाहरणं यथा—'सा बाला वयमप्रगल्भमनसः, सा स्त्री वयं कातराः
सा पीनोन्नतिमत्पयोधरयुगं धत्ते सखेदा वयम्।
साऽऽक्रान्ताजघनस्थलेन गुरुणा गन्तुं न शक्ता वयं
दोषैरन्यजनाश्रयैरपटवो जाताःस्म इत्यद्भुतम्॥'

अन्योन्यालङ्कारलक्षणम्—अन्योन्यं लक्षयताऽऽचार्येण विश्वनाथेनाभिहितम्—
'अन्योन्यमुभयोरेकक्रियायाः कारणं मिथः।' इति।

अयमाशयो यत् उभयो कर्तृभूतयोर्द्वयोर्वस्तुनोः एकस्याः क्रियायाः विच्छितिविशेषेण मिथः कारणम् अन्योन्यालङ्कार इत्यभिधीयते।

उदाहरणं यथा—'त्वया सा शोभते तन्वी तया त्वमपि शोभते।
रजन्या शोभते चन्द्रश्चन्द्रेनाऽपि निशीथिनी॥' इति॥

प्रतीपम्—'प्रसिद्धस्योपमानस्योपमेयत्वप्रकल्पनम्।
निष्फलत्वाभिधानं वा प्रतीपमिति कथ्यते॥'

अयमाशयो यत् प्रसिद्धस्य=प्रख्यातस्य, उपमानस्य सादृश्यप्रतियोगित्वेन लोके प्रसिद्धिमुपगतस्य वस्तुनः उपमेयत्वप्रकल्पनं सादृश्यत्वानुयोगित्वप्रकल्प-नम् अथवा तथाविधोपमानस्यैव वैयर्थ्यप्रतिपादनं प्रतीपमित्यभिधीयते।

उदाहरणं यथा—'तद्वक्त्रं यदि मुद्रिता शशिकथा हा हेम सा चेद्द्युतिः
तच्चक्षुर्यदि हारितं कुवलयैस्तच्चेत् स्मितं का सुधा ?
धिक् कन्दर्पधनुर्भ्रुवो यदि च ते, किं वा बहु ब्रूमहे
यत्सत्यं पुनरुक्तवस्तुविमुखः सर्गक्रमो वेधसः ॥' इति ॥

अत्र वक्त्रादिभिरेव चन्द्रादीनां शोभातिवहनात् तेषां निष्फलत्वम् ।

स्वभावोक्तिलक्षणम्—'स्वभावोक्तिर्दुरूहार्थं स्वक्रियारूपवर्णनम् ।'

अयमाशयो यथा—दुरूहार्थयोः विशेषचातुर्यबोध्यत्वेन पामरजनैरज्ञेययोः केवलसहृदयसंवेद्ययोः अर्थस्य डिम्भादेः स्वक्रियरूपयोः तत् तद्गतस्वाभाविकमात्रचेष्टाकारयोर्वर्णनं निरूपणं स्वभावोक्तिरित्यभिधीयते । यस्य कस्यचिद् दुरूहवस्तुनोऽसाधारणधर्मवर्णनं स्वभावोक्तिरिति फलितार्थः ।

उदाहरणं यथा—

'लाङ्गूलेनाभिहत्य क्षितितलमसकृद्दारयन्नग्रपद्भ्याम्
आत्मन्येवावलीय द्रुतमथ गगनं प्रोत्पतन् विक्रमेण ।
स्फूर्जद्धूङ्कारघोषः प्रतिदिशमखिलान् द्रावयन्नेष जन्तून्
कोपाविष्टः प्रविष्टः प्रतिवनमरुणोच्छूनचक्षुस्तरक्षुः ॥' इति ॥

संसृष्टयलङ्कारलक्षणम्–संसृष्ट्यलङ्कारं निरूपयताऽऽचार्येण विश्वनाथेनाभिहितं यत्—

'मिथोऽनपेक्षयैतेषां स्थितिः संसृष्टिरुच्यते ।' इति ।

यदैकस्मिन्नेव वाक्ये एकाधिकानामलङ्काराणां परस्परं निरपेक्षरूपेण तिलतण्डुलन्यायेन स्थितिर्भवति तदा तत्र भवति संसृष्टिनामकोऽलङ्कारः ।

उदाहरणं यथा—'देवः पायादपायान्नः स्मेरेन्दीवरलोचनः ।
संसारध्वान्तविध्वंसहंसः कंसनिषूदनः ॥' इति ॥

सङ्करालङ्कारः—'अङ्गाङ्गित्वेऽलङ्कृतीनां तद्वदेकाश्रयस्थितौ ।
सन्दिग्धत्वे च भवति सङ्करस्त्रिविधः पुनः ॥' इति ॥

अयमाशयो यत् सङ्करालङ्कारः त्रिप्रकारवान् भवति—अङ्गाङ्गिसङ्करः; एकाश्रयसङ्करः सन्देहसङ्करश्च ।

अङ्गाङ्गिसङ्करलक्षणोदाहरणे तत्र—यत्र काव्ये एकाधिकानामलङ्काराणां सत्त्वे एकोऽलङ्कारः अङ्गी प्रधानो भवति अपरे च तस्य अङ्गतां यान्ति तत्र भवति अङ्गाङ्गिसङ्करनामकोऽलङ्कारः ।

उदाहरणं यथा—'अनुरागवती सन्ध्या दिवसस्तत्पुरस्सरः ।
अहो ! दैवगतिश्चित्रा तथापि न समागमः ॥'

अत्र विशेषोक्तिसमासोक्त्योः सङ्करः । तत्राङ्गी विशेषोक्तिः अङ्गं च तस्य समासोक्तिः ।

एकाश्रयसङ्करो यथा—यत्र काव्ये एकस्मिन्नेव पदे पादे वा द्वावलङ्कारौ परस्परं करम्बिततया भवतस्तत्र भवति एकाश्रयसङ्कराख्योऽलङ्कारः ।'तथा चोदाहरणम्—

'कटाक्षेणापीषत् क्षणमपि निरीक्षेत यदि सा
तदानन्दः सान्द्रः स्फुरति पिहिताशेषविषयः ।
सरोमाञ्चोदञ्चत् कुचकलशनिर्भिन्नवसनः
परीरम्भारम्भः क इह भविताम्भोरुहदृशः' ॥

अत्र कटाक्षेणापीषत् क्षणमपीत्यत्र छेकानुप्रासस्य निरीक्षेतेत्यत्र क्षकारमादाय वृत्त्यनुप्रासस्य चैकाश्रयेऽनुप्रवेशः । किञ्चात्रैवानुप्रासार्थापत्त्योरेकाश्रयेऽनुप्रवेशः ।

सन्देहसङ्करालङ्कारो यथा—निर्णायकं हेतोरभावात् यत्रालङ्कारस्य स्वरूपनिर्णय एव नहि सम्भवति बह्वालङ्कारसन्देहात् तत्र भवति सन्देहसङ्करालङ्कारः । तथा चोदाहरणम्—

'इदमाभाति गगने भिन्दानं सन्ततं तमः ।
अमन्दनयनानन्दकरं मण्डलमैन्दवम्' ॥

अत्र किं मुख्यस्य चन्द्रतयाऽध्यवसानादतिशयोक्तिः उत इदमिति मुख निर्दिश्य चन्द्रत्वारोपान्मुखम् । अथवा इदमिति मुखस्य चन्द्रमण्डलस्य च द्वयोरपि प्रकृतयोरेकधर्माभिसम्बन्धात् तुल्ययोगिता; आहोस्वित् चन्द्रस्याप्रकृतत्वाद् दीपकम् । इत्थं बहूनामलङ्काराणां सन्देहात् सन्देहसङ्करालङ्कारः ।

निबन्धभागः

(१) विद्या (अथवा) विद्याधनं सर्वधनप्रधानम् ।

(अथवा)

किं किं न साधयति कल्पलतेव विद्या ।

विद्या ज्ञानस्यापरपर्यायभूतम् । मानवः आजन्मनः किञ्चिद् गृह्णाति ज्ञानम् । माता-पिता समे गुरुजनाश्च बालकं किञ्चित् शिक्षयन्ति । पुनः शिक्षां गृह्णातुं स विद्यालयेषु याति । पुनर्महाविद्यालयेषु तदनन्तरं विश्वविद्यालयेषु च । तथाविधां शिक्षामधिगतो मनुष्यो भवति विद्यया सम्पन्नः, सो विद्वानित्यभिधीयते । समाजे तस्य सम्मानातिशयो भवति ।

मानवस्य बहुविधेषु धनेषु विद्या सर्वप्रधानं धनमास्ते । यतः विद्याव्यतिरिक्तानि सर्वाणि धनानि मानवतः पृथक् सिद्धानि भवन्ति, अत एव तेषाम् अपकरणं नानाविधैरुपायैः कर्तुं शक्यते । चौरेण हार्याणि भ्रातृभिर्विभज्यानि, राज्ञाच्छिद्यानि च तानि भवन्ति विद्यायाम् एतादृशानां दोषाणां लेशोऽपि नास्ति । अतएव कथितं केनचन पर्यालोचकेन—

'न चौरहार्यं न च राजहार्यं न भ्रातृभाज्यं न च भारकारि ।
व्यये कृते वर्धत एव नित्यं विद्याधनं सर्वधनप्रधानम्' ।।

विद्याया व्ययेन वृद्धिमेव वीक्ष्योक्तं केनचन—

'अपूर्वः कोऽपि कोशोऽयं विद्यते तव भारती ।
व्ययतो वृद्धिमायाति क्षयमायाति सञ्चयात्' ।।

अतएवैकाग्रेण मनसा सर्वदा विद्यामर्थञ्च स्वमजरममरञ्च मत्वा तदुपार्जनाय सयत्नवता भाव्यम् । विद्याया उपार्जने कदाऽप्यालस्यं नहि कर्तव्यं भवति । सर्वविधं दुःखं सोढ्वा साऽर्जनीया भवति । अतएवोक्तं केनचन—

'सुखार्थिनः कुतो विद्या विद्यार्थिनः कुतः सुखम् ।'

विद्याया अर्जनं तु बहुप्रकारकेषु तपस्सु एकं तपो वर्तते । विद्या एको गुणो वर्तते मनुष्यस्य । तेनैव सः सर्वत्र समादरो भवति । विदुषे देशकालयोः काचित् सीमा न भवति । अतएवाभिहितं केनचन—

'स्वदेशे पूज्यते राजा विद्वान् सर्वत्र पूज्यते' । इति ।

विद्यायाः उपकारातिशयमेवावेक्ष्य अभिहितम्—

'विद्या नाम नरस्य रूपमधिकं विद्या हि गुप्तं धनं
विद्या भोगकरी यशःसुखकरी विद्या गुरूणां गुरुः ।
विद्या बन्धुजनो विदेशगमने विद्या परा देवता
विद्या राजसु पूज्यते नहि धनं विद्याविहीनः पशुः ॥'

किञ्च—'विद्या नाम नरस्य कीर्तिरतुला भाग्याश्रये चाश्रयो
धेनुः कामदुघा रतिश्च विरहे नेत्रं तृतीयञ्च सा ।
सत्कारायतनं कुलस्य महिमा रत्नैर्विना भूषणं
तस्मादन्यमुपेक्ष्य सर्वविषयं विद्याधिकारं कुरु ॥' इति ॥

नहि लोककल्याणकारिणीमात्रं विद्या अपि तु पारलौकिकमपि कल्याणं करोति सा । ज्ञानस्यैव मोक्षसाधकतमत्वमवेक्ष्योक्तम्—'ऋते ज्ञानान्न मुक्तिः' इति ।

अतएवोपनिषत्सु प्रोक्तम्—'सा विद्या या विमुक्तये ।' इति ।

विद्यायाः सत्स्वपि समेषु कल्याणगुणेषु अस्या एकम् अकल्याणमयमपि पक्षं विद्यते । तद्विद्यते विद्यायाः मदम् । अनवहिते पुरुषे विद्यायाः उपार्जनानन्तरम् अभिमान आयाति । दृप्तो जनः स्वविद्यामदेन सम्मान्यानां गुरुजनानामपि अवमाननां करोति । अतएव विदुषा सावधानेन भाव्यम् । विद्याया अवाप्तेरनन्तरं यदि जने नम्रता आयाति तदैव सा कल्याणकारिणी भवति । अतएवास्या उज्ज्वलं पक्षं निर्दिशन् कश्चनाऽऽह—

'विद्या ददाति विनयं विनयाद् याति पात्रताम् ।
पात्रत्वाद् धनमाप्नोति धनाद् धर्मः ततः सुखम् ॥' इति ॥

(२) सत्सङ्गति

(अथवा)

सत्सङ्गतिः कथय किं न करोति पुंसाम्

'सताम्=सज्जनानाम्, सङ्गतिरेव सत्सङ्गतिरि'त्यभिधीयते । अयमेव 'सत्सङ्ग' इति नाम्नाऽप्यभिधीयते । जीवने सत्सङ्गतेर्महान् प्रभावो भवति । संसर्गेणैव मनुष्ये गुणानां दोषाणां चाधानो भवति । यदि मनुष्यः दुर्जनानां सङ्गे निवसति तदा तस्मिन्ननेकविधा दोषा आयान्ति । आहार-विहार-व्याहार-व्यवहारादिक-मखिलं भवति दूषितम् । समाजस्य सर्वे जनाः तमनादरस्य दृष्टया

पश्यन्ति। यदि मनुष्यः कस्यचन सज्जनस्य सङ्गे निवसति तदा तस्मिन् गुणानामाधानं भवति। सर्वे जनास्तस्य जनस्य समादरं कुर्वन्ति। दुष्टा अपि जनाः सज्जनानां संसर्गेण सज्जना भवन्ति। अतएवाभिहितम्—

'संसर्गजा दोषगुणा भवन्ति' इति।

सत्सङ्गतेरेव प्रभावात् ध्रुवः महत्पदमलभत। किन्तु दुर्जनसङ्गतिः सञ्जातमात्रेण धार्मिकः शिष्टश्चाजामिलो दुर्वृत्तेष्वग्रगण्योऽभूत्। अतएवोक्तम्—

'कामं व्यसनवृक्षस्य मूलं दुर्जनसङ्गतिः।' इति।

परन्तु सज्जनानां भगवतः पार्षदानाम् अत्यल्पमपि सङ्गमवाप्य सः यमयातनातोऽपि विमुक्तोऽभवत्। अतोऽवितथमेवास्ते—

'अनुसृत्य सतां वर्त्म यत् स्वल्पमपि तद् बहु।' इति।

सत्सङ्गतेरिदं प्रत्यक्षं फलमास्ते यत् यदि कश्चन दुर्जनोऽपि सत्सूपविशति, व्यवहरति वा तदा सोऽपि सज्जन एव गण्यते। इदमेवावेक्ष्य केनाप्युक्तम्— 'कस्य सत्सङ्गेन भवेच्छुभ' इति। एवमेव बको हंसेषु हंसायते, काकः पिकेषु पिकायते, लोहः सुवर्णमणिसंसर्गात् सुवर्णतां याति। दुग्धेन सह मिलितं जलमपि दुग्धतां याति। सत्सङ्गत्या मानवस्य महत्त्वं वर्द्धत, तस्य कीर्ति-पताका चतुर्दिक्षु प्रसृमरा भवति। अतएवाभिहितम्—

'सद्भिरेव सहासीत सद्भिः कुर्वीत सङ्गतिम्।
सद्भिर्विवादं मैत्रीं च नासद्भिः किञ्चिदाचरेत्॥' इति॥

सत्सङ्गतेः बालानामुपरि अतीव प्रबलः प्रभावो भवति। यदि सः दुष्टैः हीनैश्च बालकैः सह व्याहरति, व्यवहरति, तेषु क्रीडति तदा सोऽपि तथैव भवति। तस्य कोमलं मस्तिष्कं सर्वथा भवति परिवर्तितम्। सो वर्द्धितः सन् दुष्ट एव गण्यते। नहि भवति जीवने कदापि लब्धसम्मानः। अतएव दुष्टानां सङ्गः सर्वदा त्याज्यः। सतामेव सङ्गतिः कर्तव्याः। सत्सङ्गतेः उपकारातिशयमेव विलोक्य प्रोक्तम्—

'पात्रं पवित्रयति नैव गुणान् क्षिणोति
स्नेहं न संहरति नापि मलं प्रसूते।
दीपावसानरुचिरश्चलतां न धत्ते,
सत्सङ्गमः सुकृतसद्मनि कोऽपि दीपः॥'

सत्सङ्गतेः प्रभावेण मानवस्य बुद्धौ पाटवमायाति तस्य जाड्यं च भवत्यपाकृतम्। तथाविधो मानवः प्रायेण मृषाभाषित्वमपहाय सत्यमेव ब्रूते। तेन च

निष्पापस्य तस्य मानस्य यशः सर्वत्र प्रसृमरं भवति दिक्षु विदिक्षु च, वर्द्धते च तस्य सर्वत्र सम्मानम् । तेन च प्रसन्नचेताः सो मानवः सर्वदा सुखानुभवं करोति । इममेवाखिलमर्थंजातमाकलय्य प्रोक्तं सत्सङ्गतेः स्तुतौ—

'जाड्यं धियो हरति सिञ्चति वाचि सत्यं
मानोन्नतिं दिशति पापमपाकरोति ।
चेतः प्रसादयति दिक्षु तनोति कीर्ति
सत्सङ्गतिः कथय किं न करोति पुंसाम्' ॥ इति ॥

(३) छात्रजीवनम्
(अथवा)
छात्राणामध्ययनं तपः

मानवजीवने छात्रजीवनमतीव महत्त्वपूर्णः कालो भवति । अयमेवावसरो भवति यदा स्वस्य जीवनस्य निर्माणं करोति मनुष्यः । अत एवास्माकं महर्षिभिः चतुर्षु भागेषु विभाजितम्—ब्रह्मचर्यजीवनम्, गार्हस्थ्यजीवनम्, वानप्रस्थजीवनम्, संन्यस्तजीवनञ्च । तत्र ब्रह्मचर्यजीवने एवं मानवः प्रमुखतया अध्ययनं करोति ।

भारतीयेषु शास्त्रेषु छात्रजीवनस्य विषये महती मर्यादा दृश्यते । वेदेषु प्रोक्तं यद् यदा ब्रह्मचारी अष्टवर्षीयो भवति तदा तस्योपनयनसंस्कारं सम्पाद्य अध्यापनं कर्तव्यम् । तथाहि—

'अष्टवर्षं ब्राह्मणम् उपनयीत तमध्यापयेत्' ।

मनुस्मृतिकारस्तु वक्ति यत् उपनीतश्छात्रः श्रावणमासस्य पूर्णिमायां भाद्रपदमासस्यामावस्यां वा उपाकर्म कृत्वा अध्ययनस्य नियमं पालयन् अध्ययनं कुर्वीत । तथाहि—

'श्रावण्यां प्रौष्ठपद्यां वाऽप्युपाकृत्य यथाविधिः ।
युक्तश्छन्दांस्यधीयीत मासान् विप्रोऽर्द्धपञ्चमान्' ॥ इति ॥

अयं जीवनस्य कालः सुवर्णमयः कालो भवति । अस्यामवस्थायां शास्त्राणामभ्यसनमपि सुकरं भवति । अपरिपक्वे मस्तिष्के विद्याध्ययनस्य संस्कारः लग्नः सन् आजीवनं तिष्ठति । अल्पवयस्कत्वाद् गुरूणामनुशासनपालनेऽपि किमपि काठिन्यं न भवति । एतस्मादेव कारणात् प्राचीने भारते सर्वेषां बालकानामाध्ययनस्य गुरुकुले व्यवस्थाऽऽसीत् । यत्र संसारात् निरपेक्षा समाजकल्याणकामिनः, तत्त्ववेत्तारः, शास्त्रज्ञाः आचार्यश्छात्रान् तासु तासु विद्यासु पारङ्ग-

तानकार्षुः । छात्राणां चरित्रसंरक्षणं कुर्वन्तस्ते शुल्कनिरपेक्षाः पुत्रवन्मन्यमानाः छात्रान् ते पाठयन्तिस्म ।

गुरुकुलेऽधीतविद्यानां छात्राणामतीव महत्त्वमासीत् । गच्छतः स्नातकस्य मार्गं राजानोऽपि परित्यज्य तस्य समादरमकार्षुः । कौत्सस्य अधीतचतुर्दश-विद्यस्य सम्मानसंरक्षणाय कृत-विश्वजित्यागो महाराजो रघुः कुबेरेणापि साकं युद्धं कर्तुं समुत्सुकोऽभूत् ।

प्राचीने भारते छात्राणां कृते दानं दातुं जनाः सर्वदा समुत्सुका अभूवन् पुण्यदृष्ट्या । विद्यार्थिभोजनस्य महत्त्वं प्रदर्शयन् महर्षिः मनु वक्ति—

'कुक्षौ तिष्ठति यस्यान्नं विद्याभ्यासेन जीर्यते ।
तारयेत् तस्य वंशानि दशपूर्वान् दशापरान्' ।।

छात्रजीवनं विद्यार्थिजीवनमित्यभिधीयते । विद्यामेवार्थयते छात्राः । विद्या-प्राप्तिव्यतिरिक्तं तस्य लक्ष्यं न भवति । तस्यै एव सदा यतते । छात्राणामध्य-यनमेव तप इत्यभिहितम् । अत एव छात्रजीवनमत्यन्तं सुसंयतं जीवनं भवति । अस्मिन्नेव काले सः स्वकीयं भविष्यं विरचयति । अत एवेदं जीवनमति-महत्त्वमयमास्ते मानवाय ।

(४) परोपकारः

(अथवा)

परोपकाराय सतां विभूतयः

मानवजीवनस्य नैकेषु गुणेषु परोपकारोऽपि एको महान् गुणो वर्तते । परेषाम्=स्वव्यतिरिक्तानां जीवानाम्, स्वार्थमनपेक्ष्य उपकारकरणमेव 'परो-पकार' इत्यभिधीयते । अनेन गुणेन परिपूर्णो मानवः समेषां जनानामुपकार-मारत्रयति । अपकारिणमप्युपकरोति सः ।

भारते वर्षे परोपकारस्य महती परम्परा दृश्यते । करुणक्रान्तो हि जनः उपकारं करोति । छान्दोग्योपनिषदि श्रूयते यत् स्वपराङ्मुखान् प्रलयकाले संसरतः स्वजीवनोऽन्नयनोपयोगिकरणकलेवरादिभिर्विरहितान् जीवान् विलोक्य करुणाक्रान्तः सन् स्वकीयेन सत्यसङ्कल्पेन द्वारा जगतः सृष्टिमकार्षीत् । येन सृष्टाः जीवाः स्वजीवनकल्याणं कुर्युरिति । तथा च श्रुतिः—'हन्ता हमिमा-स्तिस्रो देवता अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि' । 'एकोहं बहु स्याम' इत्यादिका ।

एतदेव नहि, परमात्मनः सर्वं एवावताराः परोपकारपराः। परोपकारो जीवनस्यात्यावश्यको गुणो वर्तते। परमात्मनः सर्वापेक्षयाऽतिशयोपकारित्वादेव सर्वे जीवा तस्य पूजनं विदधति।

प्रकृतेरपि यान्युपादानानि वर्तन्ति तानि सर्वाणि परोपकारायैव प्रतीयन्ते। परोपकारपरायणा पृथिवी सम्पूर्णं जगद् बिभर्ति। वायुः प्रत्युपकारनिरपेक्ष एव समेषां जीवानां प्राणप्रदानपुरःसरं वाति। सूर्यः समेषां जीवानां प्रकाशनं तेभ्य उष्माप्रदानञ्च करोति परोपकारायैव। इदमेव नहि, वृक्षाणां फलनं नद्याः प्रवहणं च परोपकारपरमेव। एतेनैव ज्ञायते यदस्माभिरपि परोपकार-परायणैः भाव्यम्।

भारतीयानामुपकारायैव महात्मागान्धी स्वतन्त्रताप्राप्त्यै आजीवनं प्रयासं कृत्वा 'बापू' इति पदवीमवाप। अद्यापि समेषु राष्ट्रीयेषु कार्येषु समे जनाः महात्मानं गान्धिनं स्मरन्ति। इत्थमिदं निश्चप्रचमास्ते यत् परोपकारपरायणः मनुष्यो जगति विख्यातः लब्धकीर्तिश्च भवति।

(५) संस्कृत भाषा

(अथवा)

संस्कृतं राष्ट्रभाषा स्यात्

विश्वस्य सर्वासु भाषासु प्राचीनतमा भाषा संस्कृतं वर्त्तते। इदमेव सर्वासां भाषाणां जननी वर्तते इति महतां मनीषिणां मनीषा। नास्ति काचनाऽपि भारतीया भाषा यस्या उद्गमः संस्कृतात् नो भवेत्। भारतस्य प्राचीनतमा वेदाः संस्कृतमेवास्ति। संस्कृते एव सर्वाणि पुराणानि श्रीमन्महाभारतम्, बाल्मीकीयं रामायणम्, सर्वाणि धर्मशास्त्राणि, सर्वा उपनिषदश्च सन्ति। संस्कृत-भाषायामेव महाकविना कालिदासेन प्रणीतानि काव्यानि नाटकानि, भारवेः किरातार्जुनीयम्, माघकवेः शिशुपालवधम्, शङ्कराचार्यस्य भाष्यम्, रामानुजाचार्यस्य परमसात्त्विका विचारश्च सन्ति। पाणिनिप्रणीता सूत्राष्टाध्यायी, पतञ्जलिप्रणीतं महाभाष्यञ्च विराजतेतमाम्। किं बहुना, साम्प्रतमपि संस्कृत-वाङ्मयस्य तथाविधं विशालं साहित्यं समुपलभ्यते यस्य विशालतायास्तुलना, कस्यचनाप्याधुनिकस्य वाङ्मयस्य साहित्येन साकं कर्तुं नहि शक्यते।

संस्कृतमेव प्राचीनतमा भारतीया भाषा वर्तते। साम्प्रतमपि भाषाविवाद-स्योपशमनाय भाषेयमलंमास्ते। यतस्तेषु तेषु प्रदेशेषु प्रचलिता सा भाषा-

वर्तते । अत एव तस्य तस्य प्रदेशस्य जना वाञ्छन्ति यन्मम प्रदेशस्यैव भाषा भवेत् राष्ट्रभाषा । संस्कृतं कस्यचनाऽपि प्रदेशविशेषस्य भाषा नास्ति, अपि तु इयं सम्पूर्णस्य भारतराष्ट्रस्य भाषा विद्यते । अस्या भाषाया वेत्तारः सम्पूर्णे भारते विस्तृता वर्तन्ते । अत एव सर्वेषां प्रदेशानां जनानाम् इमां भाषां प्रति समानो रागो विरागश्च । कस्यचनाऽपि प्रदेशस्य जनो नहि वक्तुमर्हति यदियं वर्तते मम प्रदेशस्य भाषा । अत एवेयमेव राष्ट्रस्य भाषा भवितुमर्हा ।

न चात्र वाच्यं यदस्या भाषाया वेत्तारोऽत्यल्पीयांसो जना वर्तन्ते, यतः अस्या अपि प्रचारस्तथैव भवितुमर्हति यथा साम्प्रतं वर्तते कस्याश्चनाऽपि भाषायाः । किञ्चात्रेतिहासः साक्षी वर्तते यत् यदा भारते आंग्ला आगुः तदा नहि कश्चनापि भारतीयः जानातिस्म आंग्लभाषाम्, किन्तु राज्यकार्येषु तस्या उपयोगं दृष्ट्वैव जनास्तेन रूपेण तस्या भाषाया अध्ययने प्रवृत्ता अभूवन् । अनेनैव रूपेण संस्कृतस्यापि प्रचुरः प्रचारः सार्वभौमरूपेण भारते भवितुमर्हति । अयं तु अन्यो विषयो यत् भारतीयां भाषामिमाम् उपेक्षन्ते भारतीया अधिकारिणः ।

किञ्च वयं भारतीया स्मः । भारतीयो धर्मः कः ? भारतीया संस्कृतिः का ? का नाम भारतीयता ? इत्यादिकानामखिलानां प्रश्नानां समाधानं संस्कृताध्ययनं विना भवितुं नार्हति । अत एव अस्माभिः सर्वैः संस्कृतम् अध्येतव्यम् ।

(६) वाराणसी

भारतस्य तीर्थेषु वाराणस्या स्थानं महत्त्वपूर्णं वर्तते । उत्तरप्रदेशस्य मण्डलेषु वाराणस्येकं मण्डलमप्यास्ते । वाराणसी भगवतो विश्वेश्वरस्य नगरी कथ्यते । भगवतः शङ्करस्य द्वादशसंख्याकेषु ज्योतिर्लिङ्गेषु विश्वेश्वरनामकं ज्योतिर्लिङ्गमत्रैव विराजतेतताम् । गङ्गानद्यास्तटे निविष्टेऽयं नगरी प्राचीनतमा मनोज्ञतमा च वर्तते । इयं मोक्षप्रदासु सप्तनगरीष्वन्यतमा वर्तते । अत एवोच्यते—'काश्यां मरणान्मुक्तिः ।' इति ।

इयं वाराणसी पुराकालादेव विद्याया नगरीति गण्यते । अत्रैव महान्तो विद्वांसोऽभूवन् जगति प्रख्याततमाः शिवकुमारशास्त्री, तात्याशास्त्री, दामोदरशास्त्री राजराजेश्वरशास्त्री, बालशास्त्री, श्रीरामशास्त्रींप्रभृतयः । अत्रैव महामना मदनमोहनमालवीयः काशी-हिन्दू-विश्वविद्यालयस्य स्थापनामकार्षीद् । अत्रैव काशीविद्यापीठोऽपि वर्तते अपरो विश्वविद्यालयः । अत्रैव

संस्कृतभाषायाः अध्ययनकेन्द्ररूपः सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयो विराजते-तमां महामनीषिभिरध्युषितं साम्प्रतमपि।

वाराणसी प्रधानरूपेण शिवोपासनायाः केन्द्ररूपेण परिगण्यते उत्तरभारतस्य। अत्रासंख्यानि शिवमन्दिराणि वर्तन्ते। अत्रत्येषु प्रधानमन्दिरेषु—विश्वनाथमन्दिरस्य, अन्नपूर्णामन्दिरस्य, सङ्कटादेवीमन्दिरस्य, मानसमन्दिरस्य, सङ्कटमोचनमन्दिरस्य, भारतमातामन्दिरस्य च नाम गण्यते।

वारणस्यां परश्शतसंख्याकाः संस्कृतविद्यालयाः सन्ति। येषु मन्ये विंशति-संख्याकाः संस्कृतमहाविद्यालयाः 'क'-वर्गीया वर्तन्ते। अत्रैव भगवतो बुद्धस्य ज्ञानप्राप्तेरनन्तरं प्रथमप्रवचनस्य स्थलं सारनाथनामकं बौद्धानां तीर्थं वर्तते।

(७) मम विद्यालयः

मम विद्यालयस्य नाम श्रीहनुमत्संस्कृतमहाविद्यालयो वर्तते। अयं महाविद्यालयः 'क'-वर्गीयसंस्कृतमहाविद्यालयेष्वन्यतमो वर्तते। अस्मिन् महाविद्यालये वेदान्तस्य, व्याकरणस्य साहित्यस्य च अध्यापनं भवति आचार्य-कक्षापर्यन्तम्। अत्र विद्यालये दशसंख्याकाः कक्षा एका विस्तृता कक्षा। विस्तृतं चैकं प्राङ्गणमास्ते। अस्य महाविद्यालयस्य नैजं क्रीडाक्षेत्रं वर्तते, यत्र सर्वप्रकारकाणाम् आधुनिकानां क्रीडानां साधनानि सुलभानि सन्ति। अस्मिन् क्रीडाक्षेत्रे सर्वे वयम् एकत्रीभूय क्रीडारसमनुभवामः प्रतिदिनम्।

अस्माकं समे अध्यापका अत्यन्तसरलाः छात्रांश्च स्निह्यन्ति। कश्चनापि कलहशीलो न दृश्यते अस्माकं गुरुवर्येषु।

अस्मिन् महाविद्यालये सर्वेषां विषयाणां सर्वासु कक्षासु छात्राः पूर्णरूपेण वर्तन्ते। कस्यापि विषयस्य छात्रस्य दौर्लभ्यं नास्ति। सर्वे छात्राः अनुशासनानुकारिणः सन्ति, अतएव अस्माकं विद्यालये छात्रेषु कदापि कलहो न भवति, सर्वे छात्राः परस्परं भ्रातृवद् व्यवहरन्ति व्याहरन्ति च।

दशवादनकाले विद्यालयस्य प्रार्थनायाः घण्टानादो भवति तदात्वे समे छात्राः सम्भूय समवेतस्वरेण प्रार्थनां कुर्वन्ति। तत्र समे अध्यापका अपि अस्माकं समुपस्थिताः सावधानाः भक्तिप्रवणमानसाश्च तिष्ठन्ति। प्रार्थनायास्समाप्तौ समे छात्राः यदा सावधानास्तिष्ठन्ति तदैवास्माकं प्राचार्यमहोदयाश्छात्रेभ्यः पञ्चक्षणानि यावत् सदुपदेशं कुर्वन्ति। पुनः पङ्क्तिबद्धरूपेण सर्वे छात्राः स्वकीयाया कक्षायां यान्ति। पुनः अध्यापका आयान्ति, शिक्षयन्ति चास्मान्

तान् तान् विषयानति प्रेम्णा । इत्थं चतुर्वादनकालं यावत् अस्माकं पाठशाला परिचलति । चतुर्वादनकाले विद्यालयोऽयं पिहितकपाटो भवति ।

अस्मिन् विद्यालये सम्पत्तेर्न्यूनत्वं नास्ति, अतएव सर्वे छात्रा अत्र विद्यालये भूयसीं छात्रवृत्तिं लभन्ते । अतएव कश्चनापि छात्रोऽत्र अर्थकार्श्यं नहि अनुभवति । सर्वे छात्राः प्रसन्नाः स्नेहिलाश्च वर्तन्ते ।

मम विद्यालये प्रतिपदि अष्टम्याश्च भवत्यवकाशः । अवकाशस्य दिने वयं वाग्विवर्द्धिन्याः सभाया आयोजनं कुर्मः । तद्दिने प्राचार्यमहोदयानां सभाध्यक्षे समुपस्थितौ च समेषां गुरुजनानां ते ते छात्रास्तेषु तेषु विषयेषु स्वशक्तिसामर्थ्यानुसारेण भाषणं कुर्वन्ति । इत्थमयमस्माकं विद्यालयोऽतिमनोज्ञः सुसज्जितश्च वर्तते ।

(८) मम प्रियतमः कविः महाकविः कालिदासः

महाकविः कविकुलगुरुः कालिदासो मम प्रियतमः कविर्वर्तते । तस्यैतस्य कवेर्जन्मविषये विदुषां मतभेदो दृश्यते । केचन विचारकाः कालिदासम्—

'धन्वन्तरि क्षपणका-मरसिंह शङ्कु-वेतालभट्ट-घटखर्पर-कालिदासाः ।
ख्यातो वराहमिहिरो नृपतेः सभाया रत्नानि वै वररुचिर्नव विक्रमस्य ॥'

इति श्लोकमधिकृत्य विक्रमादित्यस्य सभायाः नवरत्नेषु प्रधानतमं रत्नं स्वीकुर्वन्ति । अतएव कालिदासस्य समयः तेषां मतानुसारेण ई० पू० प्रथमा शती प्रतीयते । मेघदूतस्य 'आषाढस्य प्रथमदिवसे', 'प्रत्यासन्ने नभसि', 'शापान्तो मे भुजगशयनात्' इत्यादिकान् मेघदूतस्य श्लोकांशानादाय रामचन्द्रविनायकपटवर्धनो ज्योतिषगणनाया अनुसारेण वक्ति यत्—कालिदासः मेघदूतस्य रचनां तदा चकार यदा पुष्यनक्षत्रस्य प्रथमचरणे विद्यमाने श्रीसूर्ये नभोमासः प्रारप्स्यतेस्म । पटवर्धनमहोदयानुसारेण कालिदासः ५६ ई० पू० वर्षे आसीत् प्रामाणिकरूपेण ।

कविरयं स्वकाव्यसौष्ठवाय प्रख्यातो वर्तते । वैदर्भ्यां शैल्यां मनोज्ञवाग्विन्यासपूर्वकं प्रसादगुणेनान्वितं चारुतरं काव्यनिर्माणं कस्य वा सचेतसः मनो न मोहयति । कालिदासः प्रणिनाय 'रघुवंशम्' 'कुमारसम्भवञ्चेति महाकाव्यद्वयम्, 'ऋतुसंहारः', 'मेघदूतमि'ति द्वे खण्डकाव्ये, 'मालविकाग्निमित्रम्', 'विक्रमोर्वशीयम्' 'अभिज्ञानशाकुन्तलञ्चेति' नाटकत्रयम् ।

महाकवेः कालिदासस्य काव्यं शेखरायते संस्कृतकाव्यसमुदाये । कालिदासस्य उपमाः संस्कृतसाहित्ये प्रख्याता विद्यन्ते । उक्तञ्चापि केनचित्—

'उपमा कालिदासस्य' इति। कालिदासस्य सर्वा उपमाः सूक्ष्मेक्षिकायाः विच्छितिविशेषेण सम्पन्नाः सन्ति। महाकविर्बाणभट्टस्तु वक्ति यत्—

'निर्गतासु न वा कस्य कालिदासस्य सूक्तिषु।
प्रीतिर्मधुरसान्द्रासु मञ्जरीष्विव जायते॥'

यामुपमामादाय महाकविः कालिदास स्वेतरान् समस्तान् कवीनतिशेते। तस्या उपमाया विचारप्रकरणे साहित्यदर्पणकर्त्रा अभिहितम्—

'साम्यं वाच्यमवैधर्म्यं वाक्यैक्ये उपमा द्वयोः।' इति।

अयमाशयो यत् यत्रैकस्मिन्नेव वाक्ये वैधर्म्यं विहायोपमानोपमेययोः साम्यमात्रं वर्ण्यते तत्र भवन्युपमानामकोऽलङ्कारः। उपमायाः प्रयोगविषये महाकवेरस्याद्भुतं वैशारद्यं विभाति। कालिदासीयोपमासु लिङ्गवचन-'विभक्तीनां साम्यमौचित्यं रम्यता, पूर्णता यथार्थता च सम्यक् समुपलभ्यते। तथाहि—

'सञ्चारिणी दीपशिखेव रात्रौ यं यं व्यतीयाय पतिंवरा सा।
नरेन्द्रमार्गाट्ट इव प्रपेदे विवर्णभावः स स भूमिपालः॥' इति॥

अयमाशयो यत् पतिं वृणीतुं स्वयंवरे समुपस्थिता जयमालिकाञ्चितहस्ता इन्दुमती यं यं राजानमतिक्रान्तवती स स राजा विवर्णवदनः सन् तेनैव प्रकारेण हताशो वभूव येन प्रकारेण तमसाऽऽच्छन्नायां विभावर्यां राजपथे प्रयान्ती सञ्चारिणी दीपशिखा यस्य प्रासादस्य समक्षं याति स तु प्रकाशतेतमाम्, परन्तु यं प्रासादं साऽतिक्रामति स तु पुनः अन्धकाराच्छन्नं भवति। अत्र सञ्चारिणी दीपशिखा यस्य प्रासादस्य समक्षं याति स तु प्रकाशतेतमाम्, परन्तु यं प्रासादं साऽतिक्रामति स तु पुनः अन्धकाराच्छनं भवति। अत्र सञ्चारिणीदीपशिखा पतिंवरयोः लिङ्गवचनविभक्तीनां साम्यमवलोक्यते। येन प्रकारेण इन्दुमती सञ्चरति स्वयंवरे तथैव दीपशिखाऽपि सञ्चारिणी। किञ्च—नरेन्द्रमार्गाट्ट भूमिपालयोरपि लिङ्गवचनविभक्तिक्रियाणां साम्यमास्ते। अन्या अपि कालिदासस्य काश्चन उपमा दर्शनीया वर्तन्ते। तथाहि—

'वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ॥' इति॥

नित्यमिलितौ शिवपार्वत्यौ 'वागर्थाविव सम्पृक्तौ' वर्तेते।

दिलीपसुदक्षिणयोर्मध्ये विद्यमाना नन्दिनी दिनक्षपयोरन्तराले सन्ध्येव भाति, इति प्राह महाकविः—

'पुरस्कृता वर्त्मनि पार्थिवेन प्रत्युद्गता पार्थिवधर्मपत्न्या ।
तदन्तरे सा विरराज धेनुर्दिनक्षपामध्यगतेव सन्ध्या ।।' इति ।।

सत्यपि कालिदासस्य काव्ये उपमाया वैशिष्ट्ये अर्थगौरव-पदलालित्ये अपि नापहीयेत, ते तु पदे पदे दृश्येते । अतएव महाकविः कालिदासः शेखरायते संस्कृतकवीनां समवाये ।

(९) दीपावली अथवा दीपमालिका

भारतवर्षीयेषु पर्वसु दीपावल्या अत्यधिकं महत्त्वं वर्तते । यद्यपि भारते वर्षे वर्णानुसारेण पर्वाणाम् अपि विभागः कृतो दृश्यते । यथा—ब्राह्मणानां श्रावणीकर्म, क्षत्रियाणां विजयादशमी, वैश्यानां दीपावली, शूद्राणाञ्चा होलिका पर्व, इति पर्वणां विभागः कदाचित् अतीते भारते आसीत्, परन्तु साम्प्रतिका जनास्तथा नहि कुर्वन्ति । इदानीं सर्वे जनाः सर्वेषां पर्वाणाम्, आनन्दानुभवं कुर्वन्ति । विशेषतो दीपावली तु सर्वैरेव मान्यते । दीपावली कार्तिकमासस्य अमावस्यायां तिथौ भवति ।

दीपावल्यां रात्रौ जनाः लक्ष्म्याः पूजनं विधिपूर्वकं कुर्वन्ति । सर्वत्र ते दीपं प्रज्ज्वालयन्ति । प्रायो जनानां गृहाणि प्रकाशपूर्णानि भवन्ति । जनानां विश्वासो वर्तते यद् दीपावल्यां लक्ष्म्याः पूजनेन भगवत्या लक्ष्म्याः कृपा भवति स्वाश्रिते जने । जनानामियं धारणा एकेन पौराणिकेनाख्यानेन सम्बद्धा वर्तते । तथाहि—

कदाचिन्महर्षिः दुर्वासाऽरण्येषु भ्रमतिस्म । तदात्वे एव स मुनिः सौगन्ध्यातिशयमनुबभूव । उपरि दृष्ट्वा सः कल्पवृक्षपुष्पसमन्विता कञ्चिदप्सरसमद्राक्षीत् । मुनिस्तामाहूय तस्या मालाम् अयाचत । प्रसन्नेन मनसा सा मालां तामदात् मुनये । मालां तां ग्रीवायां धरयित्वा सौगन्ध्यसुखातिशयानुभवजन्यप्रमादेन मत्तो मुनिश्चिरं बभ्रामारण्ये । तदैव सः ऐरावतोपर्यारुह्य यान्तम् इन्द्रमपश्यत् । ऐरावतादवतीर्य मघवा तं मुनिं ननाम । प्रसन्नो मुनिः स्वकीयां कल्पपुष्पमालाम् इन्द्राय प्रादात् । मालां तां शिरसा धार्येन्द्रः, ऐरावतस्य शिरसि न्यदधात् । ऐरावतश्च मालां तां स्वकरेणावतार्य स्वपदेन ममर्द । मालां तां तथाविधां नष्टां विलोक्य क्रोधाविष्टो दुर्वासा मुनिर्देवानां दारिद्र्यं शप्तवान् । लक्ष्मी वैकुण्ठं विहाय पातालेऽगमत् । दैत्या आक्रमणं कृत्वा देवान् परास्तितवन्तः । चिराय काले व्यतीते भगवत इच्छाया देवाः दानवाश्च सम्भूय

क्षीरोदधेः मन्थनमकार्षुः । तस्मिन्नेव संरम्भे समुद्रात् निस्ससार लक्ष्मीरपि । निर्गतां तां लक्ष्मीं स्तौतिस्म श्रीसूक्तेन द्वारा । तदैव देवाः दीपं प्रज्ज्वाल्य लक्ष्म्या आराधनं कुर्वन्ति । तमेव घटनां संस्मारयितुं जनाः साम्प्रतमपि लक्ष्म्याः पूजनमारचयन्ति, परस्परं सम्मिल्यानन्दातिशयमनुभवन्ति च ।

(१०) वसन्तोत्सवः

वसन्तोत्सवः भारतीयोत्सवेषु सर्वाधिकमानन्दप्रदं सर्वेषामुन्मादकम् आबालवृद्धानाम् आपामरपण्डितानाञ्चोत्साहसवर्द्धक उत्सवो वर्तते । अस्मिन्नुत्सवे सर्वे जना उत्क्षिप्तचित्ता भवन्ति । उत्सवोऽयम् ऋतुराजस्य वसन्तस्य शुभागमनावसरे मान्यते । अस्मिन् समये कालः अतीव रमणीयो भवति । औष्ण्यस्य शैत्यस्य वा प्राबल्यं न भवति । समशीतोष्णः कालोऽयं जायते ।

वसन्तोत्सवस्याङ्गचतुष्यं दृश्यते—(१) होलिकाप्रदाहः, (२) रङ्गरञ्जनम्, (३) परस्परसम्मिलनजन्यानन्दातिरेकानुभवः, (४) विविधानां सुरुचिपूर्णानां पक्वान्नानामुपभोगश्च । मन्ये पुरुषार्थचतुष्टयेन समन्वितेन भवति वसन्तोत्सवः, यत्र भारतीयानां चत्वारो वर्णा मिलन्ति । चतुर्णामाश्रमाणां जना अपि समवेता भवन्ति ।

वसन्तोत्सवस्य प्रथमाङ्गं होलिकादाहरूपं पौराणिकेनाख्यानेन सम्बद्धमास्ते । श्रूयते यत् राक्षसराजस्य हिरण्यकशिपोः भगिनी होलिकानाम्नी काचिदासीत् । सा हिरण्यकशिपोः प्रेरणया प्रह्लादं स्वाङ्के निधाय अग्नौ प्रविवेश प्रह्लादं मारयितुम् । यतः अक्षणा लब्धवरप्रसादात् अग्नौ सुरक्षिता आसीत् । परन्तु परमात्मनः कृपण प्रह्लादस्तु सुरक्षितोऽभूत् ममार च सा राक्षसी । तदनन्तरं क्रोधाविष्टो हिरण्यकशिपुः प्रह्लादं मारयितुं स्वयमेवोद्यतः सन् हस्ते कृपाणमादाय प्रह्लादं मणिस्तम्भे बद्ध्वा तस्य जीवनान्तं कर्तुमिच्छया कृपाणप्रहारं कर्तुमैच्छत् । तदैव भगवान् नृसिंहः मणिस्तम्भाद् आत्मानं प्रकटय्य हिरण्यकशिपुम् उरोविदारं मारयतिस्म । लालयामास च प्रह्लादं स्वाङ्के निधाय कथयन्—

'क्वेदं वपुः क्व च कुमारवयस्यमेतत्
क्वैताः प्रमत्तकृतदारुणयातनाश्च ।
श्रुत्वा त्वदार्तवचनं झटिति प्रयातः
क्षन्तव्यमङ्ग यदि मे समये विलम्बः' ॥ इति ॥

इमामेव घटनां मनसिकृत्य भारतीयाः होलिकादहनं कुर्वन्ति । पुनः उरोविदारं राक्षसराजमरणं स्मारं स्मारं ते रङ्गरञ्जनलीलामनुभवन्ति । प्रह्लादस्य

पालनं संस्मृत्य ते परस्परं मिलन्ति, पारस्परिकं रागं द्वेषञ्च विस्मृत्य किञ्च सुराजनि प्रह्लादे प्रतिष्ठिते सिंहासने सौभिक्ष्य सञ्जातं सम्पूर्णायां प्रजायामिति तेषां तेषाम् अन्नानामुपयोगं कृत्वा साङ्गं वसन्तोत्सवं सम्मानयन्ति भारतीयाः।

(११) सदाचारः

(अथवा)

आचारः परमो धर्मः।

(अथवा)

आचारहीनं न पुनन्ति वेदाः।

सतां=सज्जनानाम्, आचारः=आचरणमेव 'सदाचार' इत्यभिधीयते। अस्मिन् भारते भुवि सञ्जातानां मनु-इक्ष्वाकु-भगीरथ-हरिश्चन्द्र-शिवि-दधीचि-रन्तिदेवाम्बरीष-राम-कृष्णप्रभृतीनां भूपतीनां वसिष्ठ वामदेव-वाल्मीकि-व्यास-शुकदेवप्रभृतीनां महर्षीणाम् आचरणमेव सदाचार-शब्देनाभिलपनीयमास्ते। एभिर्महद्भिः सन्दर्शितः पन्थाः जगति जनिमतां जीवानाम् आत्मकल्याणायालम्। एतेषामाचरणमखिलप्रकारकं लौकिकं पारलौकिकञ्च कल्याणप्रदम्। कठोपनिषद्यपि मार्गद्वयस्य वर्णनं समुपलभ्यते—श्रेयोमार्गस्य प्रेयोमार्गस्य च। श्रेयोमार्गं सज्जनाः प्रेयोमार्गं च लोकैप्सापरायणाः स्वीकुर्वन्ति। तथाहि—

'श्रेयश्च प्रेयश्च मनुष्यमेतद् तौ सम्परीत्य विविनक्ति धीरः'। इति।

सोऽयं सदाचारो द्विप्रकारवान् भवति—आभ्यन्तरो बाह्यश्च। सौशील्य-वात्सल्य-मार्दव-आर्जव-सौहार्द साम्य-कारुण्य-माधुर्य-गाम्भीर्य-औदार्यचातुर्यस्थैर्य-धैर्य-सत्यभाषित्वप्रभृतयो मानवोचिताः गुणा एव आभ्यन्तराचाराः। एभिर्गुणैस्समन्वितो मानवोऽपि देवत्वस्य चरमां काष्ठां गाहते। श्रीरामे इमे सर्वे गुणा विराजन्तेतमाम्। तथा चोक्तम्—

'वशी वदान्यो गुणवानृजुः शुचिर्मृदुर्दयालुर्मधुरः स्थिरस्समः।
कृती कृतज्ञस्त्वमसि स्वभावतः समस्तकल्याणगुणामृतो दधिः॥' इति॥

इमे सर्वे गुणाः सदाचारान्तर्गतास्सन्ति। वशित्वादेव श्रीराम एकपत्नीव्रतपरायणोऽभवत्। वदान्यत्वादेव भगवान् श्रीरामः सुग्रीवाय विभीषणाय च साम्राज्यं प्रायच्छत्। भिन्नवर्णाश्रमवतां जनानां नित्यनैमित्तिकप्रायश्चित्तरूपाणां कर्मणां प्रतिपादनं कुर्वता भगवता मनुना प्रोक्तम्—

'चतुर्णामपि वर्णानाम् आचारश्चैव शाश्वतः।' इति।

अस्य श्लोकस्य व्याख्यायां कुल्लूकभट्टो लिखति—'वर्णचतुष्टयस्यैव पुरुष-

धर्मरूप आचारः शाश्वतः पारम्पर्यागतः।' आचारस्यावश्यमनुष्ठेयतां प्रतिपादयन् प्राह मनुः—

'आचारः परमो धर्मः श्रुत्युक्तः स्मार्त एव च।
तस्मादस्मिन् सदा युक्तो नित्यं स्यादात्मवान द्विजः॥
आचाराद्विच्युतो विप्रो न वेदफलमश्नुते।
आचारेण तु संयुक्तः सम्पूर्णफलभाग्भवेत्॥
एवमाचारतो दृष्ट्वा धर्मस्य मुनयो गतिम्।
सर्वस्य तपसो मूलमाचारं जगृहुः परम्'॥ इति॥

आचारस्यैव सर्वापेक्षया माहात्म्यं प्रतिपादयन् आचार्यः समावर्तनकाले शिष्यमुपदिशति। तथा चात्र शिक्षावल्ली तैत्तिरीयाः—

'वेदमनूच्याचार्योऽन्तेवासिनमनुशास्ति—सत्यं वद। धर्मं चर। स्वाध्यायान्मा प्रमदः। आचार्याय प्रियं धनमाहृत्य प्रजातन्तुं मा व्यवच्छेत्सीः। सत्यान्न प्रमदितव्यम्। धर्मान्न प्रमदितव्यम्। कुशलान्न प्रमदितव्यम्।⋯⋯ मातृदेवो भव। पितृदेवो भव। आचार्यदेवो भव। अतिथिदेवो भव। यान्यनवद्यानि कर्माणि तानि सेवितव्यानि नो इतराणि। यान्यस्माकं सुचरितानि तानि त्वयोपास्यानि नो इतराणि। ये चास्मच्छ्रेयांसो ब्राह्मणास्ते त्वयोपासितव्याः। श्रद्धया देयम्। अश्रद्धया अदेयम्। श्रिया देयम्। ह्रिया देयम्। भिया देयम्।' इति।

महर्षिर्याज्ञवल्क्यः सदाचारे सर्वेषां वर्णानामाचरणं सर्वेषामाश्रमाणामाचरणं सर्वेषां संस्काराणाम् आचरणञ्च सन्निवेशितवान्। आचारविषये पृष्टो बाधूलमुनिः स्वस्मृतौ सर्वेषामाह्निककृत्यानां वर्णाश्रमकृत्यानां च आचाररूपेण वर्णनं करोति। शाण्डिल्यमहर्षिरपि मुनिभिः पृष्टः भगवदुपासनविधीनामपि सदाचारे वर्णनं करोति। महर्षिमनुः मनुस्मृतिमेव मानवाचारवर्णनरूपां प्रणिनाय। आसां स्मृतीनां निभालनेनाभाति यत् वेदविहितानां बाह्याचाराश्च बाह्यशौचनाम्नाभिधीयन्ते स्नानादयः। इत्थमुभयप्रकारकाचारविहीनं पुरुषं वेदा अपि पावने नो समर्था भवन्ति। सदाचाराणां पालनमेव सर्वापेक्षया श्रेष्ठो धर्मो वर्तते। अयं सदाचार एव कदाचित् क्वचित् शीलशब्देनाभिधीयते। शीलशब्दाभिहितः सदाचार एव मानवजीवनस्य भूषणम्। सदाचारी मानवः सर्वैः स्वकीयैः परकीयैः महद्भिर्मानवैः समादृतः सन् संसारे नैजं विपुलं यशो वितन्वन् सर्वविधानि सुखानि समवाप्नोति। अत एव मानवजीवनोन्नयनाय सदाचाराणामाचरणमत्यावश्यकमास्ते।

सत्यहरिश्चन्द्रोदयस्य अलङ्कारसारमञ्जर्याश्च

अतिलघूत्तरीयाणि लघूत्तरीयाणि च प्रश्नोत्तराणि

प्रश्नः १— सत्यहरिश्चन्द्रोदयस्य प्रणेता कः?

उत्तरम्— सत्यहरिश्चन्द्रोदयस्य प्रणेता श्री रामजी उपाध्यायः।

प्रश्नः २— सत्यहरिश्चन्द्रस्योपजीव्यानि कानि सन्ति?

उत्तरम्— सत्यहरिश्चन्द्रोदयस्योपजीव्यानि सन्ति— ऐतरेयब्राह्मणम्, महाभारतम्, मार्कण्डेय पुराणम्, देवीभागवतम्, चण्डकौशिकम् च।

प्रश्नः ३— कोसलजनपदः कीदृशो विद्यते?

उत्तरम्— कोसलजनपदो विश्वविश्रुतः सम्प्रियकः दिवौकसामपि दर्शनीयतां गतो विद्यते।

प्रश्नः ४— मानवेन्द्रो मनुः कुत्र स्वनिवेशं चकार?

उत्तरम्— मानवेन्द्रो मनुः कोसलजनपदे पृथिव्यां स्वनिवेशं चकार।

प्रश्नः ५— कोसलजनपदे का नदी प्रवहति?

उत्तरम्— कोसलजनपदे सरयू नदी प्रवहति।

प्रश्नः ६— सरयू नदी कुतो लब्धजनिर्विद्यते?

उत्तरम्— सरयू नदी हिमालयस्य तपःस्थलीषु सञ्चरतां मुनीनां वेदघोषेण निर्झरमन्द्राणां घनानामप्सु लब्धजनिर्विद्यते।

प्रश्नः ७— आदिराजस्य मनोः राजधानी कुत्रासीत्?

उत्तरम्— मनोः राजधानी अयोध्याऽऽसीत्।

प्रश्नः ८— अयोध्यां कीदृशो जनाः आश्रयन्ते स्म?

उत्तरम्— अयोध्यां सर्वविद्याविशारदाः प्रज्ञाधुरीणाः सेवन्ते स्म।

प्रश्नः ९– केषां आचार्याणां सविधे विश्वस्य जनाः विद्यां चरित्रं च प्रपेदिरे?

उत्तरम्– आयोध्याकानामाचार्याणां सविधे विश्वस्य जनाः विद्यां चरित्रं च प्रपेदिरे।

प्रश्नः १०– लोके सत्यादर्शं प्रतिष्ठापयितुं कः स्वीयां परम्पराम् मन्वादिभ्यः प्रवर्तयामास?

उत्तरम्– लोके 'सत्यं ततानसूर्यः' इति श्रुत्यनुसारेण शाश्वतं सत्यादर्शं प्रतिष्ठापयितुं भगवान् सूर्यः स्वीयां परम्परां सूर्यादिभ्यः प्रवर्तयामास।

प्रश्नः ११– मानवेन्द्रो मनुः कस्य वंशीय आसीत्?

उत्तरम्– मानवेन्द्रो मनुः सूर्यवंशीय आसीत्।

प्रश्नः १२– हरिश्चन्द्रः कस्मिन् युगे बभूव?

उत्तरम्– हरिश्चन्द्रः त्रेतायुगे बभूव।

प्रश्नः १३– ग्रन्थकारो हरिश्चन्द्रस्य कीदृशं वैशिष्ट्यमाह?

उत्तरम्– भुवनत्रय कीर्तितिऽभिजाते सूर्यवंशे त्रेतायुगे प्रजापतिरिव प्रजानन्दनः सर्वविद्यावदातः ब्रह्मकोशस्य रक्षकः उदारधीः, यशस्वितमः महामनीषी सत्यवतीपुत्रः चन्द्रनिभः सकलजनरञ्जकः हरिश्चन्द्रो नाम राजर्षिः बभूव। इति हरिश्चन्द्रस्य वैशिष्ट्यं समासेनाह ग्रन्थकारः।

प्रश्नः १४– हरिश्चन्द्रस्य राज्ये प्रजा कीदृशी बभूव?

उत्तरम्– हरिश्चन्द्रस्य नित्यमापूर्यमाणे गुणैस्त्रि श्रद्धान्विता अपि प्रजाः स्वस्वाश्रमेषु प्रतिष्ठापिताः आत्मानं परेष्वपि वीक्ष्यमाणाः, परच्छिद्र तिरोधायिकाः स्वीयं सर्वस्वं परार्थमेव हृदा मन्यमानाः, परोत्कर्षपराः स्वचारित्र्यो छूयेण लोकजीवनं मधुरयन्त्यः परोपकारततिभिः वसुधैव कुटुम्बकम् सार्थयन्ति स्म।

प्रश्नः १५– कस्मात् कारणात् हरिश्चन्द्रस्य महती चिन्ता संजाता?

उत्तरम्– यतः आयौवनं हरिश्चन्द्रः पुत्रमुखं न ददर्श अतएव तस्य मनसि महती चिन्ता समजनि।

प्रश्नः १६– हरिश्चन्द्रस्य मनसि कीदृशं कष्टमासीत् मनसि?

उत्तरम्– हरिश्चन्द्रस्य मनसि कष्टमासीत् यत् मदनन्तरं मम पितरः पितृयागेन तर्पणं नोलप्स्यन्ते न वा सूर्यवंशोऽयं बर्धिष्यते।

प्रश्नः १७— हरिश्चन्द्रस्य पत्न्याः नाम किमासीत्?

उत्तरम्— हरिश्चन्द्रस्य पत्न्याः नाम शैव्या आसीत्।

प्रश्नः १८— किमर्थं शैव्या नियमानुष्ठानादिभिरात्मानं संस्कारितवती?

उत्तरम्— विश्वम्भरपुत्रलाभाय शैव्या नियमानुष्ठानादिभिरात्मानं संस्कारितवती।

प्रश्नः १९— किमर्थं राजा हरिश्चन्द्रदम्पती वसिष्ठस्याश्रमं जग्मतुः?

उत्तरम्— पुत्रावाप्तिकामनया तौ महर्षेः वसिष्ठस्याश्रमं जग्मतुः।

प्रश्नः २०— राज्ञो दर्शनमात्रेण महर्षिः वसिष्ठः किं व्यजानात्?

उत्तरम्— राज्ञो दर्शनमात्रेण महामुनि र्व्यजानात् यत् पुत्राधिगन्तुमेव अयं राजा सपत्नीकोऽत्र समागतः।

प्रश्नः २१— महर्षिः वसिष्ठः हरिश्चन्द्रं किमाह?

उत्तरम्— महर्षिः वसिष्ठः हरिश्चन्द्रमाह यत् तपसैव सर्वाः कामनाः फलन्ति। भवता गङ्गासागरं गत्वा वरुण उपासनीयः। प्रजाकामो भवान् प्रजापतिरिव तपस्तप्तुं। तपसो नास्ति परं किञ्चित्। तपसा विन्दते महत्। इत्यमुक्त्वा महामुनिः तौ दम्पती विसर्जयामास।

प्रश्नः २२— महर्षेः वसिष्ठस्यादेशमवाप्य तपस्तप्तुं राजा हरिश्चन्द्रः किमकरोत्?

उत्तरम्— महर्षेः वसिष्ठस्याश्रमादागत्य राजा हरिश्चन्द्रः शैव्यायाः कुशलहस्ते प्रशासनसूत्रं निधाय सरय्वाः पुलिनपथा पदातिरेव गंगासागराभिमुखं तपवस्तप्तुं प्रतस्थे।

प्रश्नः २३— पुण्याख्यस्याश्रमस्य कीदृशं वैशिष्ट्यमासीत्?

उत्तरम्— पुण्याख्य आश्रमः अतिथीनां स्वगेहभूतः, मनःप्रह्लादजननः, दृष्टिकान्तः, स्फुटितकमलामोदकषायः, सुखशाद्वलः, मधुररावैः विहगैर्विपुलनादितः उत्कचपुष्पैः परिगतश्चासीत्।

प्रश्नः २४— गंगायाः माहात्म्यं कीदृशं विद्यते?

उत्तरम्— गंगादर्शनमात्रेण सर्वार्थसाधिनी, दृष्टा सा पापं प्रणाशयति, स्पृष्टा च स्वर्गं नयति, अवगाहिता च सा मोक्षदा भवति।

प्रश्नः २५— केन प्रकारेण गंगा कर्मबन्धविनाशिका भवति?

उत्तरम्— यः जाग्रद् अश्नन्, वदन्, श्वसन् गंगां स्मरति तस्मै गंगा कर्मबन्ध विनाशिका भवति।

प्रश्नः २६— कस्मिन् क्षेत्रे हरिश्चन्द्र तपश्चचार?

उत्तरम्— गङ्गोपकण्ठं तपोवनं सिद्धिक्षेत्रम् विद्यते। तस्मिन् सिद्धिक्षेत्रे निरन्तरं विचरन् स गंगाया नैसर्गिक प्रभावेण मनोरथसिद्धये आत्मानं तपश्चर्यया पावयामास हरिश्चन्द्रः।

प्रश्नः २७— कीदृशं वरुणालयमपश्यत् राजा हरिश्चन्द्रः?

उत्तरम्— गंगासागरं गत्वा हरिश्चन्द्र ब्रह्मघोषसमन्वितम्, अमृताकरम्, उत्तालतालतरङ्गैः रमणीयम्, रात्रौ चन्द्रमण्डलं वीक्ष्य, वीचिविशलैः चन्द्रं स्पृशन्तमिव, तारारत्न परिगतम्, महासागरं ददर्श।

प्रश्नः २८— सुन्दवनस्य कीदृशं वैशिष्ट्यं विद्यते?

उत्तरम्— गंगासमुद्रयोर्मध्ये स्थितं सुन्दरवनं पुष्पिताग्राभिर्लताभिः विराजितम्, विविधवृक्षविहंगमवृन्द परिगतम्, मुनिजनेनासेवितं च विद्यते।

प्रश्नः २९— हरिश्चन्द्रः केन प्रकारेण तपश्चचार?

उत्तरम्— सूर्यवंशोद्भूतो हरिश्चन्द्रः सूर्यमेवादर्शं मत्त्व, ऊर्ध्ववाहुः, पञ्चमहातपाः विजितेन्द्रियः, सूर्ये निविष्टदृष्टिः तप अतप्यत।

प्रश्नः ३०— तपसि स्थितो हरिश्चन्द्र कीदृशं वरुणं ददर्श समक्षम्?

उत्तरम्— तपसि स्थितः हरिश्चन्द्र अपरं नारायणमिव वरुणं तपस अन्ते समक्षं ददर्श।

प्रश्नः ३१— देवैः किमर्थं रोधोपहितः हरिश्चन्द्रस्य पुत्रोदयो व्यधायि?

उत्तरम्— हरिश्चन्द्रात्मजः अनन्यसाध्यं देवानामपि कार्यभरं सम्पादयेदिति मनसि कृत्य देवैः रोधोपहितः हरिश्चन्द्रस्य पुत्रोदयो व्याधायि।

प्रश्नः ३२— कीदृशस्य पुत्रस्य वरदानेन प्रसादितवान् वरुणः हरिश्चन्द्रम्?

उत्तरम्— प्रसन्नो वरुणः हरिश्चन्द्रमाह यत् तव पुत्रः लोकोत्थान समर्थो, भविता। उपनयनकाले त्वया सः पुत्रः मह्यम् समर्पणीयः। तस्मिन् विश्वोत्थानयोग्यतां प्रभुत्वं च सम्पाद्याऽहं यथाकालं तं समावर्तयिष्यामि।

प्रश्नः ३३— सत्त्वसम्पन्नस्य पुत्रस्य प्राप्तये हरिश्वचन्द्रः किं संकल्पयामास?

उत्तरम्— हरिश्चन्द्रः वरुणस्य वचः स्मरन् निम्नांकितेन प्रकारेणसंकल्पयामास—

बहुकल्याणोदर्कमिच्छेच्च नृपतिः सुतम्।
प्रजानां, ब्रह्मचर्येण सत्येन च तितिक्षया।
उपवासैस्तथेज्याभिः व्रतैः कौतुकमङ्गलैः।। इति।।

प्रश्नः ३४— कस्मात् कारणात् राजा पुत्रस्य नाम रोहिताश्च इति चकार?

उत्तरम्— कलकण्ठीकूजितेऽग्निविहारकाले पुत्रोत्पत्तिसमाचारं श्रुत्वा हरिश्चन्द्रः आत्मजस्य नाम अग्निपर्यायो रोहिताश्व इति चकार।

प्रश्नः ३५— रोहिताश्वस्योपनयनकाले समुपस्थितेषु देवेषु वरुणस्य का कामना आसीत्?

उत्तरम्— वरदानकालिकाऽनुबन्धानुसारेण देवाधिराजो वरुणः रोहिताश्वं स्वाश्रमे विनेतुकामः रोहिताश्वस्योपनयनकाले समागत आसीत्।

प्रश्नः ३६— विश्वविजयस्य प्रस्तावे महर्षिः वसिष्ठः हरिश्चन्द्रं किमाह?

उत्तरम्— विश्वविजयस्य प्रस्तावे जाते महर्षिणा वसिष्ठेनाभिहितं राजन् ! सैन्यवलेन तु सर्वे विश्वविजयं कुर्वन्त्येव भवता धर्मबलेन विश्वविजयः करणीयः? अतएव देशे—देशे भवदीयेन संवर्धनेन कुलपतिभिराश्रमाः संस्थापनीयाः, शिक्षार्थिनश्च तत्र दूरदूरादागत्य अधिगतविद्याः भवेयुः। अनेन प्रकारेण धर्मविजयस्य समुचितोपलब्धिः।

प्रश्नः ३७— धर्मराज्ये सर्वत्र किं प्रत्यक्षीभवति?

उत्तरम्— धर्मराज्ये 'वसुधैव कुटुम्बकम्' इति सत्यं लोकानां सदाचारेण परस्पर संव्यवहारेण च प्रत्यक्षीभवति।

प्रश्नः ३८— धर्मराज्ये कः पिता किं किं करोति?

उत्तरम्— धर्मराज्ये धर्म एव पिता। स एव सर्वान् जीवान् सुखयति समुन्नयति च।

प्रश्नः ३९— धर्मराज्ये लोकाः किमर्थमात्मानमुद्योजयन्ति?

उत्तरम्— धर्मराज्ये लोकाः स्वार्थं समीहितुं न अपि तु परार्थमेवात्मानमुद्योजयन्ति।

प्रश्नः ४०— नैमिषारण्यं तीर्थं कीदृशं विद्यते?

उत्तरम्— नैमिषारण्यं हि गोमत्या नद्यां क्रोडीकृतं, मुनि सहस्रसमलंकृतं, प्राचीनादेव कालात् प्रख्यातं, अनेकयज्ञानुष्ठानस्थलम्, मन्वादिकानां महाराजानां तपःस्थलम्, स्वाध्यायानुष्ठानपरायणैरध्युषितं ब्रह्मचारिभिः विद्यते।

प्रश्नः ४१— राजा हरिश्चन्द्रो धर्मविजयप्रसंगेन कतिकालमुवास नैमिषारण्ये?

उत्तरम्— राजा हरिश्चन्द्रः धर्मविजयप्रसंगेन मासमेकमुवास नैमिषारण्ये।

प्रश्नः ४२— मिश्रके तीर्थे महर्षिर्दधीचः किं व्रतमकरोत्?

उत्तरम्— मिश्रके तीर्थे दक्षयज्ञकाले महर्षिर्दधीचः प्रतिज्ञातवान्—

अनृतं नोक्तपूर्वं मे न च वक्ष्ये कदाचन।
देवतानां ऋषीणाञ्च मध्ये सत्यं ब्रवीम्यहम्।।

प्रश्नः ४३— इन्द्रः दधीचस्यास्थीनि किमर्थमयाचत?

उत्तरम्— वृत्राक्रमणैर्व्याहन्यमान इन्द्रः दधीचशरणं गत्वा तस्यास्थीनि वज्रं निर्मातुं याचते स्म।

प्रश्नः ४४— मान्धातुः तपोभूमिः काऽसीत्?

उत्तरम्— मान्धातुः तपोभूमिः कुरुक्षेत्रमासीत्।

प्रश्नः ४५— हरिश्चन्द्रः नैमिषारण्यानन्तरं कुत्राजगाम?

उत्तरम्— हरिश्चन्द्रः नैमिषारण्यात् कुरुक्षेत्रमाजगाम।

प्रश्नः ४६— शिवेः परीक्षार्थमागतयोः इन्द्राग्न्योः परितोषं केन प्रकारेण चकार शिविः।

उत्तरम्— स्वपरिक्षार्थमागतयोः इन्द्राग्न्योः परितोषं शिविः स्वौदार्येण चकार।

प्रश्नः ४७— कीदृशमौदर्यं प्रदर्शयामास शिविः?

उत्तरम्— शिविः कपोतस्य प्राणरक्षायै स्वाङ्गमासं कपोतभारतुल्यमिन्द्राय श्येनरूपधराय प्रादात्।

प्रश्नः— ४८— हरिश्चन्द्रात् पूर्वं केन धर्मदिग्विजयः कृतः?

उत्तरम्— हरिश्चन्द्रात् पूर्वं तस्य पूर्वजेन मान्धात्रा धर्मादिविग्जयः कृतः।

प्रश्नः ४९— सत्ययुगे प्रजा कीदृश्यभवत्

उत्तरम्— सत्ययुगे सर्वाः प्रजा सदायतनाः सत्प्रतिष्ठाश्चासन्।

प्रश्नः ५०— त्रेतायुगे धर्मप्रतिष्ठायै देवर्षिर्नारदः किं प्रार्थितवान् ब्रह्मणः सविधे?

उत्तरम्— त्रेतायुगे धर्मप्रतिष्ठायै देवर्षिर्नारदः ब्रह्मणः सविधे निवेदितवान् यत् साम्प्रतम् श्रीमता महतां निदर्शनस्य प्रतिष्ठा करणीया येन कामक्रोधयोर्निरोधो भवेत्।

प्रश्नः ५१— नारदस्य वचो निशम्य भगवान् ब्रह्मा किमकार्षीत्

उत्तरम्— नारदस्य वचो निशम्य भगवान् प्रजापतिः ब्रह्मसंसदाह्वयामास।

प्रश्नः ५२— ब्रह्मणा संबोधिताः देवर्षयः कं स्वप्रतिनिधिं चक्रुः?

उत्तरम्— ब्रह्मणा संबोधिताः देवर्षयः स्वप्रतिनिधिं महर्षिं विश्वामित्रं चक्रुः।

प्रश्नः ५३— देवर्षयः स्वप्रतिनिधिं महर्षिं विश्वामित्रं किमाहुः?

उत्तरम्— देवर्षय प्राह महर्षिं विश्वामित्रं यत् भवान् तथा प्रयततां यथालोके

सूर्यवंशस्य सम्राजां सत्त्वावदानं नित्यमुपचीयेत। अतएव साम्प्रतिकं भुवनत्रयतिलकं महाराजं पुंरत्नं भवान् महाराजं हरिश्चन्द्रं भूयिष्ठमुच्छ्रयेद् येन तस्य सत्त्वप्रकाशः आकल्पं निखिलं जगत् सत्पथं दर्शयेत्।

प्रश्नः ५४— ब्रह्मणा महर्षिः विश्वामित्रः किमादिष्टः?

उत्तरम्— ब्रह्मणा महर्षिः विश्वामित्र आदिष्टोऽभूत् यद् भवता हरिश्चन्द्रस्य दुःसाध्या परीक्षा करणीय येन हरिश्चन्द्रस्य यशो लोके विततं भवेत्।

प्रश्नः ५५— ब्रह्मण आदेशमवाप्य विश्वामित्रः कुत्र जगाम?

उत्तरम्— ब्रह्मण आदेशमवाप्य विश्वामित्रः हरिश्चन्द्राय विपदामतिप्रबन्धं विधातुं तस्य राजधानीमयोध्यामगमत्।

प्रश्नः ५६— धर्मविजयानन्तरं हरिश्चन्द्रः कं यज्ञमकरोत्?

उत्तरम्— धर्मविजयानंतरं हरिश्चन्द्रः भूरिदक्षिणं राजसूययज्ञमारब्धवान्।

प्रश्नः ५७— हरिश्चन्द्रस्य राजसूययागे कीदृशी प्रदर्शनी आयोजिताऽभूत्?

उत्तरम्— हरिश्चन्द्रस्य राजसूययागे समायोजितायां प्रदर्शन्यां चतुषष्ठिकलासुनिष्णातानां पुरुषाणां कृतयः स्थापिताऽभूवन्।

प्रश्नः ५८— हरिश्चन्द्रस्य सम्राट् पदे अभिषेकाऽववसरे क अगात्?

उत्तरम्— हरिश्चन्द्रस्य सम्राट्पदे अभिषेकाऽवसरे महर्षिः विश्वामित्र अगात्।

प्रश्नः ५९— राजसूययागस्यान्ते आगत्य विश्वामित्रा महर्षिः किमवादीत्?

उत्तरम्— महर्षिः विश्वामित्र अवादीद्यत् कुलपतेरावश्यकदक्षिणार्थी अहं समागतजः।

प्रश्नः ६०— विश्वामित्रस्य वचोनिरशम्य हरिश्चन्द्रः किमवादीत्?

उत्तरम्— विश्वामित्रस्य वचोनिशम्य हरिश्चन्द्र अवोचत् यद् भवताऽहमनुगृहीतोऽस्मि सप्ताहान्तरे लक्षं श्रीमतेऽहं दास्यामि।

प्रश्नः ६१— हरिश्चन्द्रः विश्वामित्राय याचनासमकालमेव लक्षमुद्राः कथं नह्यदात्?

उत्तरम्— राजसूययागे हरिश्चन्द्रो यतः सम्पूर्णं कोशं कृतदान आसीत्।

प्रश्नः ६२— विश्वामित्राय दक्षिणां दातुं हरिश्चन्द्रः कथं नहि सैन्यबलेन धनमाप्तवान्?

उत्तरम्— सैन्यबलेन धनावाप्तिः धर्मविजयस्य विपर्ययो भविष्यतीति मेने हरिश्चन्द्रः।

प्रश्नः ६३— धनावाप्तये हरिश्चन्द्रः किं निर्णीतवान्?

उत्तरम्— हरिश्चन्द्रो निर्णीतवान् यत् अहं शिवस्य शरणं काशीं वा कैलासं वागमिष्यामि।

प्रश्नः ६४— हरिश्चन्द्रः कथं कैलासं नह्यगात्?

उत्तरम्— हरिश्चन्द्रो मेने यत् मानवव्यापाररहितत्वात् कैलासे ममार्थसिद्धिर्नो भविष्यति?

प्रश्नः ६५— काशीं गन्तुं कथं बहुमेनेहरिश्चन्द्रो धनावाप्तये?

उत्तरम्— हरिश्चन्द्रो निश्चितवान् यत् काश्यां शिव अकिंचनः अतएव मादृशानाकिंचनानाम् उपस्थानं बहुमंस्यते, सौमनस्यं च वितनिष्यति।

प्रश्नः ६६— काशीं गन्तुमना हरिश्चन्द्रो यदा निशान्तं प्रविवेश शैव्यां रोहितं चामन्त्रयितुं तदा शैव्या किमवादीत्?

उत्तरम्— साऽबोचत् यदहमपि भवता साकं काशीं गमिष्यामि कुलपतये दक्षिणायाः प्रबन्धं कर्तुम्।

प्रश्नः ६७— शैव्यायाः आग्रहं दृष्ट्वा हरिश्चन्द्रः किमकार्षीत्?

उत्तरम्— शैव्याया आग्रहं वीक्ष्य हरिश्चन्द्र तस्याः सहानुगमनमनुमेने।

प्रश्नः ६८— हरिश्चन्द्रं कोऽपि ब्रह्मवेत्ता क्रेतुं कथं न प्राभवत्?

उत्तरम्— ते ब्रह्मविदः गोधना आसन्, तेषां पार्श्वे स्वर्णमुद्रा नासीत्।

प्रश्नः ६९— विश्वामित्राय दक्षिणां दातुं हरिश्चन्द्रः किमकरोत्?

उत्तरम्— हरिश्चन्द्रः लक्षार्धमधिगन्तुं शैव्यां काञ्चित् ब्राह्मणीं परिचरितुं गृहदासीपदे नियुक्तवान्। स्वं च लक्षार्धदायिनः डोम्बराजस्य द्वादशवार्षिकीं भृत्यां नामजातिग्रहवर्जितां सानुबन्धां स्वीचकार।

अलङ्कारसारमञ्जर्यां प्रश्नाः लघूत्तरीया अतिलघूत्तरीयाश्च

प्रश्नः १— अलंकारलक्षणं लिखन्तु?

उत्तरम्— उपकुर्वन्ति तं सन्तं येऽङ्गद्वारेण जातुचित्।
हारादिवदलङ्कारास्तेऽनुप्रासोपमादयः।। इत्यलंकारलक्षणम्।

प्रश्नः २— चन्द्रलोकानुसारेण श्लेषालंकारस्य लक्षणमुदाहरणञ्च लिखन्तु?

उत्तरम्— नानार्थ—संश्रयः श्लेषो वर्ण्यावर्ण्योभयाश्रितः।
सर्वदोमाधवः पायात्स यो गङ्गामदीधरत्।।

प्रश्नः ३— चन्द्रलोकानुसारेण खण्डश्लेषस्य लक्षणोदाहरणे लेखनीये?

उत्तरम्— 'खण्डश्लेषः पदानां चेदेकैकं पृथगर्थता।
उच्छलद्भूरिकीलालः शुशुभे वाहिनीपतिः।।'

प्रश्नः ४— चन्द्रलोकानुसारेण भङ्गश्लेषस्य लक्षणोदाहरणे लेखनीये?

उत्तरम्— 'भङ्गश्लेषः पदस्तोमस्यैव चेत् पृथगर्थता।
अजरामरता कस्य नाऽयोध्येव पुरी प्रिया।।'

प्रश्नः ५— चन्द्रलोकानुसारेण अर्थश्लेषस्य लक्षणोदाहरणे लेखनीये?

उत्तरम्— 'अर्थश्लेषोऽर्थसार्थस्य यद्यनेकार्थ—संश्रयः।
कुटिलाः श्यामला दीर्घाः कटाक्षाः कुन्तलाश्च ते।।'

प्रश्नः ६— साहित्यदर्पणानुसारेण शब्दश्लेषस्य लक्षणोदाहरणेलेखनीये?

उत्तरम्— 'श्लिष्टैः पदैरनेकार्थाऽभिधाने श्लेष इष्यते।'

प्रश्नः ७— साहित्यदर्पणानुसारेण अर्थश्लेषस्य लक्षणोदाहरणे लेखनीये?

उत्तरम्— 'शब्दैः स्वभावादेकार्थैः श्लेषोऽनेकार्थवाचनम्।।'

प्रश्नः ८— चन्द्रलोकानुसारेण छेकानुप्रासस्य लक्षणोदाहरणे लेखनीये?

उत्तरम्— 'स्वर—व्यञ्जन—सन्दोह—व्यूहा मन्दोह—दोहदा।
गौर्जगज्जाग्रदुत्सेका छेकानुप्रासभासुरा।।'

प्रश्नः ९— चन्द्रलोकानुसारेण वृत्यनुप्रासस्य लक्षणोदाहरणे लेखनीये।

उत्तरम्— 'आवृत्त—वर्णसम्पूर्णं वृत्त्यनुप्रासवद्वचः।
अमन्दानन्द—सन्दोह—स्वच्छन्दास्पन्द—मन्दिरम्।।'

प्रश्नः १०— साहित्यदर्पणानुसारेण अनुप्रासस्य लक्षणोदाहरणे निरूपणीये?

उत्तरम्— 'अनुप्रासः शब्दसाम्यं वैषम्येऽपि स्वरस्य यत्।।'

प्रश्नः ११— साहित्यदर्पणानुसारेण अन्त्यानुप्रासस्य लक्षणोदाहरणे निरूपणीये?

उत्तरम्— 'व्यञ्जनं चेद् यथावस्थं सहाद्येन स्वरेण तु।
आवर्त्यतेऽन्त्यत्वादन्त्यानुप्रास एव तत्।।'

प्रश्नः १२— चन्द्रलोकाऽनुसारेण यमकालंकारस्य लक्षणोदाहरणे निरूपणीये?

उत्तरम्— 'आवृत्तवर्णस्तवकं स्तवकन्दाङ्कुरं कवेः।
यमकं प्रथमा धुर्यमाधुर्यवचसो विदुः।।'

प्रश्नः १३— साहित्यदर्पणानुसारेण यमकालंकारस्य लक्षणोदाहरणे लेखनीये?

उत्तरम्— 'सत्यर्थे पृथगर्थायाः स्वरव्यञ्जन—संहतेः।
क्रमेण तेनैवावृत्तिर्यमकं विनिगद्यते।।'

प्रश्नः १४— चन्द्रलोकानुसारेण उपमायाः लक्षणोदाहरणे निरूपणीये?

उत्तरम्— 'उपमा यत्र सादृश्य—लक्ष्मीरुल्लसति द्वयोः।
हंसीव कृष्ण ! ते कीर्तिः स्वर्गङ्गामवगाहते।।'

प्रश्नः १५— साहित्यदर्पणानुसारेण उपमायाः लक्षणोदाहरणे निरूपणीये?

उत्तरम्— 'साम्यं वाच्यमवैधर्म्यं वाक्यैक्ये उपमा द्वयोः।
सा पूर्णा यदि सामान्य—धर्म औपम्य—वाचि च
उपमेयं चोपमानं भवेत् वाच्यमियं पुनः।।'

प्रश्नः १६— चन्द्रलोकानुसारेण अनन्वयालंकारस्य लक्षणोदाहरणे निरूपणीये?

उत्तरम्— उपमानोपमेयत्वे यत्रैकस्यैव जागृतः।
इन्दुरिन्दुरिवेत्यादौ भवेदेवमनन्वयः।।

प्रश्नः १७— साहित्यदर्पणानुसारेणानन्वयालंकारस्य लक्षणोदाहरणे निरूपणीये?

उत्तरम्— 'उपमानोपमेयत्वे त्वेकस्यैव त्वनन्वयः।।'
राजीवमिव राजीवं जलं जलमिवाजनि।
चन्द्रश्चन्द्र इवाऽतन्द्रः शरत्—समुदयोद्यमे।।

प्रश्नः १८— चन्द्रलोकानुसारेण रूपकालंकारस्य लक्षणोदाहरणे निरूपणीये?

उत्तरम्— 'यत्रोपमानचित्रेण सर्वथाऽप्युपरज्यते।
उपमेयमयी भित्तिस्तत्र रूपकमिष्यते।।'

प्रश्नः १९— साहित्यदर्पणानुसारेण रूपकालंकारस्य लक्षणोदाहरणे निरूपणीये?

उत्तरम्— 'रूपकं रूपितारोपाद् विषये निरुपह्नवे।
तत्परम्परितं साङ्गं निरङ्गमिति च त्रिधा।।'

प्रश्नः २०— चन्द्रलोकानुसारेणोत्प्रेक्षालंकारस्य लक्षणोदाहरणे निरूपणीये?

उत्तरम्— 'उत्प्रेक्षोन्नीयते यत्र हेत्वादिर्निह्नुतिं विना।
त्वन्मुखश्रीकृते नूनं पद्मैर्वैरायते शशी।।'

प्रश्नः २१— चन्द्रलोकानुसारेण गूढोत्प्रेक्षालंकारस्य लक्षणोदाहरणे निरूपणीये?

उत्तरम्— इवादिकपदाभावे गूढोत्प्रेक्षां प्रचक्षते।
त्वत्कीर्तिर्विभ्रमश्रान्ता विवेश स्वर्गनिम्नगाम्।।

प्रश्नः २२— साहित्यदर्पणानुसारेण उत्प्रेक्षालंकारस्य लक्षणोदाहरणो निरूपणीये?

उत्तरम्— 'भवेत् सम्भावनोत्प्रेक्षा प्रकृतस्य परात्मना।
वाच्या प्रतीयमाना सा प्रथमं द्विविधा मता।।
वाच्येवादि—प्रयोगे स्यादप्रयोगे परा पुनः।
जातिर्गुणः क्रिया द्रव्यं यदुत्प्रेक्ष्यं द्वयोरपि।।'

प्रश्नः २३— चन्द्रलोकानुसारेण काव्यलिङ्गालंकारस्य लक्षणोदाहरणे निरूपणीये?

उत्तरम्— 'स्यात् काव्यलिङ्गं वागर्थौ नूतनार्थसमर्थकः।
जितोऽसि मन्दकन्दर्प ! मच्चित्तेऽस्ति त्रिलोचनः।।'

प्रश्नः-२४— साहित्यदर्पणानुसारेण काव्यलिङ्गालंकारस्य लक्षणोदाहरणे लेखनीये?

उत्तरम्— 'हेतोर्वाक्यपदार्थत्वे काव्यलिङ्गं निगद्यते।'

प्रश्नः २५— चन्द्रलोकानुसारेण रूपकातिशयोक्तेः लक्षणोदाहरणे निरूपणीये?

उत्तरम्— त्वद्वाजिराजि—निर्धूतधूलि—पटल—पङ्किलाम्।
न धत्ते शिरसा गङ्गां भूरि—भारहरेः हरः।।

प्रश्नः २६— साहित्यदर्पणानुसारेण अतिशयोक्तेर्लक्षणोदाहरणे निरूपणीये?

उत्तरम्— 'रूपकातिशयोक्तिश्चेद्रूप्यं रूपकमध्यगम्।
पश्य नीलोत्पलद्वन्द्वान्निःसरन्ति सिताः शराः।।'

प्रश्नः २७— चन्द्रलोकानुसारेण दृष्टान्तालंकारस्य लक्षणोदाहरणे लेखनीये?

उत्तरम्— 'चेद्बिम्बप्रतिबिम्बत्वं दृष्टान्तस्तदलङ्कृतिः।
स्यान्मल्लप्रतिमल्लत्वे सङ्ग्रामोद्दामहङ्कृतिः।।'

प्रश्नः २८—साहित्यदर्पणानुसारेण दृष्टान्तालंकारस्य लक्षणोदाहरणे निरूपणीये?

उत्तरम्— 'दृष्यन्तस्तु सधर्मस्य वस्तुनः प्रतिबिम्बनम्।'

प्रश्नः २९— चन्द्रलोकानुसारेण अर्थान्तरन्यासालंकारस्य लक्षणोदाहरणे निरूपणीये?

उत्तरम्— 'भवेदर्थान्तरन्यासोऽनुषक्तार्थान्तराभिधा।
हनूमानब्धिमतरद् दुष्करं किं महात्मनाम्।।'

प्रश्नः ३०— साहित्यदर्पणानुसारेण अर्थान्तरन्यासालंकारस्य लक्षणोदाहरणे लेखनीये?

उत्तरम्— सामान्यं वा विशेषेण विशेषस्तेन वा यदि।
कार्यं च कारणेनेदं कार्येण च समर्थ्यते।।
साधर्म्येणेतरेणार्थान्तरन्यासोऽष्टधा ततः।।

प्रश्नः ३१— चन्द्रालोकानुसारेण विरोधाभासालंकारस्य लक्षणोदाहरणे निरूपणीये?

उत्तरम्— 'श्लेषादिभूर्विरोधश्चेद्विरोधाभासता मता।
अप्यन्धकारिणाऽनेन जगदेतत्प्रकाश्यते।।'

प्रश्नः ३२— साहित्यदर्पणानुसारेण विरोधाभासालंकारस्य लक्षणोदाहरणे लेखनीये?

उत्तरम्— 'जातिश्चतुर्भिर्जात्याद्यैर्गुणो गुणादिभिस्त्रिभिः।
क्रिया क्रियाद्रव्याभ्यां यद् द्रव्यं द्रव्येण वा मिथः।
विरुद्धमिव भासेत विरोधोऽसौ दशाकृतिः।।'

प्रश्नः ३३— चन्द्रलोकाऽनुसारेण विभावनालंकारस्य लक्षणोदाहरणे लेखनीये?

उत्तरम्— 'विभावना विनापि स्यात् कारणं कार्यजन्म चेत्।
पश्य लाक्षारसाऽसिक्तं रक्तं त्वच्चरण—द्वयम्।।'

प्रश्नः ३४— साहित्यदर्पणानुसारेण विभावनालंकारस्य लक्षणोदाहरणे लेखनीये?

उत्तरम्— 'विभावना विना हेतुं कार्योत्पत्तिर्यदुच्यते।
उक्ताऽनुक्तनिमित्तत्वात् द्विधा सा परिकीर्तिता।।'

यथा— अनायासकृशं मध्यमशंकतरले दृशो।
अभूषणमनोहारि वपुर्वयसि सुभ्रुवः।।

प्रश्नः ३५— चन्द्रलोकानुसारेण विशेषोक्त्यलंकारस्य लक्षणोदाहरणे लेखनीये?

उत्तरम्— 'विशेषोक्तिरनुत्पत्तिः कार्यस्य सति कारणे।
नमन्तमपि धीमन्तं न लङ्घयति कश्चन।।'

प्रश्नः ३६— साहित्यदर्पणानुसारेण विशेषोक्त्यलंकारस्य लक्षणोदाहरणे लेखनीये?

उत्तरम्— सति हेतौ फलाभावे विशेषोक्तिस्तथा द्विधा।

धनिनोऽपि निरुन्मादा युवानोऽपि न चञ्चलाः।
प्रभवोऽप्यप्रमत्तास्ते महामहिमशालिनः।।

प्रश्नः ३७— चन्द्रलोकानुसारेण स्वभावोक्त्यलंकारस्य लक्षणोदाहरणे लेखनीये?

उत्तरम्— 'स्वभावोक्तिः स्वभावस्य जात्यादिषु च वर्णनम्।
कुरङ्गैरुत्तरङ्गाक्षैः स्तब्धकर्णैरुदीक्ष्यते।।'

प्रश्नः ३८— साहित्यदर्पणानुसारेण स्वभावोक्त्यलंकारस्य लक्षणोदाहरणे लेखनीये?

उत्तरम्— स्वभावोक्तिदुरूहार्थ स्व—क्रियारुपवर्णनम्।
यत्र स्तनन्धयान् हस्ते रत्नादीपाञ्जिघृक्षत।
पृष्ट्वा हाहेति सम्भ्रान्ता धात्री चेटैर्विहस्यते।।

प्रश्नः ३९— साहित्यदर्पणानुसारेण संसृष्ट्यलंकारस्य लक्षणोदाहरणे लेखनीये?

उत्तरम्— 'मिथोऽनपेक्षयैतेषां स्थितिः संसृष्टिरुच्यते।
देवः पायादपायादित्याद्येतस्या निबन्धनम्।।'

प्रश्नः ४०— निम्नांकितेषु वाक्येषु विद्यमानानामलंकाराणां निर्देशः करणीयः?

उत्तरम्— (१) सर्वदोमाधवः पायात्, (२) उच्छलद्भूरिकीलालः, (३) अजरामरताकस्य, (४) कुटिलाः श्यामलाः दीर्घाः कटाक्षाः कुन्तलाश्चते, (५) समासदत् सादितेति, (६) गौर्जगज्जाग्रदुत्सेका, (७) अमन्दानन्दसन्दोह स्वच्छन्दास्पदमन्दिरम्, (८) निराकरिष्णू वर्तिष्णू वर्द्धिष्णू परितो रणम्, (९) रामरावणयोर्युद्धं रामरावणयोरिव, (१०) त्वन्मुखश्रीकृते नूनं पद्मैर्वैरायते शशी।

उत्तरम्— (१) सर्वदोमाधवः— इत्यत्र श्लेषालंकारः, सर्वदा+उमाधवः, सर्वदो माधवः इति प्रकार द्वयेन खण्डात्।

(२) उच्छलद्भूरिकीलालः— इत्यत्र खण्डश्लेषालंकारः।

(३) अजरामरता कस्य— इत्यत्र भङ्गश्लेषः, अजश्च रामश्च, अजरामौ तयोः रता = अजरामरता इति विग्रहात् अजरश्च, अमरश्च = अजरामरौ तयोः भावस्तत्ता = अजरामरता इति विग्रहाच्च।

(४) कुटिलाः श्यामलाः दीर्घाः कटाक्षाः कुन्तलाश्चते— इत्यत्र अर्थश्लेषालंकारः।

(५) समासदत् सादितेति— इत्यत्र शब्दाऽनुप्रासः।

(६) गौर्जगज्जाग्रदुत्सेका— इत्यत्र छेकाऽनुप्रासः।

(७) अमन्दानन्दसन्दोह स्वच्छन्दास्पदमन्दिरम्– इत्यत्र वृत्त्यनुप्रासः।

(८) निराकरिष्णू वर्तिष्णू वर्द्धिष्णू परितो रणम्– इत्यत्र अनुप्रासालंकारः।

(९) रामरावणयोर्युद्धं रामरावणयोरिव– इत्यत्रानन्वयालंकारः।

(१०) त्वन्मुखश्रीकृते नूनं पद्मैर्वैरायते शशी– इत्यत्र उत्प्रेक्षालंकारः।

□□□

संस्कृत-विषयक सभी प्रतियोगी परीक्षाओं हेतु उपयोगी पुस्तकें

संस्कृतशिक्षणम्

व्याकरण-साहित्य-ज्योतिष-दर्शनशास्त्र-शिक्षणसहितम्

डॉ. उदय शंकर झा

संस्कृत शास्त्र-मञ्जूषा

डॉ. उदयशंकर झा

विषयवस्तु—• वैदिकसाहित्यअध्ययनम् • व्याकरणशास्त्रअध्ययनम् • छन्द(साहित्य-शास्त्र)अध्ययनम् • ज्योतिषशास्त्रअध्ययनम् • शिक्षाशास्त्रअध्ययनम् • शिक्षा-निरुक्त-कल्प-अध्ययनम् • भाषाविज्ञानअध्ययनम् • पुराणेतिहास-अध्ययनम् • धर्मशास्त्र-कर्मकाण्डअध्ययनम् • विषयानुसारेण वस्तुनिष्ठप्रश्नोत्तराणि

चिरन्तनी

पूर्वशिक्षाशास्त्री मार्गोपदेशिका

डॉ. रमाकान्तमिश्रः

• राष्ट्रिय संस्कृत संस्थान, नई दिल्ली • राष्ट्रिय संस्कृत विद्यापीठ, तिरुपति • श्री लाल-बहादुरशास्त्री राष्ट्रिय संस्कृत विद्यापीठ, नई दिल्ली • जगद्गुरु रामानन्दाचार्य राजस्थान संस्कृत विश्वविद्यालय, जयपुर एवं अन्य सभी विश्वविद्यालयों द्वारा आयोजित पूर्वशिक्षाशास्त्रीपरीक्षा के पाठ्यक्रमानुसार।

चौखम्बा सुरभारती प्रकाशन
के. 37/117 गोपालमन्दिर लेन
पो. बा. नं. 1129
वाराणसी 221001
दूरभाष : (0542) 2335263

चौखम्बा पब्लिशिंग हाउस
4697/2 (ग्राउण्ड फ्लोर)
गली नं. 21-ए, अंसारी रोड
दरियागंज, नई दिल्ली 110002
दूरभाष : (011) 23286537

चौखम्बा विद्याभवन
चौक (बैंक ऑफ बड़ोदा भवन के पीछे)
पो. बा. नं. 1069
वाराणसी
दूरभाष : (0542) 2420404

चौखम्बा संस्कृत प्रतिष्ठान
38 यू. ए. बंगलो रोड, जवाहर नगर
पो. बा. नं. 2113
दिल्ली 110007
दूरभाष (011) 23856391